नं० ५१६३

नाम - कात्यायन सूत्र व्याख्यानम्

कर्त्ता - याज्ञिकदेवः प्रजापति देवसुतः

१३२ पत्र

पत्र संख्या - ~~२४०६~~ पत्राणि सं० - १९२२

विषयः - सूत्रपद्धतिः

कात्यायनसूत्रव्याख्यान प्रथमाध्यायः

प१६२

3400

प्रथमोध्याय:

पत्रे
४२२

बस्ता
८

श्रीगणेशायनमः ॐ ब्रह्माणमथविष्णुंचशिवंगणपतिंतथा अंबि
१ पा कांशारदांचापिवंदेविघ्नोपशांतये १ कात्यायनंनमस्कृत्यगुरून्श्रीश्री
पतींस्तथा पितरौभीष्मकर्तृस्वपितृभूत्यादिसंज्ञकान् २ कात्यायनप्रणी
तेस्मिन्सूत्रेयज्ञप्रकाशके प्रजापतेस्तनूजोहं कुर्वेव्याख्यामिमांस्फुटां ३ जयं
तितेगुरोर्वैद्याःश्रीपतेःपादपांसवः येषांप्रसादाज्जडोपिव्यापलंकर्तुमुद्यतः
४ आलोच्यसूत्रभाष्यादिक्रियतेसंग्रहोयतः तत्कल्पितत्वशंकात्रनका
र्याविबुधैरतः ५ इहपुण्योवैपुण्येनकर्मणाभवतितमेतंवेदानुवचनेनवि
विदिषंतिब्रह्मचर्येणतपसाश्रद्धयायज्ञेनेति अग्निहोत्रंजुहुयात्स्वर्गकामइ
त्यादिभिर्वावेदैःकर्मणांस्वर्गापवर्गादिश्रेयःसाधनत्वंप्रतीयते तानिचाग्नि
होत्रादिकर्माणिवेदवाक्यैकवेद्यानिवेदवाक्यानिचानेकशाखावच्छिन्नत्वात्व
तत्प्रभृतिवाक्यंनानाविधपरस्परविरुद्धार्थस्फुरणेनदुर्बोधार्थानि बहुभिरर्थ
वादवाक्यैर्मिश्रितानिच "तथाहि" अग्निहोत्रंजुहुयात्स्वर्गकामइत्यत्रकिंस्वर्गोहो
मायतुतन्होमःस्वर्गाय तथा अग्निहोत्रशब्दोगुणविधानार्थोनामधेयंवेति
तथासर्वेसंवत्सरंदीक्षाभिरेतीत्यादौक्वचित्संवत्सरशब्दस्यमुख्यार्थत्वंसहस्र १

संवत्सरं दीक्षितस्यैव गोदानं अर्थवादमिश्रपाठाद्धि ध्ययर्थवादसंदेहोपि भवति
किमयं विधिरुतार्थवाद इति यद्यपि जैमिनिशबरस्वामिकुमारिलप्रभृतिभि
र्मीमांसायां तानि वाक्यानि संदेहनिरासपूर्वकं यथार्थं व्याख्यातानि संति अधी
तशास्त्राणां च तदर्थावगमोपि सुकर एव तथापि तेषां नानाशाखास्ववस्थित
त्वेनेदानींतनैः सर्वैः पुरुषैरध्येतुं चाशक्यत्वात्तदधीनकर्मणां ज्ञानं दुःशक सातुं ५
मिदानींतनानामिति मत्वा परमकारुणिको भगवान्कात्यायनाचार्यो नानाशा
खागतविधिवाक्यसंग्रहरूपं कल्पसूत्रं प्रणीतवान् तत्र पूर्वमधिकारादिक
स्य सर्वकर्मसाधारणस्य निरूपणानंतरं विशेषस्य दर्शपूर्णमासादेर्निरूपणं
युक्तं अन्यथा प्रतिविशेषं अधिकारादिनिरूपणे ग्रंथगौरवं स्यात् तस्मान्मा
भूदिति कृत्वा प्रथमेध्याये यावल्किंचि सर्वकर्मसाधारणं तदुपदिशति तत्रेतरा
दिमं सूत्रं अथातोधिकारः वक्ष्यत इति सूत्रशेषः तत्रायमथशब्दो मंगलार्थ
आनंतर्यार्थश्च मंगलानंतरारंभप्रश्नकार्त्स्न्येष्वथो अथेति अमरोक्तेः तत्र
मंगलमुच्चारणमात्रेणासाद्यते दधिवद्दर्शनादिति आनंतर्यंतु अभिधास्य
स्यावगतिः तेनान्यायश्चानेकार्थत्वमिति दोषानवकाशः अपेक्षितं च प्रारिप्सि

श्रीः २ तस्य ग्रंथस्याविघ्नेन परिसमाप्तये प्रचयगमनाय च मंगलं आनंतर्यं च न यतः
कुतश्चित् अनुपयोगात् किं तु वेदाध्ययनापेक्षत्वात्तस्यास्तापेक्षितत्वात् अतः
शास्त्रेऽत्र हेत्वर्थस्तस्यैव वेदाध्ययनस्य वेदार्थविचारं प्रति हेतुतामाह अधिक्रि
यत इत्यधिकारः स्वाम्यं फलभोक्तृतया कर्मणि ऐश्वर्यमित्यर्थः तेनायमर्थः
अथ वेदाध्ययनानंतरं यतोऽधीतो वेदः अतो हेतोरधिकारो वक्ष्यते अभिधा
2 स्यते विचारपूर्वकं निरूपयिष्यत इत्यर्थः अधिकारग्रहणं सर्वेषां वेदवाक्य
प्रतिपाद्यानामर्थानामुपलक्षणार्थं अधिकारादिकः सर्वोऽपि वेदवाक्या
र्थोऽभिधास्यत इत्यर्थः प्रतिज्ञासूत्रमिदं प्रतिज्ञायत इदं अधिकारो वक्ष्यत इ
ति प्रतिज्ञाकरणं च शिष्यबुद्धेरव्याकुलतार्थं अन्यथा हि किमिदमुच्यत इति
बुद्धेर्व्याकुलता भवति केचित्त्वेवं व्याचक्षते अयमध्यायः सूत्रकृता नित्य
काम्यप्रायश्चित्तोपदेशानंतरं तु पनिबद्धः तेनायमाह सर्वकर्मोपबंधनानं
तर्यं अतः शास्त्रस्य हेत्वर्थ एव यतो दर्शपूर्णमासादीनि प्रवर्ग्यान्तानि कर्माण्यु
क्तानि अतस्तेष्वेव कर्मस्वधिकार उच्यते एषु पूर्वोक्तेषु कर्मसु अस्याधिकारः
अस्य स्वामित्वं अस्य कर्मजन्यफलभोक्तृत्वमिति वक्ष्यत इत्यर्थः यत्तु तेष्वे २

वकर्मस्वेवमपेक्षा जायते । तेष्वग्निहोत्रादिकर्मसु कस्याधिकार इति अ
त एव प्रतिज्ञा अथ सर्वत्र कर्मोपदेशानन्तरं यतः कर्माण्युक्तानि अतस्तेष्व
धिकारोऽभिधीयत इति । अधिकारो वक्ष्यत इति प्रतिज्ञा तं कर्मजन्यफलभो
क्तृत्वं वाधिकार इत्युक्तं न च कर्मणां फलवत्त्वे सिद्धे सति सिध्यति नान्यथा ते
न तत्साधनार्थमिदं सूत्रमारभ्यते ॥ तत्रैवं संदेहः ॥ किमफलवन्ति कर्माणि उत
फलवन्तीति ॥ अफलवन्तीति ब्रूमः ॥ कुतः । कर्मसमनन्तरं प्रत्यक्षेण फलस्यानुप
लब्धेः । ननु मा भूत् प्रत्यक्षं कर्मणां फलवत्त्वे प्रमाणं आगमस्तु भविष्यति कश्चा
सौ अग्निहोत्रं जुहुयात्स्वर्गकामः दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादि
सत्यं भविष्यति ॥ तथाप्येतन्न विचारार्हं अत्राग्निहोत्रादिषु किं पुरुषस्याधि
कारः स्वाम्यं कर्मजन्यफलभोक्तृत्वमस्ति न वेति तदर्थमिदं विचार्यते । यजेत जु
हुयादित्यत्र ये प्रत्ययास्ते भावनास्तस्यां किं धात्वर्थ एव भाव्यः प्रधानं । यागं
कुर्यात् होमं कुर्यादित्येवं स्वर्गादि तु तत्साधनतया गुणभूतं । स्वर्गेण यागं च हो
मं कुर्यादिति । उत काम्यमानत्वेनोपात्तः स्वर्गादिरेव भाव्यस्तत्र च साधनं धात्व
र्थ इति । यागेन होमेन च स्वर्गं कुर्यादिति तत्तोऽप्येतन्न विचार्यते ॥ योऽत्र क्रिया यागः स्वर्ग

मी: कामादेश्च पुरुषस्य क्रियाकर्तृरूपसंबन्धः। तत्र किं क्रियाप्रधानभूता पुरुषो गु-
३ णभूतः। अथवा पुरुषः प्रधानभूतः क्रिया गुणभूतेति। यदि गुणभूतः पुरुष-
स्तस्य गुणभावं क्रियाक्षेपादेव सिद्धमनुष्ठानं स्वर्गादिद्रव्यं साधनत्वेन विधीयते।
काम श्रुतिश्च साधनकामनानुवादः। अयमर्थः। स्वर्गसाधनत्वेन कामयमा-
नो यजेत स्वर्गेण यागं कुर्यादित्यर्थः। अथवा समुद्रं मनसा ध्यायन् रथंतरं
गायेदितिवत् स्वर्गकामे तु गुणभूतकर्तृविशेषणे स्वर्गे यागांगत्वेन विधी-
यत इति द्वेधा पूर्वः पक्षः। अथवा प्रधानभूतः पुरुषस्तत्र तस्यात्मार्थस्व-
च र्गादिगोचरा प्रवृत्तिः प्रत्ययेन विधीयते साधनतया च यागस्तूपदिश्यते। स्वर्ग-
कामो यागेन कुर्यादात्मार्थप्रवृत्तिमिति। स्वर्गकामस्य चात्मार्थप्रवृत्तिः स्व-
र्गविषयैवेति स्वर्गभावनैवानेन प्रकारेण परिदृष्टा भवति तदयमर्थः। यः स्व-
र्गप्राप्तुमिच्छति स यागेन कुर्यादभिलषितं स्वर्गं न स्वाभिलषितं इति स्वर्गंभा-
वयेद्यागेनेत्युक्तं भवति। तत्र स्वर्गशब्दः स्रक्चंदनवनितादिद्रव्यवाची। सुख-
वाची वेति। यदि द्रव्यवाची तत्र कर्मप्रधानं द्रव्यं गुणभूतं। अथ सुखवाची त-
दा यागो गुणभूतः स्वर्गः प्रधानमिति तत्र पूर्वः पक्षः। अत्र यजेत जुहुयादित्य-

नेनाख्यातेन भावनाभिधीयते। तस्यांच धात्वर्थ एव भाव्यः। एकपदोपात्तत्वात्
।स्वर्गस्तु पदांतरोपात्तत्वात् द्वाक्येन भाव्यत्तयान्वेतव्यः। वाक्यंच पदात् दुर्बलं। स्वर्ग
स्य च भाव्यत्वाभावे सति गुणत्वमंगीकार्यं। स्वर्गशब्दश्चात्र सुखसाधनचंदनादि
द्रव्यवाची। चंदनं स्वर्गो हि रम्यवर्षाः स्त्रियः स्वर्गः कौशिकानि सूक्ष्माणि वासांसि
स्वर्ग इति लोकव्यवहारदर्शनात्। सर्वत्र शब्दार्थे तस्यैव प्रामाण्यात्। तच्च कामपि
तुं योग्यं। तेन न विना यागान्निष्पत्तेः। द्रव्यं च भूतं तेसिद्धं कर्म तु भव्यं साध्यं। भूतस्य च भ
व्यार्थतायुक्ता दृष्टार्थत्वात्। न तु भव्यस्य भूतार्थता। दृष्टोपकाराभावात्। तस्मादपि
यागहोमादिर्धात्वर्थ एव भाव्यः। अथवा स्वर्गादिकामनैव यागं गमित्यस्मिन्नपि
पक्षे नत्थैव। नव यागेन किमपि फलं साध्यते इत्युक्तं। तस्मादफलत्वं सर्वकर्मणा
।निःफले प्रवृत्ते फले भावात् हृदि विन्नव्ययायाससाध्यत्वाच्च न कश्चित्प्रवर्त्तेते
।तेन कस्यापि कर्मजन्यफलभोक्तृत्वाभावात् पर्यायो ऽधिकारः सिद्धो नीतिप्राप्त आह
फलयुक्तानि कर्माणि। फलं पुरुषाभीष्टं स्वर्गधनपुत्रादि कर्माण्येष्टिहोमादी
नि फलयुक्तानि फलैः संबद्धानि फलवंति फलस्य साधकानि भवंतीत्यर्थः कृ
याद्दृच्छं यजेत जुहुयादित्यत्र प्रत्ययस्य केवलमाख्यातत्वमेवेति न मतं व्यं

तु

श्री ।किं इति चेत् स्वपक्षे न विधिरूपत्वमभ्युपगन्तत्राख्यातत्वाकारेण भावनामाचष्टे
४ ।विधित्वाकारेण पुरुषं प्रवर्त्तयति। पुरुषश्च स्वाभिमतं फलमन्तरेण न प्रवर्त्तत इ
ति तदपेक्षितं स्वर्गमेव भाव्यतया विधिरुपादत्ते। स्वर्गशब्दश्च सर्वैर्हृष्टे सुखे
रूढः। तथा हि। यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरं। इच्छामात्रोपनीतं तत्सुखं
स्वर्गपदास्पदमिति। दृष्टे तु लाक्षणिकः। तस्मात्स्वर्गस्य भाव्यत्वं विधिश्रुत्या
सिद्धं। धात्वर्थस्य तु भाव्यत्वमेकेन पदेन प्रतीयमानमपि न प्रत्ययेनावगम्य
ते। किं तु प्रकृत्या। तथा सति स्वर्गभाव्यत्वं भावनायाः प्रत्यासन्नं। एकेनैव विधि
रूपेण शब्देन प्रत्ययेनावगमात्। तत्संनियोगादपि स्वर्गस्यैव भाव्यत्वं। यागहोमा
दि तु तत्साधनं। तथा हि। किं स्वर्गकामो यागो योपदिश्यते। यथा लोके हितोष्मायाः
प्रचरन्तीति। यदि वा यागः स्वर्गकामाय। यथा मलिनः स्नायात् बुभुक्षितोऽश्ना
त् बुभुक्षितोऽश्नीयादिति। तत्र यदि स्वर्गकामः कर्मणे उपदिश्यते। उपदिष्टोऽपि न प्र
वर्त्तेत। को हि परार्थं प्रयासमातिष्ठेत। तथा च कर्मचोदनाऽनर्थिकैव भवति।
अथ यागः स्वर्गकामार्थः। ततोऽसौ पुरुषस्योपकरोति। तं पुरुषः स्वार्थेन करो
तीति तथा च कर्मचोदनार्थवती भवति। तस्माद्यागः स्वर्गकामस्योपकारकः ४

स्वर्गकामस्यानेव उपकारः पुत्रपशुग्रामान्नाद्यादिरूप महत्व:" सयदि तत्रान्नाद्या
द्यानामन्यूनमवरोति ततः स्वर्गशब्दो विवक्षितार्थः पुरुषमात्रवचनो भवतीति
थावानर्थक्यमेव। अंतरेणापि हि तद्वचनं पुरुषमात्रमाख्यानादेवगम्यते।
(यागात्स्वर्गो भवन्नर्थावानर्थक्यमेव। अंतरेणापि हि तद्वचनं पुरुषमात्रमा
ख्यानादेवगम्यते) तस्माद्यागात्स्वर्गो भवतीति निश्चीयते। अतश्च स्वर्गकामो या
गे नकुर्यादिति वाक्यार्थः। अत्र स्वर्गप्रार्थयमानस्यानुष्ठानमनु यागस्तस्यो
पायत्वेन विधीयते। अतः स्वर्गादिकं यागादेः फलमिति सिद्धं। फलवंति कर्मा
णीति च। अतः कर्मणो फलवत्वात्कर्मजन्यफलभोक्तृत्वापर्यायो धिकारोपि पृ८
पुरुषस्याग्निहोत्रादिकर्मसु सिद्ध इति। अधिकारो वक्ष्यतइति प्रतिज्ञानां सर्वेषा
मित्यपेक्षायामाह॥ सर्वेषामविशेषात्। सर्वेषां कर्मानुष्ठानसमर्थानाम
समर्थानां चांधमूकपंगुबधिरदेवऋषितिरश्चां कर्मस्वधिकारो भवति
कुतो। अविशेषात्। फलार्थित्वस्य सर्वेषामविशिष्टत्वात्। फलं हि सर्वैरिष्यत वि
एवात्र भावेन नानांवृक्षादीनां कामनाभावादस्त्वनधिकारः। तिर्यञ्चां तु भ श्चां
वतितिर्यचो हि तापोपतप्ता श्छायां व्रजंति। शीतपीडिताश्चातपानतु तिर्यंचः

श्री
५ भावि

प्रत्यासन्नमेव जायते न तु कालांतरभाविफलं। वैदिकानि च कर्माणि कालां
तरफलान्येव। अतः कथं तिरश्चां तत्र प्रवृत्तिः। उच्यते। कालांतरेपि फलं
कामायमाना दृश्यंते। श्वानश्चतुर्दश्यामुपवसंति। श्येनाश्चाष्टम्यामिति। लिं
गान्यपि वेदे संति। देवा ह वै सत्रमासत सर्पाः सत्रमासत। वनस्पतयः सत्र
मासत गावो वा एतत्सत्रमासतेत्यादीनि। तानि च देवानां सर्पाणां वनस्पतीनां
गवां चाधिकारं दर्शयंति। नन्वेते यथायथोक्तं कर्म कर्तुं न शक्ष्यंतीति कथम
धिकार एवं तु अनेनायजेतेत्यादि प्रधानवाक्येन स्वर्गाधिकारं कर्मावगतं तद
नुसारीणि चांगवाक्यानि तत्संकोचे समर्थानि। अतश्चक्षुष्मंतं प्रत्याज्यावे
क्षणविधिः अचक्षुषस्तु न हि अभावात्तद्रहितमेव फलसाधनं एवं बधिर
स्य वाचनरहितं। मूकस्य मंत्रोच्चारणरहितं। पंगोश्च विष्णुक्रमणरहितमिति
सर्वेषामर्थिनां [illegible] मशक्यांगरहितकर्मानुष्ठानात्सिद्धोधिकार इति
पूर्वः पक्षः॥ सिद्धांतमाह॥ मनुष्याणां वारंभसामर्थ्यात्। वाशब्दः पक्षव्यावृ
त्तौ। न सर्वेषामधिकारः किंतु मनुष्याणामेवाकृतः आरंभसामर्थ्यात्। मनु
ष्या एव हि यथाशास्त्रं कर्मारब्धुं कर्तुं समर्था न देवर्षितिर्यगादयः। तत्र दे ५

वानां देवतांतराभावादनधिकारः॥ न ह्यात्मानमुद्दिश्य त्यागः संभवति। किं च दे
वा ह्यवाप्तस्वर्गादिकामाः। न च ते यागं किंचिदवाप्तुमिच्छंति यदर्थं कर्माणि कुर्व
ते। ऋषीणां चार्षेयाभावादनधिकारः। न हि भृग्वादयो भृग्वादिसगोत्रा भ
२४ वंति। तत्र नैव विशेषः। अनादिर्हि कालोऽस्माकं मीमांसकानां। तेन भृग्वादयोपि
पूर्वपूर्वभृग्वंतरसंभवात्। ततः पूर्वमप्येवमेवेति संभवत्येव भृगोरार्षेयत्वमि
त्यत्रोच्यते। ऋषीणामप्यधिकारः। न यागे येषां शब्द एव देवता तेषामिदमयुक्तं।
यद्देवानां देवतांतराभावादनधिकार इति। शब्दयते हीन्द्रेणापींद्रशब्दोच्चार
णेन ह विस्त्यज्तुं। तस्माद्देवानामप्यधिकार इति। न च तिरश्चां गवादीनाम
धिकारः। प्रधानमात्रेपि सामर्थ्याभावात्। आसन्नचेतनत्वाच्च। तेन ह्यास
न्नमेव चेतयंते न पारलौकिकं फलमिति। ननु मंश्वुनश्चतुर्दश्यामुपवासद
र्शनात्। श्येनस्य चाष्टम्यामुपवासदर्शनादपि पारलौकिकं जानंतीति। न
त्कथमवगम्यते ते धर्मार्थमुपवसंतीति। ये हि वेदस्मृतिपुराणादिकं पठंति। त
एवं जानंति यदनेन कर्मणा इदं फलममुत्र प्राप्यत इति। न चैते वेदादिकं
पठंति नाप्यन्येभ्य आगमयंति। तेन शास्त्रार्थमविद्वांसः फलमामुष्मिकमका

मयंतः कथं तत्साधनं च कर्म कुर्युः। तस्मात्त्र धर्मार्थमुपवसंतीति। किमर्थं
तर्हि तेषामुपवासः। उच्यते। एगादश्यचिरेषां। तर्हि नियतकाले कथं रोगः। उच्य
ते। नियतकाले ऽपि रोगा भवंति। यथा तृतीयकचातुर्थिकादिज्वरः। अथ
नाश्वेते। तस्मान्न भगवादीनां तिरश्चामधिकारः। यानि पुनर्लिंगानि देवाहवेस
त्तमासत्रेत्यादीनि अर्थवादास्ते विधिप्ररोचनार्थाः। यद्वा सत्त्राणि ब्रह्मशास्त्राणि या
नि सत्त्या अपि देवा आसते आमनन्त्वेतन्नास्ति यत्तेषोपि अथवेन नावनस्पतयो
पि। किं पुनर्मनुष्या यथा श्रूनमनुष्ठातुं समर्थाः इति। तस्मा यथा श्रुतकरण
सामर्थ्यान्मनुष्याणामेवाधिकारो न भगवादीनामिति सिद्धं॥ एवमपि मनुष्या
णामधिकारे प्राप्ते आह॥ अंगहीनाश्रोत्रियषंढशूद्रवर्जं॥ अंगहीना
श्रोत्रियषंढशूद्रान्वर्जयित्वा मनुष्याणामधिकारः कर्मसु भवति। मनुष्या
अपि ये अंगहीना अंगेन चक्षुरादिना हीना अंधपंगुमूकबधिरादयः अश्रो
त्रिया अनधीतवेदाः षंढा नपुंसकाः शूद्राश्च तेनेषामधिकारः इत्यर्थं आ
रंभसामर्थ्यादित्यत्राप्यनुवर्तते। न चैते अंगहीनादयो यथाश्रुतं कर्मारब्धुं क
र्तुं शक्नुवंति। तद्यथा। नत्वंधआज्यावेक्षणं कर्तुं शक्नोति। मूको मंत्रोच्चारणं। पं ६

गुश्च विस्मुक्कमणां बधिरश्च मेषश्रवणां। अनधीतवेदो श्रोत्रिय इत्युच्यते।
सर्वविमपि मंत्रसाध्यं कर्म कर्तुं न शक्नोति। षंढो नपुंसकः। तस्याप्यनधीतवेदत्वाद
दृष्टत्वाद् शुचित्वाच्च नाधिकारः। शूद्रस्य चानधीतवेदत्वादनधिकारः। आज्यावे
क्षणादिभिश्च विनाकर्मणो वैगुण्यं भवत्येव। न नूनमशक्यांगरहितकर्मानुष्ठा
नादधिकारो भविष्यतीति अत्रोच्यते। भवेदेवं यदि आज्यमवेक्षेतेत्यादी
न्यंगवाक्यानि स्वातंत्र्येण पुरुषैः संबध्येरन्। प्रधानवाक्यशेषत्वात्तेषां तदंगयु
यु· क्तेन प्रधानवाक्येन तदंगं [illegible]तः क्रतुः पुरुषैः संबध्यमानोऽसमर्थान्परित्यज्य
समर्थान्प्रतिज्ञायते तेनांधस्य क्रतुरेवाविहितो न त्वाज्यावेक्षणमेवाविहित
मितरत्त्वविहितमिति मंतव्यं। तत्र प्रधानवाक्यविरोधः सर्वाधिकारानिवृत्त्यात
विशेषाभावाद्धि सर्वाधिकारः स्यादस्ति च विशेषः आरंभसामर्थ्यं। अतः सम
र्थानामेवाधिकारः। यत्तु प्रधानवाक्यविरोधो यावज्जीवं यजेतेत्यादेः। तत्र य
थाशक्ति प्रयोगादयि पकलं भवति। तदविरोधे तु सर्वांगयुक्तकर्मानुष्ठानमेव फ
लं। ननु आरंभसामर्थ्यादित्यनेनैव गवादीनामिवांधादीनामप्यधिकाराभा
वसिद्धेः किमर्थं पुनरंगहीनादिवर्जमित्युक्तं। उच्यते। नियमार्थं एतेषामेवान

श्री।

धिकारो न निर्धनस्य। तस्य नाधिकारो भवत्येव। नत्वारंभसामर्थ्याभावादनधि
कारः। अतो निर्धनेनापि क्रत्वर्थं धनमर्जनादिना संपाद्यावश्यं यजेतेति। एवमं
धादिरपि यद्यपि शास्त्रादीनां पठनादिकं स्पर्शयितुं शक्नोति। तस्याप्यनधिका
रो भवत्येव। पूर्वमनंगहीनत्वावस्थायामाहिताग्नेः पश्चाद्रोगादिनांगवै
कल्ये जाते काम्येष्वधिकारो न भवति। नित्येषु तु यथाशक्ति कुर्वन्नधिक्रिय
त एव। अंगवैकल्ये सति अग्न्याधेयं न भवत्येव। मंडनः। दर्शेष्टिं पौर्णमासेष्टिं
सोमेष्टिमप्यग्निसंग्रहं। अग्निहोत्रं विवाहं च प्रयोगे प्रथमे स्थितं। न कुर्याज्जन
के श्रेष्ठे सोदरे वा यथा कुर्वीत। ज्येष्ठभ्राता विहीनेन सत्याधेयं न तदनुज्ञया। पितुः स
त्यप्यनुज्ञाते नादध्यान्न कदाचन। हारीतः। सोदराणां तु सर्वेषां परिवेत्त्यं कथं भ
वेत्। दारैस्तु परिविद्यन्ते नाधानेन वनेऽप्ययेति। कात्यायनः। देशांतरस्थक्ली
बैकवृषणानसहोदरान्। वेश्यातिसक्तपतितशूद्रतुल्यातिरोगिणः। जड
मूकांधबधिरकुब्जवामनखोडकान्। अतिवृद्धानभार्यांश्च कृषिसक्ता
न्नृपस्य च। धनवृद्धिप्रसक्तांश्च कामतोऽकारिणस्तथा। कुटिलोन्मत्तचोरांश्च प
रिविंदन्न दुष्यति। तथा। नाधिकारविघातोस्ति भिन्नोदर्येपि सोदरे। पंगवंधम्

श्रौ ३

कबधिरपतितोन्मादहूषणो। सन्यसत्सिच्छिन्नहस्ता दोषहीषंढादिदूषके। ज
नके सोदरे ज्येष्ठे न कुर्यादेवनत्नंत्रिया। ननु द्रव्यवतोऽनंगहीनस्य सम
र्थस्य सतः शूद्रस्याधिकारः कथं न भवति वेदे चैवं विधानि लिंगान्यपि संति
ये: शूद्रस्याधिकारो भवतीति गम्यते। आधावितिशूद्रः स्येतिहविष्कृदा
द्रवति। मनुशूद्रस्येति सोमे पयोव्रतस्थाने। आशीवदर्घ॥ शूद्रस्येति पितृमेधे।
नन्वनधीतवेदत्वात्कथमधिकार इति। उच्यते। अनुपनीतस्यापि अनधी
तवेदस्यापि पत्नीवद्भविष्यतिप्रासे आह॥ ब्राह्मणराजन्यवैश्यानां॥ श्रु
तेः। शूद्रस्य कुतो नाधिकार इत्यत्र हेतुः। ब्राह्मणराजन्यवैश्यानामेवाधा
नश्रुतेः। यतो ब्राह्मणादीनां त्रयाणामेवाधानं श्रूयते। न शूद्रस्य। तथा
हि वसंते ब्राह्मणोऽग्नीनादधीत ग्रीष्मे राजन्यः शरदि वैश्य इति। अतः शू
द्रस्याग्न्याधानश्रवणाभावादनग्निः शूद्रः। अनग्निस्याग्निसाध्ये कर्म
ण्यधिकाराभावः। नन्वनाहिताग्नेर्वाग्नेरनलब्धानादायकरिष्यति। मे
वं। आदधीत स्यात् मनेपहादाधातुरेवफलेन भवितव्यं। कर्मयोग्यताग्नी
नां तत्फलं। अतोऽन्येनाहिताः अन्यस्य कर्म न साधयंति। तेनान्याहितानाम

श्री
८

यत्कर्मैतत्साधयंतीति तेनाहितानामग्नीनामुपादानमयुक्तं। अतः शूद्र
स्याधानाश्रवणात्तदेकोपायत्वात्साध्यानामग्नीनामभावादग्निसाध्येषु कर्म
ण्यनधिकारः। अथ यथा ब्राह्मणराजन्यवैश्यानामेवोपनयनश्रुतेः। शूद्र
स्यानधिकारः। तथाहि वसंते ब्राह्मणमुपनयीत ग्रीष्मे राजन्यं शरदि वै
श्यमिति। उपनयनं चाध्ययनार्थं। अतोनुपनीतस्याध्ययनाभावादन
धीतवेदत्वादनधिकारः शूद्रस्यानतुमाभूदुपनयनं। अनुपनीतोपिप
ठिष्यतीत्येवं। शूद्रस्य वेदाक्षरश्रवणोच्चारणधारणेषु प्रायश्चित्तस्मर
णात्। श्रवणेत्रपुजतुभ्यां श्रोत्रपूरणं। उच्चारणे जिह्वाच्छेदः धारणे वश
रीरभेद इति। तथा। पद्युवाएतच्छ्मशानं यच्छूद्रस्तस्माच्छूद्रसमीपे नाध्येय
मिति शूद्रसमीपेप्यध्ययनं प्रतिषेध्यति। ननु नेहि आधावेति शूद्रस्यैतस्या
दीनां लिंगानां का गतिः। उच्यते। रथकारविषयाणि तानि रथकारस्यापि हि
कर्मस्वधिकारं वक्ष्यति। रथकारस्याधानमिति। एवं शूद्रसंबंधाच्छूद्रं व
क्ष्यते। तस्मात्तामहीशूद्र इति। अथ यथा ब्राह्मणो यजेत स्वर्गकामो यजेते त्ये
वमादिष्वविदं संदिह्यते किं ब्राह्मणः स्वर्गकामश्च पुरुषमेवाधिकृत्य यजेतेत्ये ८

8

षडुच्चरितः। तु नानि यमः स्त्रियं पुमांसं वेति। किं तावत्प्राप्तं पुंल्लिंगनिर्देशात्
पुरुषस्यैवाधिकारः। उक्तं॥ अत्र लिंगस्य प्रकृत्यर्थतया विवक्षितत्वात्। यथा
त्वहं संमा र्षीस्थित्र॥ अतः पुरुषस्यैवाधिकारो न स्त्रियाः। अद्रव्यत्वाच्चाय
तः स्त्री निर्धनात्मनः सा द्रव्यत्यागात्मकं कर्म कर्तुं कथं शक्नोति। द्रव्याभावा
त्। द्रव्याभावश्च भार्यापुत्रश्च दासः सश्चत्रय एवा धनाः स्मृताः। यत्ते
स्प ६ समधिगच्छन्ति यस्य ते तद्धनमिति स्मृतेः। तस्मात्पुरुषस्यैवाधिकार इ
ति प्राप्ते आह। स्त्री चाविशेषात्। स्त्री च अग्निहोत्रादिकर्मस्वधिकारिणी
भवति। उक्तं। अविशेषात्। यतः स्वर्गकामो ब्राह्मण इत्येतत्पुंल्लिंगं श्रूयमा
णमपि न विशेषकं। यत उद्दिश्यमानस्य विशेषणं। यः स्वर्गकामः स य
जेतेत्येवं। तेन विधिसंस्पर्शाभावाद् विवक्षितं। अतो न पुरुषस्यैवाधिकारः
किंतु स्त्रिया अपि। अत एवाविशेषादिति स्वर्गकामत्वाविशेषादित्यर्थः
तदुक्तं जैमिनिना। प.स्तो साहाविशेषादिति। ननूक्तं निर्धनत्वान्नाधिकार
इति। मैवं। धनवती हि सा। तस्या अपि कन्यादानादिना द्रव्यार्जनसंभवात्। पितृ
भ्रातृभर्त्रादिदत्तसंभवाच्च। पत्याः जि. तस्मात् भयसाधारणोऽस्य। धर्मे चार्थे च

श्री कामे च नास्ति चरितव्या। पाणिगृहीतेति हि सह त्वं कर्मसु तथा कर्मफलेषु। द्रव्य
८ परिगृहे पुंवेत्यादिस्मरणात्तेन नूनं यजेत समधिगच्छेन्नीत्यादिवं। नन्वेवमते
। स्मृतिप्रामाण्यान्निर्दुष्टं न याभवितव्यं। श्रुतिविशेषात् फलार्थित्वात्य प्रकृत्यं
। यदिस्मृतिमनुरुध्यमाना परवशान्निर्दुष्टं नाव स्यात्। यजेत्तेत्युक्तासती न
यजेत। तत्र स्मृत्या श्रुतिबाध्येत। नवैनं पुनः। तस्मात्फलार्थिनी सती स्मृतिम
प्रमाणीकृत्य द्रव्यं परिगृह्य यागं यजेत चेति। अतः स्मर्यमाणमपि निर्दु
ष्टत्वमन्याय्यमेव। श्रुतिविरोधात्। अतो निर्दुष्टत्वप्रतिपादकं वचनं अ
स्वातंत्र्यपरं व्याख्येयं। तस्मात्स्त्रियाश्चापि फलार्थित्वाविशेषात् दुष्टत्वाद्वा
धिकारो न वर्ति॥ दर्शनाच्च। दृश्यते वा यमयोर्वेदे पत्न्याः अपि कर्मस्वधि
क्रियत इति। सखलु यायजमानं दीक्षयति योक्त्रेण पत्नीमिति पत्नी लोह
इति पत्नी च गार्हपत्यमनूस्तीमिति च। अत्र योक्त्रादिविधिपरेषु वाक्येषु प
त्न्यापि अधिकर्मस्वधिकारदर्शनात्तस्याप्यधिक्रियत इत्युक्तं। अथवा वेदे
पत्न्या अपि धनवत्त्वादर्शनाच्च पत्न्यप्यधिक्रियते। तत्र याहि। भसदा पत्नीः
संयाजयन्ति भसदावाप्यपत्न्यो भसदाधाराणाः परगृहाणामैश्वर्यमपरं ध ८

नइति एवं पत्न्या अधिकारसिद्धेरिदं चिंत्यते। किं पत्नी पृथग्यजते। यजमा
नश्च पृथक्। उतौ संभूय यजेयातामिति। किं प्राप्तं पृथक् पृथगिति कु
तः। यजेतेत्यात्मनेपदस्य यागताया एकत्वसंख्याया उद्देश्यगतत्वाभावे
न विवक्षाया बाधयितुमशक्यत्वात्। अत एकैककर्तृकत्वसिद्धये यजमानेन
पत्न्या च पृथक् पृथक् यागः कर्तव्य इति पूर्वःपक्षः। सिद्धान्तस्तु न पृथग्यागः
कार्यः। कुतः। वैगुण्यप्रसंगात्। तद् दर्शपूर्णमासादौ आज्यस्य पत्न्यवेक्षणं यज
मानावेक्षणं चेत्युभयमाम्नातमस्ति। तत्र पृथक्प्रयोगे क्रियमाणे यजमान
कर्तृके यागे पत्न्यवेक्षणं लुप्येत। पत्नीकर्तृके च यजमानावेक्षणं। तस्माद्वै
गुण्यापत्तेः सहैव दंपती यजेयातां। ननु स्त्र्यागपि यजमानः पुमानस्वधीद्रव
त्वपरिक्रयेणाज्यावेक्षणार्थं पत्नीं संपादयिष्यति स्त्रीव यजमानं। नैवं। स्वामि
नः परिक्रयेणासंपत्तेः। न हि या काचित् स्त्री पत्नीशब्दवाच्या। यज्ञस्वामिनी हि
सा पत्नीत्युक्ते यज्ञसंयोग इति पाणिनिस्मरणात्। एवं यजमानशब्दमपि यज
ज्ञस्वामिन्येव स्मरंति। तस्मात् सहैव कर्तृत्वमुभयोः। न च यजेतेत्येकत्वं विरुद्धं।
आग्नीषोमो देवतेत्यत्र यथा व्यासक्तयोर्द्वयोर्देवतात्वाद्देवतैकत्वं तथात्रापि दंपत्योरेव.

श्रा १० मेव कर्तृत्वं दंपत्योरंगीकारात्। अनयोर्हि उद्वाहकाल एव द्रव्यसाधारण्यमुक्तं। ध
र्मे चार्थे च कामे च नातिचरितव्येत्यनेन। अतो यस्त्यागः स द्वन्द्वेनैव संसृष्टयो
रेव दंपत्योः। न हि साधारणमेकेन त्यक्तुं शक्यते। भिन्नयोरपि दंपत्योऽसंसृ
ष्टद्रव्ययोः पृथक्स्वत्वं नाङ्गीकर्तुमप्रभवतोरेकमेव स्वातंत्र्यलक्षणं कर्तृत्वं
10 । ननु संनिविष्टकर्तृभेदे दर्शितयुक्तमेकवचनं। सत्रिणां हि पृथग्द्रव्यतया पृथ
क६ गेव कर्तृशक्तिर्वाचनिकानेककर्तृत्वसिध्यर्थं कर्तृणां तु साहित्यं इह तु सहै
ककर्तृत्वमिति विशेषः॥ ननु साधारणमपि धनं विभज्य पृथक्त्यागः संभव
त्येव। यतस्तयोर्विभागः प्रतिषिद्धो न भर्त्रा सह विभजेदिति। तस्मान्न वि
भज्य त्यागः। अतो द्रव्यसाधारण्याद्धि भागप्रतिषेधाद्धर्मे चार्थे च कामे च
नातिचरितव्येतिवचनात्पृथक्त्वयोगे प्रागुक्तवैगुण्यापत्तेश्च स्वामिभ्यां
समुच्चिताभ्यामपेक्षितत्वात्स्वस्य कर्मांगत्वाच्च न पृथक्कर्तृत्वं किं तु सहैव।
एवं च यजमानविहृतयैव पत्न्या अपि कार्यसिद्धेर्नाविहृतया तस्या अधि
कारभंगः। अत एव सत्रकारो तुवरी वा फलाधिकाराद्दितरासामिति पत्न्या
अपि फलं दर्शयति। अतिरपि दिवि स्योनि रजरमारनेतामिति। तथा च स्मृ १०

ति॥ नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणं। भर्तृशुश्रूषयति भर्त्तारं तेन
स्वर्गे महीयत इति। एवं दंपत्योः सहाधिकारे तुल्यफलत्वसिद्धेः इदं चिंत्य
ते। किं सर्वे याजमानं पत्न्या अपि कर्त्तव्यम् उत यावदुक्तमाशीर्ब्रह्मचर्यादि
कमिति। किं प्राप्तं। तस्या अपि यजमानत्वेन तुल्यत्वात् सर्वं याजमानं तयापि
कर्त्तव्यमित्येवं प्राप्ते ब्रूमः॥ अत्र जैमिनिसूत्रं। तस्या यावदुक्तमाशीर्ब्रह्म
चर्यमतुल्यत्वादिति। तस्या यावदुक्तं स्यात्। कुतः। अतुल्यत्वात्। यजमान
स्तु पुमान् विद्वांश्च पत्नी च स्त्री चाविद्या च। अतः क्रत्वर्थेष्वपि यानि यजमा
नग्रहणानि। तत्र यथा यजमानो वेदं बध्नाति पात्राण्यासादयति शुक्रम
न्वारभेतेत्यादीनि तत्र यजमानस्योपादेयत्वादेकवचनं विवक्षितं।
अतस्तत्र न पत्न्याः कर्तृत्वमेव पत्न्याऽयमवेक्ष्यतेऽह स्मेन रुद्र इत्येनम
वेक्षते पत्नीत्यादौ पत्न्या एव कर्तृत्वं न यजमानस्य। उक्तादेव हेतोः। यानि
च क्रत्वर्थानि समंत्रकाणि तेष्वविद्वत्त्वात्पत्नी न स्यात्। स्त्रीणामध्ययनप्र
तिषेधात् सा मंत्रोच्चारणं कर्तुं न शक्नोति। अन्यथानुपपन्नत्वात्। तस्या अध्य
ध्ययनं कथमपि तु न शक्यते संपन्नविद्येन पुंसा तेषामनुष्ठानसिद्धेः॥ यद्धि क्रत्व

श्री ११ र्थेन देवेन येन केनचित्कर्तव्यं। अतो नुपपत्तेः क्षीणत्वात्प्रतिषिद्धस्य पत्या
अध्ययनस्य पुनः प्रसवेन विधिः विस्रमाणमस्ति। तस्मात्तदपि पत्न्या न कर्तव्यं।
याज्याशिषो पस्थ ब्रह्मचर्यं तत्पुरुषं प्रति गुणत्वं तेन तत्रान्यतरेण तत्तेसिध्यति
अन्यतरस्य संस्कारो हि येनात न च तत्राय यजमानस्योपादेयत्वेन प्राधान्यात् तस्माद्धि
गमप्यविवक्षितं अत आशीर्ब्रह्मचर्यमुभयोः आशीः शब्देनात्र संस्कारलक्षं
ते। तत्राशनाधः शयनयावनाव्यंजनाभ्यंजनादयः। ते युभयोर्भवंति। संस्कारे
व षपि पत्न्याः स्यात् वपनं तन्न भवति। कुतः वपनविधौ केशश्मश्रुवपन इति समाहारद्वंद्वो
नन यं। तत्र केशश्मश्रुणोरितरेतरयोगसन्निहितत्वात्तद्वपनं न संभवति। न च पत्न्या
स्तयोः साहित्यमस्ति। श्मश्रुभावात्। अत स्तस्या वपनभावः स्यादिति तन्त्ररत्ने।
ब्रह्मचर्यग्रहणं कामानालक्षणार्थं। ब्रह्मचर्यस्याशीर्ग्रहणेनैवाक्षिप्तत्वात्।
कामा अपि पत्न्या भवंति तदभावे धिकारानुपपत्तेः। येप्यमंत्रकाः कर्मविशेषास्ते पि य
जमानस्य एव कर्तव्या विद्वत्वात्तस्य तेन तासां। अतः सर्वसमंत्रकममंत्रकं च याजमानं य
जमानेनैव कर्तव्यं। आह त्वविहितत्वाद्याच्येक्षणादि पत्न्या कर्तव्यं नान्यत्। तदेवमं
गहीनादिवर्जितानां ब्राह्मणक्षत्रियवैश्यानां पत्नीसहितानामग्निहोत्रादिकर्मे ११

स्वधिकार उक्तः। अथ रथकारस्याधिकारमाह रथकारस्याधाने। रथकारस्याधाने

अग्न्याधेयकर्मणि अधिकारो भवति। वर्षासु रथकार आदधीतेति श्रुतेः। अत्रेदं सं

दिह्यते किं त्रैवर्णिकानामन्यतमो रथकरणयोगाद्रथकारः। आहोस्विन्नियतं किंचि

ज्जात्यन्तरमिति। किं तावत्प्राप्तं त्रैवर्णिकानामन्यतम एवेति। कुतः। सोपि हि रथं करोतीति

योगाद्रथकार इत्युच्यते। तस्य च त्रैवर्णिकत्वादाधानं प्राप्तमेव। ऋतुमात्रं विधेयं। तथा स

त्येकार्थविधानाद्वाक्यभेदो न भवति। लाघवं च। जात्यन्तरपक्षे तु तस्याधानं विधातव्यमृतु

संबंधश्च। तथा सति वर्षास्वादधीत रथकार आदधीतेत्येवं वाक्यभेदः स्यात्। अपि तु रथ

द्रव्यसमर्थत्वात्प्रतिषिद्धः तस्मात्त्रैवर्णिकानामन्यतम एवेति पूर्वपक्षः। सिद्धान्तमाह नि

पक्ष यतं वा। वा वार्थे वा शब्दः पूर्वपक्षनिरासार्थः। त्रैवर्णिको रथकारः। तस्य शिल्पोपजीवनस्य

प्रतिषिद्धत्वात्। किं तु नियतं जात्यन्तरमेव। तत्र केचिदेवमाहुः। वैश्यायां क्षत्रियादुत्प

न्नो माहिष्यः। शूद्रायां वैश्यादुत्पन्ना करणी। तस्यां करण्यां माहिष्यादुत्पन्नो रथका

र इति। तदुक्तं स्मृतौ। वे माहिष्योग्रौ प्रजायेते विट्शूद्राङ्गनयोर्नृपात्। शूद्रायां करणी वै

श्यादिति। याज्ञवल्क्योपि। वैश्याशूद्र्योस्तु राजन्यान्माहिष्योग्रौ सुतौ स्मृतौ। वैश्यात्तु क

रणः शूद्रायां विन्नास्वेष विधिः स्मृतः। विन्नासु विधिना परिणीतासु। तथा माहिष्ये

श्री
१२
णोक्तः रथकारः प्रजायत इति। अतो रथकारशब्दस्य विधसंकरजातौ रू-
ढः। रूढिश्च योगाद्बलीयसीति न्यायात् रथकारेति योगं बाधित्वा जात्यन्तरमेव र-
थकारशब्देनोच्यते। तस्य हि आधाने कालविशिष्टं विधीयते। विशिष्टविधानाच्च
वाक्यभेदोऽपि न भवति। अपरे त्वाहुः। रथकारशब्देनात्र सौधन्वनानां ग्रहणं ऋ-
भूणां तेषामाधानं मन्त्रवर्णात्। सौधन्वना ऋभवः। सौधन्वना ऋभव इति समाना-
धिकरण्यनिर्देशात्। तथा चाह मनुः। व्रात्यात्तु जायते वैश्यात् सुधन्वाचार्य एव च
। कारुषश्च विजन्मा च मैत्रः सात्वत एव चेति। अतो मनूक्तो यः सुधन्वा व्रात्यवैश्यपु-
त्रः तत्सुतानां सौधन्वनानामृभूणामेवात्राधिकारः। यत्तु याज्ञवल्क्येनोक्तं। न तस्याधि-
कारः सत्यपि रथकारशब्दवाच्यत्वे मन्त्रवर्णोक्तन्यायेन सौधन्वनानामेवाधिकार इ-
ति। तथा च जैमिनिः। सौधन्वनास्तु हीनत्वान्मन्त्रवर्णात्प्रतीयेरन्निति। सौधन्वना ना-
म जातिः। सौधन्वनानाम जातिः। हीनास्ते केचित्त्रैवर्णिकेभ्यो जात्यन्तरं। न च तेषु शूद्रान
वैश्यान् क्षत्रियान् ब्राह्मणोऽयमिति तेषामिह आधाने। कथं प्रसिद्धं मन्त्रवर्णोऽत्र। मन्त्रव-
र्णोऽपि भवति सौधन्वना ऋभव इति। ऋभूणां त्वेति च रथकारस्याधाने मन्त्रः। तस्मा-
त्सौधन्वना ऋभवश्च रथकाराः। अपि च तेमिमनयोयथेतिव। ये नेमिं नमन्ति तेष १२

भवईस्युच्यंते। रथकारांश्चू[illegible]नेमिं नमेति। तस्मात् त्रैवर्णिकानामशूद्राणामेतदाधान
मिति शाबरस्वामिनः। ननु विद्याभावेन सौधन्वनानामसमर्थतया नाधिकारः त्रैवर्णि
का एवावयववृत्त्या रथकारशब्देनोक्ता इति न गृह्यन्ते सोऽपि हि रथकारो भवति। तस्य
चाधा[illegible]नं प्राप्तमेवानूद्यत ऋतुमात्रविधानात् त्वाद्यं भवति। जात्यंतरे तु विशिष्टविधा
नाद्देखं स्यादित्याशंकायामुक्तमाह नाभावादिति वाक्यः। वाक्यज्ञपिरित्यादिना त्रैवर्णि
कोऽरथकारः कुतः अभावात्। त्रैवर्णिकस्य रथकारस्याभावात्। कथमभावः। यौगिकोऽयं
शब्दो रथं करोतीति रथकार इति तेन यावत्कालं रथकरणं संबध्यते तावत्कालं रथकार
इत्युच्यते न तु सर्वदा। अतस्त्रैवर्णिकस्य रथकारस्याभावाद् द्विधा[illegible]हि तस्यापि त्वमु
सौधन्वनसात्वतापरपर्यायस्य जात्यंतरस्य रूढ्यावगतस्य वचनादाधानेऽधिकारो
भवति। अत एव पार्थसारथिमिश्रा आहुः रथकारस्यैव त्वमु सौधन्वनसात्वताद्यपरना
मधेयस्याधानांतरं वर्षासु विधीयते वचनात्। नहि वचनस्य किंचिद् दुःशक्यमस्ति। ते
न तावत् श्रुतिबलेन योगं बाधित्वा सौधन्वनानामाधाने विहिते तत्कुले नैव यथा कथं
चित् तन्मात्रोपयिकं विद्यार्जनमपि विनोपनयनं साक्षिप्यते। स्वाध्यायविधिविहिताध्य
यनांगत्वादुपनयनं स्वरथकारस्य तदभावाद् आधानविधिनैव विद्यार्जनमाक्षिप्यते

श्री। नत्वास्याधानसंभवेपिक्रत्वधिकारःसंभवति। विद्याभावात्। आधानविधिस्तुनाव
१३ न्मात्रोपक्षीणत्वान्नक्रतुष्वधिकारंकल्पयितुमर्हति। तेनप्रधानकर्मैवनस्या
धानेविश्वजिदादिवत्कल्पयितुंनवास्याहवनीयाद्युत्पादकत्वंअर्थकर्मत्वेना
ग्निसंस्कारत्वाभावात्। किंभित्तिपुनःसंस्कारार्थत्वेनसंभवति। क्रत्वधिकाराभावे
नाग्नीनामनुपयोगित्वेनसंस्कारानर्हत्वात्। तस्मादाधानंप्रधानकर्मरथकारस्य
विधीयतइति। रथकारस्याधानइत्येवमादीनांसूत्राणामपराव्याख्या रथका
रस्याधानेधिकारोभवतिनत्वग्न्याहितत्वादिषुमं। रथकारशब्दस्तुजात्यंतरएवरूढ
ः। अतोयौगिकार्थांवैचनास्ति। अतःप्रकारान्तरेणव्याख्यानंक्रियते। रथकारस्यवि
माधानमात्रेधिकारउतनैवार्ष्णिकवत्सर्वकर्मस्वपीति। तत्रवर्षासुरथकारस्यादधी
तेतिश्रवणादाधानमात्रेधिकारइतिप्राप्ते आह नियतंचातस्यरथकारस्यनित्य
तेनित्यंकर्माग्निहोत्रदर्शपूर्णमासादिकंभवति। चकारात्काम्यंनैमित्तिकंच। कुतः
स्य आधानश्रवणात्। आधानेहितन्त्रश्रुतं। तच्चगार्हपत्याद्यग्नीनामुत्पादकं। अ
ग्नयश्चकर्मार्थमेवोत्पाद्यंते। स्वतोपुरुषार्थत्वात्। अतःकर्मार्थान्युत्पादकाधान
विधानादेवैवमवसीयतेयदस्यसर्वकर्मस्वधिकारोभवतीति। एवंप्राप्तेआह।।

नाभावादिति वाच्यम्। रथकारस्य सर्वकर्मस्वधिकारो भवतीति युक्तं। तदुक्तं।

कुतः अभावात्। रथकारस्योपरितन कर्मसु लिंगाभावादिति वाच्यम्। आचार्य आ

हाप्यनेन रथकारस्य कर्मसु लिंगानि न सन्ति। त्रैवर्णिकानां तु आधाने श्रुतौ कर्मसु

लिंगानि च सन्ति। एहीति ब्राह्मणस्यागह्याद्रवेति वैश्यस्याद्रव राजन्यबंधो धावेति तथा

पयोव्रतं ब्राह्मणस्य यवागू राजन्यस्यामिक्षा वैश्यस्येति। एवमिदं रथकारस्येत्ये

वं कुत्रापि कर्मणो लिंगं नास्ति। तेनास्योत्तरकर्मस्वनाधिकारो वचनाच्चाधानमात्रे भ

वतीति गम्यते। एवम्प्राप्ते इदमेव सत्यं पुनः पठित्वा परिहारत्वेन व्याख्यायते लिंगा

भावादनधिकारो रथकारस्य कर्मस्विति यदुक्तं तन्न। कुतः अभावात्। लिंगाभाव

स्यैवाभावात्। लिंगसद्भावादित्यर्थः। कानि पुनस्तानि लिंगानि येन रथकारस्यापि

कर्मस्वधिकारो वसीयते। उच्यते आधावेति शूद्रस्य अग्नीवद घृतः शूद्रस्य मनु

शूद्रस्येति। शूद्रासंबंधाद्रथकारेऽप्यशूद्रशब्देनाभिधीयते तस्याहि मातामही शू

द्रेति। एवं तु थवर्णस्य मुख्यशूद्रस्य तु प्रतिषेधश्रुतेः। शूद्रवर्जमिति। तेनैतानि गौणशू

द्रविषयाणीति। रथकारस्याधानमात्रेऽधिकारपक्षे एतानि लिंगानि निर्विषया

ण्येव स्युः। तस्माद्रथकारस्योत्तरकर्मस्वधिकार इति सिद्धं। तत्र याज्ञवल्क्यः।

श्रा:
१४

स्मृतिविहितो मिताक्षरायां विज्ञानेश्वरे[ण] । क्षत्रियेण वैश्यायामुत्पादितो माहि-
ष्यः । वैश्यायां शूद्रायामुत्पादिता करणी । तस्यां माहिष्येणोत्पादितो रथकारो नाम जा-
त्या भवति । तस्य चोपनयनादि सर्वं कार्यं वचनानाय याह शंखः । क्षत्रियवैश्या-
नुलोमानन्तरोत्पन्नजो रथकारस्तस्याध्ययनेज्या दानोपनयनसंस्कारक्रि-
याश्चाप्रतिषिद्धा रथसूत्रं वास्तुविद्याध्ययनवृत्तिता चेति रथसूत्रं रथविद्ये-
ति मंजर्यां व्याख्यातं । तत्र तु संस्कारक्रियाश्चाप्रतिषिद्धा रथसूत्रेत्येव पाठः । म-
र तो याज्ञवल्क्योक्त एवं रथकारो न ग्रहीतुं न्याय्यः । तस्य च शंखोक्तयज्ञादिकर्मस्व-
धिकारः । तथा सति आधावेतिमूहस्येत्यादीनि वेदवाक्यानि सार्थकानि भवन्ति ।
मनूक्तव्रात्यवैजात्यसुधन्वनपुत्रसौधन्वनानुपर्यायरथकारेण तु तं माणेनेषां वै-
यर्थ्यमेव स्यात् न तु न वक्तदिष्यते । तस्माद्याज्ञवल्क्योक्तमेव युक्तं । मत्रितिसमनन्तरा-
दिति आपस्तंबसूत्रेनुवर्णीरथकारस्यापेक्षया णां वर्णानामेतत्कर्ममुक्तिं वामे रथका-
रइति । त्रयाणां वर्णानामं तर्भेतायेरथकरणां कुर्वीतेति रथकारः इति तद्व्याख्या-
भ तारः । तथा ग्रीष्मे वर्षा शरत्सु क्षत्रियवैश्योपक्रमे प्रादत्ता सूत्रपतनस्य व्या-
ख्यायामुपक्रमे रथकारो वैश्यस्त्रत्कर्मोपजीवी तु पक्रमे निषादस्तु पति १४

इति नारायणः ।

गावेधुकेऽधिकृतः। निषादस्थपतिर्गावेधुके चरावधिकृतोऽधिकारी भवति। ए
तेहि श्रूयते। यस्य रुद्रः प्रजाः शमयेत्स वास्तुमध्ये रौद्रं गावेधुकं चरुं निर्वपेदिति
एतामिष्टिं प्रक्रम्य श्रूयते। एतया निषादस्थपतिं याजयेदिति निषादं पतिं यजेते स्थ
त्यर्थः। तत्रायं संदेहः। किमयं षष्ठीसमासः। निषादानां स्थपतिः निषादस्थपति
रिति निषादस्यासौ स्थपतिश्च निषादस्थपतिरिति कर्मधारयो वा। तत्र यदि षष्ठी
समासस्तदा यो द्विजातिरेव विद्वान् निषादानामाधिपत्यं करोति। तस्यात्राधिका
रः। यदि च कर्मधारयस्तदा निषाद एव यः स्थपतिस्तस्यात्राधिकार इति। तत्र त्रै
वर्णिकस्यैव समर्थत्वाद्विद्वत्त्वाहिताग्नित्वाच्चात्राधिकारो युज्यते। अन्यजातीय
स्य निषादस्यावैद्यत्वेनानग्निमत्त्वेन चासमर्थत्वात्। तस्मात्षष्ठीसमास एवाय
मिति पूर्वः पक्षः। सिद्धान्तस्तु कर्मधारयोयं निषादश्चासौ स्थपतिश्चेति। कुतः। ष
ष्ठीसमासपक्षे निषादपदे लक्षणा प्रसज्येत। नह्यत्र षष्ठी श्रूयते यतः संबंधः प्र
तीयते। अतो निषादपदे नैव षष्ठ्यर्थो लक्षणीयः। इतरस्मिंस्तु पक्षे द्वयोरपि प
दयोर्मुख्यार्थतैव न लक्षणा। तस्मान्निषाद एव स्थपतिरत्राधिकारी। अविद्व
त्त्वादविद्वाननग्निमानपीति सिद्धं। अपि चात्र निषादद्रव्यं दक्षिणा श्रूयते। कू

श्री टं दक्षिणाग्नौ वा गार्हपत्ये भवतीति कूटं हि निपादानामेवोपकारकं नार्याणां इति
१५ वावकी। स्मिन्नेव गार्हपत्ये भवत्या यो ब्रह्मचारी समित्पाणिं गच्छति सो वैवकी लौकिकस्यावकीस्मि
न; सर्वत्र ब्रह्मचर्यस्य गार्हपत्ये भवत्या गार्हपत्ये भवेन्नेज्या याणो गार्हपत्ये भवत्यापाद्यपि नार्था
भवति। वाह्याणे विकल्पार्थः तेन गार्हपत्य मपि प्राप्ययश्चि तांतरं। आज्याहुतिहुय
स्य वं विकल्पेन भवति। अथापरमाज्याहुतौ जुहोतीत्क मावकी लौकिकाग्नौ स्मार्त्तवैदिकं
। शास्त्रं तरेतु भयस्य विकल्पेन आतस्वात्। अत्रैतन्नहि वार्यते। विं स्तु पत्नी छि रेव की लौकि
पक्षु श्वे तद्वयमाधानसंस्कृते ग्राहवनीयादिषु भवति उत लौकिके इति। तत्रप
वृत्तित आहवनीयादि प्राप्तेः आहवनीयादीनामाधानत्निष्पाद्यत्वा कृतेरवकी स्य
स्मिन्नग्न्याधानविध्यभावे पिइ ष्टिप शू आधानं प्रयोजयतः। अत एवा न दर्या
मेवाधानेनाहवनीयादीनुत्पादयेत्तेत्प्रयोजनं तदर्श्यं। इति प्राप्ते आह लौ
किके। तेनेति तु पत्नी स्यावकी स्मिं पश्चात्लौकिकेग्नौ भवतः। तुतः नहीमाविष्टिप
शुस्त्वाधानं प्रयोजयतः। आम्र्याहितदेव गृह्यसेयद्दर्शपूर्णमासांगं भवति। नन
चाधानं दर्शपूर्णमासांगं। त्वेकालेहि पुरुषसंस्कारक त्वेन तत्तद्धि हितमिति। अतो
लौकिकाग्नावेवैतावनुष्ठेयौ। लौकिक भवगार्हपत्यस्थानेऽद्यापपादितानत आ १५

हवनीयादिस्थाने पुविहृत्य स्थपतीष्ट्यवकास्मिन् पशुदर्शपूर्णमासपशु
वत्कर्तव्यो। अग्निविशेषविधानार्थमाह भस्मौ पशुपुरोडाशश्रपणं। अस्माव
कास्मिन्नेगार्हे भपशुयागे पशुपुरोडाशस्य श्रपणं भस्मावेव कर्तव्यं न तु चुल्
प लेषु अवदानसोमः। अवदानानां हृदयजिह्वाक्रोडादीनां होमोऽस्तु दवे
पुनर्वह्निनाग्नौ वन्द्वनौ तु। अवदानग्रहणं तु। अन्यदाघारस्य भागहोमादि
मग्नावेव कार्यं शिष्टास्याशित्राववदानं गहनस्य शिष्टास्याशित्रावदानं का
र्यो। वनानानां जोहवे सोहृद्यादिभ्यस्तु मोऽधिकारः। अथाग्निप्रस्तावादाह
वनीयाद्यग्निष्वपि किं कर्म कर्तव्यमित्यपेक्षायामाह वैतानिकेषु सर्वदा सर्वा
र्थत्वात्। वितानिका विनानाहीं विहारयोरग्न्योर्गार्हपत्याहवनीययोः। तेषु वैतानिके
ष्वग्निषु सर्वं कर्म श्रौतं स्मार्तं च कर्तव्यं। श्रौतं च हविःश्रपणहोमादिकं स्मा
र्तं वषपक्षादि नित्यपाकयज्ञादिकं। कुतः। सर्वार्थत्वात्। यतो गार्हपत्याहवनीयावै
तानिकौ सर्वार्थौ। कुतः। यद्धि द्रव्यमुत्पत्तिकाले यदर्थेनासंयुक्तमुत्प
द्यते। तस्य सर्वार्थता वसीयते। कुतः। सामर्थ्यात्। समर्थौ हि गार्हपत्याहवनीयौ स
र्वकर्म साधयितुं आधाने नोत्पादितानामग्नीनां प्रयोजनापेक्षायां सामर्थ्येन

श्री
१६

16

त्वग्निकार्यार्थता विज्ञायते। तस्माच्छ्रौतं स्मार्त्तं च यज्ञ सत्रोमं स्मस्तु गं च
पाकादिकं सर्वं गार्हपत्यादिषु वैतानिकेषु भवतीति दर्शनाच्चाददृश्यते
वायमर्थो ये स्मार्त्तमपि होम पाकादिकं वैतानिकेषु क्रियत इति दक्षिणाग्निं
प्रचुत्यश्रूयते मांसं तत्र न पचेयुरिति। अत एव प्रतिषेधात् स्मार्त्तरनुमीयते। प्र
तिषेधस्य प्राप्तिपूर्वकत्वात्। न च श्रौतो मांसपाको दक्षिणाग्नौ विहितोऽस्ति त
स्यैष प्रतिषेधः स्यात्। यतः शामित्रेऽग्नौ विहितः। अस्ति तु विहितप्रतिषिद्धः
स्मार्त्तो मांसपाकः। तस्यायं प्रतिषेधो विज्ञायते। स्मर्यते च पिदर्शश्राद्धं प्रचुरस्या
ग्नौ करणार्थमग्निमाह मार्कण्डेयः। आहिताग्निस्तु जुहुयाद् दक्षिणाग्नौ समा
हितः। अनाहिताग्निश्चौपासने अन्यभावे तथाप्सु वेति। शंखलिखितौ च। धूपं
गन्धमाल्योरत्नं चूर्णप्राशनं दानसघातमन्नमनुप्राश्य दर्भेषु दक्षिणाग्निं परिस्त्री।
र्यजुहुयादग्नये कव्यवाहनायेत्यादि। वायुपुराणे च। आहस्वदक्षिणाग्निं तु
होमार्थं वै प्रयच्छत इति। अतो स्मादर्शनात् स्मार्त्तमपि वैतानिकेषु कर्त्तव्यमि
ति पूर्वः पक्षः सिद्धान्तमाह नौ यासनश्रुतेः अह्नं वैतानिकेषु ग्निषु श्रौत
स्मार्त्तं चकर्त्तव्यमिति तन्नावुक्तः। औपासनश्रुतेः। यतः आहिताग्नेरपि औपा १६

सनं श्रूयते पितृमेधे। अद्वारेणोपासनं निरस्यतीति यदि स्मार्त्तमपि वैतानिके
ष्वेव क्रियेत। तद्धा आहिताग्नेः पितृमेधे औपासनदर्शनं न स्यात्। अग्निवान
स्मान्स्मार्त्तान्यौपासने कर्त्तव्यानीति। तथा च स्मृतिः। कर्म स्मार्त्तं विवाहाग्नौ कुर्वी
त प्रत्यहं गृही। दायकालाहृते वापि श्रौतं वैतानिकाग्निषु इति। तस्मिन्न संस्था ला गृ
त्पापातं ब्रुस्मरणाद्गृह्यपरिहितेन गृह्यं गृह्णाति अवदं पत्यो वर्त्तते। तस्मिन्नित्या
वसथ्ये। अत एव यत्किंचिद्गृह्यस्याहिं नं कर्म शान्तिकपौष्टिकव्रतं गृहोमादि द्विकं
ल स्मार्त्तं सर्वमावसथ्ये गतो भवतीति। अत एवाह कात्यायनः। तत्रैवाग्नावन्यहोमः
। तथा बृहद्दिगृह्यसूत्रकारिकायां होमानात्मार्थपत्न्यर्थं हन्तु पासने
नयोपरार्थानेव देशेऽग्नौ स चान्ते लौकिको भवेत् स्यात्सर्वकासमिदाहुतिः। स्वग
र्भसंक्रियायार्थाश्च यावन्नाग्नौ प्रजायते। आग्निसुनामधेयादौ होमे सर्वत्र लौ
किकः। नहि पित्रा समानीतः पुत्रस्य भवति क्वचित्। अत एव सीमन्तोन्नयनम
पि स्मार्त्ताग्नावेव कार्यं। अपि वा आधाने तोस्याहिताग्नां गार्हपत्यादीनामग्नी
नां प्रयोजनापेक्षायां सत्यां गार्हपत्ये हवींषि श्रपयत्याहवनीये जुहोति। दक्षि
णाग्नावन्वाहार्यं पचतीति प्रत्यक्षवचननिर्दिष्टैरेव प्रयोजनैर्निराकांक्षत्वान्न

श्रौ सामर्थ्यमात्रेणोत्कारुन्यत्र विनियोगः कल्प्येपितुं शक्यते। ननु सामर्थ्यमा
१७ त्रेण विनियोगः वाक्येनैवस्मार्तेष्वपि पार्वणस्थालीपाकादिहोमेषु भवबलि
निषेन्नो। न च स्मार्त होमास्तेषु विधातुं शक्याः। ते हि सहैवाचारेणावसथ्ये नो
त्पाद्यन्ते यथाहोमाद्यः। अत्राह जैमिनिः। सति चोपासनस्य दर्शनादिति। सति
न विहारे उपासनोग्निर्दृश्यते। यः कामयेत राष्ट्रमस्यै प्रजायेस्यादिति तस्यो
पासने प्रतिहितमभ्याजुहुयादिति। राजसूये पश्चात्ते कर्मण्येतद्दर्शनं। तस्मिंश्च
17 काले विहारो हि यस्य विहार एव स्मार्तान्यपि कर्माणि स्युः तदाकार्याभावा
द्यौपासनदर्शनं न स्यात्। अपि चात स्मात्स्मार्तानि उपासन एव कार्याणि। य
द्येवं हि मांसपाक प्रतिषेधस्यानुपपत्तिरित्यत आह अधिश्रयणीयेमाद्
स प्रतिषेधः। यदेष उक्तो मांसपाक प्रतिषेधो मांसमत्र नैव पचेयुरिति सोधिश्र
यणीयेहनि [illegible]यः। नवगृहे यदावासः क्रियते तदा तस्मिन्नेवाहनि तद्दक्षि
णाग्नेराहरणं कार्यं नाहवनीयवत्प्रणीते होममिति विकल्पं वक्ष्यति। नवावसिते वै
ति। श्रूयते च। नवावसिते वैनमाहरेयुरिति। तदा च तस्मिन्नवगृहाहृते दक्षि
णाग्नौ अविशेषेण भोजनार्हस्यानियतद्रव्यस्य पाको विहितोस्ति। तस्मिन्न वेषु १८

स्त द्रव्यत्यागो अग्नौ युरिति। तत्र कदाचिन्मांससंपत्तौ तस्यापि पाकः स्तत्र मांसमोति
तस्यैव प्रयतिषेधो मांसं तत्र न पचेयुरिति। तथा चाह सूत्रकारः। तस्मिन्नपचेयुर
मर्ठ्ठ· समिधि प्रक्षांतरमपि दुग्धाधिश्रयणरूपं एतस्य विद्यते। यद्यन्तर्वेदि घृत
चेदपि गोरेवदुग्धमधिश्रपितव्यं ब्रूयादिति। तेनाधिश्रयणसंबंधि ग्रहः अ
धि धिश्रयणीयं। तस्मिन्नाधिश्रयणीयेइति अनेन घगृहसंबंधि दक्षिणाग्न्याह
रणादि नेलक्ष्यते। अतः श्रौतान्येवैतानि केवलाहपत्याद्विधुकर्त्तव्यानि स्मा
र्त्तानि त्वावसथ्येग्नावेवेति सिद्धं। पतनुस्मृतौ। दाक्षिणाग्न्यावग्नौकरणहोममनुक्रः
।ससर्वाधानपक्षे। अर्द्धाधानपक्षे त्वावसथ्याग्नावेवेति तत्रैव निर्णीतमस्ति
कर्मणां फलवत्वात्। पूर्वकं तेषाधिकारो निरूपितः। अधुना तस्यैव सांग
स्य फलवतः कर्मणो निरूपणायाह १ यज्ञं व्याख्यास्यामः। यज्ञो यागो यजन
मिष्टिरिति पर्यायाः। यज्ञं यागं व्याख्यास्यामः। यागस्वरूपं कथयिष्यामः। तमे
वाह २ द्रव्यं देवता त्यागः। द्रव्यं देवतात्यागोयम्स्नेः द्रव्यं पुरोडाशचरुसांनाय्य
पयः सोमादिकं देवता अग्निसोमेंद्रविष्ण्वादि त्यागो ममायं न हिन चतुर्थीमंत्रवर्णा
न्यतम बोध्यानत्याग्न्यादिकां देवतामुद्दिश्यपयोद्रव्यस्य पुरोडाशादेस्त्यागस्तु-सर्गः

श्री
१८

स यज्ञः स याग इत्यर्थः । तथा चोक्तं । तद्धितेन चतुर्थ्या वा मंत्रवर्णेन चेष्यते । देव-
तासंगतिस्तत्र दुर्बलं तु परं परमिति । तत्र तद्धितेन देवतासंगतिर्यथाग्नेयोऽष्टाक-
पालः । अग्नीषोमीयं पशुमाजोग्नीषोमीयः पुरोडाशः ऐंद्राग्नः पुरोडाशः ऐंद्रं द-
धि ऐंद्रं पयोग्नीषोमीयं पशुमालभेतेत्यादौ च चतुर्थ्या देवतासंगतिः यथा अग्नये-
ऽनीकवतेष्टाकपालं अथ मरुद्भ्यः सांतपनेभ्यो अथ मरुद्भ्यो गृहमेधिभ्य इत्यादौ
मंत्रवर्णेन देवतासंगतिर्यथाउनराघारे । यथा च प्रयाजेषु ह्वविस्पष्टकरणाद्वि देव-
तासंबंधोऽपि भवति तद्धितादीनामभावेऽपि यथोलूखलमुसलइत्यत्र कर्म चार्याणां ।
अत एवोच्यते यास्केन । तद्धितादिषु देवतामंत्रासिषु देवतोपपरीक्षा यद्देवतस्य यज्ञो
भ वा यज्ञांगं वा न देवतानां त्यागश्लिष्टे तेन तस्मिन् देवतोद्देशेन द्रव्यत्यागो यागः स एव प्रक्षे-
पाधिको होम इति । अयं यागस्त्वावद् द्विकं प्रमाणहृदयमाह तद्देशमित्यं समभिव्याहा-
रप्रकरणाभ्यां । पूर्वं सन्नेनिरूपिता प्रधानभूताद्यज्ञाद्देवतोद्देशेन द्रव्यत्याग-
त्मकादितरदन्यदपूर्वहरणगम्यत्वात्प्रधानमुपकरणमतः गृहणादिकं । तत्सर्वं तद-
गं तस्य पूर्वं सन्नोक्तस्य देवतोद्देशेन द्रव्यत्यागात्मकस्यार्थतः प्रधानभूतस्य या-
गस्यांगेत्युपकारकं भवति । धर्मः शेषांगं गुण इत्येकार्थाः । कुतः । कारणाद्देगं भव १८

18

तील्यपेक्षायामाह। समभिव्याहारप्रकरणाभ्यां संशब्दो योग्यतासंनिधिवाच
कः। अभीत्याकांक्षार्थः। तेनायमर्थः। समितियोग्यतासंनिधिमतां अभीत्या
प कांक्षावतां शब्दानां व्याहार उच्चारणं समभिव्याहारो वाक्यं तस्माद्वाक्यात्। प्रकर
णाच्चेत्यर्थः। तत्र वाक्यस्य तावदुदाहरणं। पौर्णमासेनेष्ट्वा यविमृधेनु निर्वप
तीति। प्रकरणपाठाद्धि मृधस्यामयांगत्वे प्राप्ते वाक्यात्पौर्णमासांगता भवति
। अत्र शेषशेषिणोः साध्यसाधनभावो न श्रूयते। पदद्वयसमभिव्याहारा
देव योग्यत्वमालोच्य शेषशेषित्वं कल्प्यते यथा स्वर्गकामो यजेतेति तत्र वाक्ये
न विनियोग इति। न त्वत्र स्वर्गस्य साध्यत्वं यागस्य वा साधनत्वं केनचिदुपात्तं
। अतः पदद्वयसमभिव्याहारादेव कल्प्यते। प्रकरणं चोभयाकांक्षा। तथा
हि। दर्शपूर्णमासाभ्यां स्वर्गं साधयेदित्युक्ते कथमित्येतस्यामाकांक्षायां अविच्छिन्नायां
चाक्षनप्रयोजनाग्न्यन्वाधानादीनि ब्राह्मणेन तत्प्रकरणे नानिकर्माणि पठ्यन्ते।
दर्शपूर्णमासयोश्चोपकारकापेक्षा। अग्न्यन्वाधानादीनां चास्माभिः किं कर्तव्य
मितिकार्यापेक्षा। न च दर्शपूर्णमासयोरुपकारकं किंचिन्न दृश्यते। न वा अ
ग्न्यन्वाधानादीनामपि कार्यं किंचिद्दृश्यते। अत उभयं चोभयेनाभिकुता। स्विद्द

श्री
१९

वश्यं। यदि तु वेदे न चिन्त्यमानो न ज्ञायते न तदानाऽस्तीति बुद्धिर्भवति। अस्ति च प्र
माणं। नात्यन्तं न संनिकर्ष एव संबंधकारणं। यदाऽसंनिकृष्टेन लभ्यते न तदा
विप्रकृष्टेऽवेदस्य शक्तिः संचरति। न हि होमोपकारकस्य नाऽप्रमाणं संनिकृष्टश्रु
तिलिङ्गवाक्यलक्षणमलब्ध्वा विप्रकृष्टमप्यनुरज्यते तमित्युभयाकांक्षावशेने
व विज्ञायते। यं हि दर्शपूर्णमासावुपकारमाकांक्षतः स नूनमेभिरग्न्यन्वाधाना
दिभिः क्रियते। यश्चाग्न्यन्वाधानादयः कर्तव्यमपेक्षन्ते तद्दर्शपूर्णमासोपका
र इति। न घुनयोरप्यन्यसंनिकृष्टतरमस्ति। यश्चान्यत्फलादिकं त्यैतन तस्यान्ये
न सह संबंधेन निराकांक्षा। न तस्य नेह संबंधाकांक्षा विद्यते। ते नाग्न्यन्वाधा
नादीनां न विश्वजिदादिवत्फलकल्पनं नापि दर्शपूर्णमासफलानुषङ्गः। उ
भयाकांक्षालक्षणसंबंधाभावे त्वन्यतराकांक्षालक्षणः संबंधो गृह्यते न सं
भवति तस्मान्नष्टाश्वदग्धरथवदेव परस्परनियमः सिद्धः। किं च अग्न्यन्वाधाना
देः फलान्तरकल्पने तु अस्तोः कथमित्युपकारकांक्षा अनिवृत्तैव स्यात्। अस्ति
चासावाकांक्षा। यागेन स्वर्गं कुर्यादित्येव करणत्वेन विधानात्। तदुक्तं। न हि तत्क
रणं लोके वेदे वा किंचिदीदृशं। इति कर्तव्यतासाध्ये यस्य नानुग्रहेऽर्थितेति। एव १९

19

उभयोराकांक्षावशे सति तत्संबंधप्रतिपादकं वाक्यं कल्प्यते। आग्नेयत्वाध
प्र॰ नादिभिरुपकृतेन यागेन स्वर्गं कुर्यादित्येवं। ततो वाक्याल्लिंगं आग्नेयत्वाधा
नादिगतं सामर्थ्यं कल्प्यते। लिंगाच्च विनियोक्त्री श्रुतिः कल्प्यते एभिः प्रधा
नस्योपकारः कार्य इति। अनुमानकारेण गते प्रमाणद्वयमेव कल्प्यमुक्तं। जै
लिं॰ मिनिना तु श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यासंज्ञानि षट्प्रमाणान्यु
क्तानि संति। नैष दोषः। प्रमाणचतुष्टयस्योदाहरणस्याग्रे वक्ष्यमाणत्वात्
। तत्र स्वार्थाभिधाने निरपेक्षं वचनं श्रुतिः। सा त्रिविधा। विधात्री। अभिधा
त्री। विनियोक्त्री च। तत्र विधात्री लिङाद्यात्मिका। अभिधात्री व्रीह्यादि श्रुतिः
। विनियोक्त्री त्रिधा। एकाभिधानेन एकपदश्रुतिर्विभक्तिश्रुतिरिति। यस्या हि शब्दस्य श्रव
णादेव संबंधः प्रतीयते सा विनियोगश्रुतिः। न च तत्रानेकार्थाभिधानमेके
न शब्देन युगपद्भवति विभक्त्येव लिंगसंख्याकारकाणां तत्र तेषां मन्विना
नामेवाभिधानं। तदेकाभिधानं। यथा पशुनेति पशुः करणं प्रतीयते तथैवं
करणं पुंस्त्वमपि। अतः संख्यादेरेकशब्दोपादानलक्षणया श्रुत्या का
रकसंबंधः। प्रातिपदिकार्थस्यैव पदश्रुत्या यजेतेत्यत्र यागस्य प्रकृत्यर्थस्ये

श्री
२०

कपर्देनोपात्तत्वात्स्वाङ्गोद्दिष्टं प्रतिकरणत्वं विनतिः। तु सर्वेषामेव साध्यत्वं
साधनत्वं वा प्रतिपाद्यं तेषां विनियोगकरणं वचनं हि तेषां साध्यत्वं प्रतिपाद
यति हि तेषां स्वरूपानुसाधनत्वात्तत्व्रीहीनवहन्तीति हि तेषां साध्यत्वेन व्रीहीन
भिद्धानावघातस्य तेषु विनियोगकारणं भवति। सर्ववस्तुगतं सामर्थ्यं लिङ्गेन त
द्यथा स्रुवेणावद्यति स्वधितिनावद्यति हस्तेनावद्यतीति कोऽपि नावद्यतीति स्रुव
स्यान साधनत्वेन सामान्येनश्च नानालिङ्गेन वस्तुसामर्थ्यात्स्रुवेण विशेषवि
नियोगो भवति। तदुक्तं सामर्थ्यात् स्वधितिर्मांसे द्रवे स्रुव्यास्तु वलथा हस्त
काषेषु रोडाशमवदानुं प्रकल्प्यत इति भेदानां च लिङ्गेन पदार्थस्मारकत्वे वि
नियोगः। वाक्यं तु पदसंघातात्मकं प्रागुक्तं। प्रकरणं वोभयाकाङ्क्षारूपं प्रागु
व क्तमेव स्थानं क्रमः सर्वे हि विधाः। पाठसादेश्यमनुष्ठानसादेश्यं च। पाठसा
देश्यमपि द्विविधं यथासंख्याम्नानं संनिधावाम्नानं च तत्राग्नीषोमी
यानुष्ठानदेशे पुरुषस्को णमाम्नानादग्नीषोमीयार्थत्वमनुष्ठानसादे
श्यरूपेण स्थानप्रमाणेन भवति। यत्र व ब्राह्मणो नु मेणा स्व गर्हं नाजानाम
भिमन्त्रणे निविहितानि संहितायां च तस्मिन्नेव क्रमे भिमन्त्रणमन्त्राः पठिताः २०

20

प्रतू नमित्यादयः। तत्र यथासंख्याम्नातास्तेन संबंधो भवति। एवमेव शाखां
तरे ब्राह्मणे आध्वर्यवकांडे दर्शपूर्णमासयोस्तत्र आग्नेयादयो यागाः क्रमे
णपठिताः याजमानकांडे च तत्रत्यान्यनुमंत्रणानि पठितानि तद्यथा। अग्ने
रहं देवयज्ययान्नादो भूयासं अदब्धिर्नामास्म्यदब्धोहं भ्रातृव्यं दभेयं। अग्नी
षोमौ वृत्रहणौ वग्नीषोमयोरहं देवयज्यया वृत्रहा भूयासमिति। दब्धिघात
कमायुधं। यावति प्रदेशे ब्राह्मणे प्रधानं पठ्यते तावत्येव मंत्रेऽनुमन्त्रः। तथा
श्चांगान्यपि क्रमावेलायां यथासंख्यन्यायेन समानदेशत्वात् तु दूरसंनिधा
नं भवति प्रथमस्य हि प्रधानस्य मंत्रमविछिन्नत्वं मंत्रसमाम्नायमादि
त आरभ्यालोचयति तत्र प्रथमो मंत्रः प्रथमं हृदयमागच्छति तेन चास्या
तिक्रमे हेतुरस्तीति स एव गृह्यते तत्र यो मंत्रस्य शेषिणो मध्ये समाम्नायस्तथैव
प्रक्रियया आद्येन शेषिणा सह संबंधो भवति। तत्र आन्तिकत्वा क्षता द्विती
यादीनामप्येवमेव द्वितीयादिभिरेव योगः। तत्राग्नेयाद्यनुमंत्रणे नाम्ना
ग्नेयादिलिंगत्वात् तेनापि व्यवस्था सिध्यतीत्यपवदन्त उक्तलिंगपाश्रुया
जकमाधीतः। अदब्धिर्नामास्म्यदब्धोहं भ्रातृव्यं दभेयमिति मंत्रउदाहरणं।

21

ननु वाक्यस्य प्रकरणात्सर्वार्थत्वं विज्ञायते तेन तु क्रमात् बलीयस्त्वात् यमस्योपां
शुयाजाङ्गत्वमिति। उच्यते। येन्द्रे ऽपि च आग्नेयादयस्ते विस्पष्टलिङ्गैः क्र
मप्रकरणवन्निर्मन्त्रान्तरैरवरुद्धत्वान्नैनमपेक्षन्ते। न चाधिकरण्योऽस्य स्पष्टलिङ्ग
त्वेन वैषम्यात् दृष्टार्थानां समुच्चय इति वेतनं। प्रकृतयाग प्रत्यवेक्षणे
न दृष्टार्थत्वात्। तस्यापि चादृष्टार्थत्वे निरपेक्षाणां गत्यन्तरे सति समुच्चयानाप्र
यणात्प्रागेयादिभिः कृतार्थः पेक्षितः सन्नन्तगत्यापन्नस्तत्रैव भवेत्। अस्ति वा वा
स्य गतिरुपांशुयाज इति। किं वा न वा विज्ञातलिङ्गानां मन्त्रस्याधिनियोजिका। अ
सौ त्वस्य वैसामर्थ्यात्संनिधावुपसंहृतं नं। अदृष्णुर्नामासौ त्वस्य स्पष्टलिङ्गो यं नवे वे
दृशंसन्तं प्रकरणं विनिवातुं क्षमं। अयमपि शक्तो युष्मदर्थविषयत्वात्संनिहि
तमभिमुखं वा भिधत्ते नान्यं उपांशुयाजस्य संनिहितोऽभिमुखश्चेत्यभिधान
सामर्थ्यं क्रमादुपांशुयाजविषयं विज्ञायते। ततस्तु लिङ्गेन प्रकरणं बाध्यत
एवेत्यदोषः। अतः कर्तौ नं पलिं वित् पिष्टम स्तु क्रमेव साधीयः। सन्निधावा
म्नानेनापि विनियोगो भवति। विकृतौ यद्दृष्टं मंगपुच्यते तद्विमयाकिंकर्त्त
व्यमित्येवं साकाङ्क्षं भवति। प्रधानस्य तु प्राकृतैरङ्गैर्निराकाङ्क्षस्य तद्रूपेक्षाय

द्यपि नास्ति तथापि तस्यापूर्वांगस्यानर्थक्यपरिहाराय तत्स्मृति प्रधानस्या
पिक्षां परिकल्प्य तस्य संबंधः क्रियते। यथा देवसुदेविरादीनां उपहोमादीनां
वा समाख्या योगिकी संज्ञा होत्रमाध्वर्यवमौद्गात्रमित्यादिका वैदिकी। प्रोक्ष
णीरित्यादिका लौकिकी वा। तत्राध्वर्युर्दृष्टं तमात्रमेवमपेक्षते। मया किं कर्त
व्यमिति तदपेक्ष्यमाणस्य यदि न कुतश्चिद्विशेषो वगम्यते ततो यत्किं
चिदिति भविष्यतीति तथाध्वर्यवसंज्ञितं कर्म कोमेकर्त्ता भविष्यतीत्येव
मेव विशेषमपेक्षते। तत्र शब्दार्थज्ञस्यादित एवैषो पेक्षा प्रत्येकं भवति। य
दस्याध्वर्योः कर्म तदाध्वर्यवं नामकृत्वा च्यं भवति। तथास्याध्वर्यवस्य यः क
र्त्ता तस्याध्वर्युर्नामेति। एवं सर्वे समाख्यासु वाच्याः। सत्त्रकारेणोचैतानि प्रमाणा
नि स्वस्वविषये युक्तानि। तथाहि। काष्ठ हिरण्यं वौ भिंदुहयात श्रुतेरित्यत्र
श्रुतिः काष्ठहिरण्ययोर्विनियोजकत्वेनोक्ता। तेषामारभेथनोप्यवस्थानत दूव
नवादिति। मंत्रलिंगाच्चेति च लिंगमुक्तं। वाक्यजातं त्रिहतं भूतकार्यं वा पशुक्रमस्व
र्चसान्नाय्यकामा यथासंख्यमिति यथासंख्यरूपं स्थानं। प्रयाजेषु संनिधेर्दर्श
मेवासंनिधोरिति संनिधिपाठलक्षणं स्थानं। शेषमितरेयथाख्यमुन्नीतोन्नय

सं

श्री
२२

ति समाख्यानादिति समाख्या। एतेषां श्रुत्यादीनां परस्परविरोधे उत्तरोत्तरस्य दु
र्बलत्वं। तदुक्तं जैमिनिना। श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां समवाये
पारदौर्बल्यमर्थविप्रकर्षादिति। तत्र श्रुतिलिंगयोर्विरोधे त्वनपेक्ष्यमेत्य शाला
द्वार्योपस्थाने निवेशन इति। अत्र श्रुतिः प्रत्येत्याग्निमुपतिष्ठते यद्दैवोपतिष्ठ
ते यं वै लोको गार्हपत्य इति निवेशन इति। शाखांतरे च ऐंद्या गार्हपत्यमुप
तिष्ठत इति। अत्रैंद्रोनतस्थाविति मंत्रगतेन लिंगेनेंद्रस्योपस्थानं प्राप्नोति अ
ग्निमिति द्वितीयाविभक्तिः श्रुत्या तु गार्हपत्यस्य। तत्र श्रुतिः। साक्षाद्वितीया त्री
।लिंगं तु श्रुतिमनुमाय तद्वारा विनियोजकमिति विप्रकर्षान्न दुर्बलं। तेन श्रुत्यैव
गार्हपत्यस्योपस्थाने विनियोगः। गार्हपत्य इति गार्हपत्यचितिरूपोग्निः। कु
तः प्रत्येत्याग्निमुपतिष्ठत इति प्रकृत्य सतत्त्वात्। एतद्यथायथं करोति यदग्नी
सामि चिनत एतां दिशमेति तस्मादेवैतं निह्नुते हिंसायै अयं वै लोको गार्हप
त्य इति च वाक्यशेषात्। एवं लिंगवाक्ययोर्विरोधे लिंगं बलवत्। वाक्यप्रकर
णयोर्विरोधे वाक्यं। प्रकरणस्थानयोर्विरोधे च प्रकरणं। स्थानसमाख्ययोर्विरो
धे च स्थानमिति। तदंगमतरदित्यत्रेतरदित्यनेन पूर्वसूत्रप्रतिपादितदे २२

22

वतोद्देशपूर्वकद्रव्यत्यागात्मकयज्ञादन्यत्राभ्यपेतं। तेन देवतोद्देशपूर्वकद्रव्य
त्यागात्मकानां प्रयाजादियागानां पूर्वाघारादिहोमानां चानेनांगत्वं न सिध्यती
त्यत आह यजतयश्चाफलयुक्तास्तदंगं। फलेन युक्ता फलयुक्ताः फलवन्तः न फल
युक्ताः अफलयुक्ता यजतयः प्रयाजादियागाः चकारात्पूर्वाघारादि जुहोतयश्च
तदंगं तस्य फलवतो यागस्य प्रधानस्यांगं उपकारका भवन्ति। उक्तः पूर्वसूत्रो
क्तात्मकरणादेव। ननु दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यनेन यागमात्रस्य
ध फलसंबंधं उक्तः। उक्तो फलयुक्ता यजतय इति। अतो व्यनेनात्र यागमात्रस्य फ
लसंबंध उच्यते। किं तर्हि येषां यागानां दर्शपूर्णमाससंज्ञा तेषामेव केवलं दर्शपूर्णमा
ससंज्ञा। ये दर्शपूर्णमाससंयोगेनोत्पन्ना। तद्यथा। आग्नेयोऽष्टाकपालः पौर्ण
वा मास्याममावास्यायां चाच्युतो भवतीत्याग्नेयस्य दर्शपूर्णमाससंयोगेनोत्पत्तिः।
तथा तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यजन्निति उपांशु
याजस्य पौर्णमाससंयोगेनोत्पत्तिः। ताभ्यामेतमग्नीषोमीयं पौर्णमासे प्रायच्छदि
त्यग्नीषोमीयस्य च तथा ऐन्द्रं दध्यमावास्यायामैन्द्रं पयोऽमावास्यायामित्यन
योर्दर्शसंयोगेनोत्पत्तिः। अमावास्यायां पर्युत्पन्नस्मादैन्द्राग्नो द्वादशकपालः पु

श्री

२३ रोडाशो भवती त्येवं आग्नेयस्य चाप्येतेन आग्नेयादयो यागा दर्शपूर्णमाससंबंधाद्
दर्शपूर्णमासपदेन लक्ष्यन्ते इति नामेव च फलसंबंधो नेन दर्शपूर्णमासाभ्यां स्व
र्गकामो यजेतेति वाक्येन क्रियते। अत एत एव फलवन्तः। प्रधानभूताश्चाद्
नरेण प्रयाजादयो निष्फलाः। अतः फलवतां प्रधानभूतयागानामंगं भवन्ति।
उपकारका भवन्ति। प्रकरणान्नात्तदुक्तं। फलवत्संनिधावफलं तदंगमिति। तदं
गमित्यनुभवर्त्तमाने पि पुनस्तदंगग्रहणं प्रयाजादीनां केवलदृष्टार्थत्वज्ञा
23 पनार्थं। इतराणि चांगानि कानि। चिद्दृष्टार्थानि कानिचिदुभयार्थानि। प्रयाजा
दीनि चैव दृष्टार्थान्येवेति। तदुक्तं। दृष्टादृष्टोभयार्थं चाङ्गानि प्रचक्षते। दृष्टा
नि चतुर्दशस्युर्जातिद्रव्यगुण-क्रियाः। अदृष्टार्थैर्हि धात्वर्थ दृष्टार्थमपि तन्मतं
दृष्टार्थं वापि सर्वेषु नियमाददृष्टमिष्यते। इति त्रिविधमंगजातं दृष्टार्थमदृष्टार्थ
मुभयार्थमिति। दृष्टार्थमपि जातिद्रव्यगुणक्रियात्मकं। तत्र जातिगुणौ पशुनाय
जेतारुणया क्रीणातीति क्रियासाधनत्वेन विनियुक्तौ न तत्साधनद्रव्यावच्छेदेन दृ
ष्टो नैवोपकारेण तस्मात् ऐष्याभावमनुभवतः। द्रव्यं तु साक्षाद्दृष्टक्रियानिर्वृत्ति दृष्ट
मेव प्रयोजनं। क्रियापि चावघातादि दृष्टार्थैवायासंनिपत्योपकारकमाचक्षते २३

सप

अदृष्टार्थत्वं तु क्रियाया एवासाचदृष्टा । संनिपत्योपकारकरूपाप्रोक्षणादिः
। आरादुपकारकरूपाः प्रयाजादिः । संनिपत्योपकारेणि चदृष्टार्थानि कर्माणि स्वका
रकाणां कर्मादीनामुत्पत्तिं प्राप्तिं विकारं वा कुर्वन्ति न तु साक्षात्प्रधानस्योपकुर्वन्ति
। तथा संयवनं पिण्डस्योत्पत्तिं दोहनं पयसः प्राप्तिं । अवघातो व्रीहीणां विकारं । अ
दृष्टार्थं तु संनिपाति संस्कारं कस्य कुर्वत्प्रधानोपकारि भवति । तदेवमुत्पत्त्यादिरू
पभेदात्संनिपाति चतुर्विधं भवति । तत्र कर्मणां नामन्यतमेनाकारेण यथायथमु
पस्थाप्य करोति । कर्मण्ययमवघातः । कर्तरि व्रतं । करणे प्रयाजशेषाभिघारणं । संप्र
दाने पशुपुरोडाशयागः । अपादाने अग्नेस्तृणान्यपचिनोतीति । अधिकरणे वे
द्यानयनं । आरादुपकारकं तु न कारकद्वारं । अपूर्वद्वारेण तु प्रधानस्योपकरोतीति
दृष्टादृष्टार्थं च द्विविधं कर्म । यथा पशुपुरोडाशयागः स हि त्यागांशेनादृष्टमुद्देशां
शेन दृष्टं देवतास्मरणं करोतीति तदुभयार्थः । एवमेवाविष्टकृद्यागादयोप्युभयार्था
: । तत्रापि त्यागांशेनादृष्टमुत्पद्यते । प्रधानयोगोपयुक्तहविरुत्तरार्धादि च प्रतिपा
द्यते । यत्तु पश्वापूर्वप्रयुक्ता इत्यत्र यजतिजुहोत्योः प्रस्तुताः अनयोर्विवेकं प्र
कृति यजतिजुहोतीनां को विशेषः । यजतीनां यागानां जुहोतीनां होमानां च

श्री
२४

परस्परं को विशेषः को भेद इति पृष्टः। तत्र यजतीनां विशेषमाह तिष्ठद्धोमाव
षट्कार प्रदानायाज्यापुरोनुवाक्यवंतो यजनयः। उच्यंते इति शेषः। तिष्ठता होमो
येषु ते तिष्ठद्धोमाः। वषट्कारेण प्रदानं येषु ते वषट्कार प्रदानाः। तथा। या ज्यावं
तः पुरोनुवाक्यवंतश्च ये ते यजनयः उच्यंते। अथ जुहोतीनां विशेषमाह उपवि
ष्टहोमाः स्वाहाकार प्रदाना जुहोतयः। उपविष्टेन कर्त्रा होमो येषु ते उपविष्टहो
माः। स्वाहाकारेण प्रदानं येषु ते स्वाहाकार प्रदानाः। ये उपविष्टहोमाः स्वाहाका
र प्रदानाश्च ते जुहोतयः। इत्युच्यते। पूर्वमग्न्यन्वाधानादीनां प्रयाजादीनां चां
गत्वं संप्रमाणोक्तं मुक्तं। तानि चांगानि इति जः। कुर्वीतेति वक्ष्यति। शेषमितरे
यथाख्यमिति कर्माणि पुरुषाणामिति चान्वेहं विस्तरो दर्शपूर्णमासज्योति
ष्टोमादिषु किं त्रयोपि वर्णा ब्राह्मणक्षत्रियवैश्या ऋत्विजो भवंति। उत ब्राह्म
णा एवेति किं तावत्प्राप्तं त्रयोपि वर्णा ऋत्विजो भवेयुः कुतः प्रमत्वात्। सर्वे
ष्वध्ययनवंतो विद्वांसश्च कुतः सर्वेपि कर्तुं शक्नुवंति याजनाध्यापनप्रतिग्र
हा ब्राह्मणस्यैव वृत्त्युपाया इति तु नियमः पुरुषार्थं न यास्मर्यते न क्रत्वर्थं तथा
तेन क्षत्रियवैश्यावार्त्विज्यं कुर्वतो नियमातिक्रमात् कामं स्वधर्मात् च्यवेयाः २५

24

तोनकृतोः आर्त्विज्ये हानिः तस्मात्क्षत्रियो पि वैश्यो वार्त्विजो भवतीति पूर्वः पक्ष
सिद्धान्तमाह ब्राह्मणा ऋत्विजो भक्षप्रतिषेधादितरयोः ब्राह्मणा एवार्त्विजो
भवेयुः न क्षत्रियवैश्याः श्रुतेः इतरयोः क्षत्रियवैश्ययोर्भक्षप्रतिषेधात्।
अग्निहोत्रशेषं प्रकृत्य श्रूयते। नेहोमुक्तो नरइदं होष्यतीति प्रवृत्तमतस्मा
त्तं घर्माणेव भक्षापि बेत्। हैनाब्राह्मणः पिबेदग्नौत्यधिश्रयंति तस्मान्नाब्राह्म
णः पिबेदिति। किं पुनरग्निहोत्रोच्छिष्टं यच्चिपरिशिष्टं तदग्निहोत्रोच्छि ष्टु
ष्टमिति। ननु स्थाल्यामपि यदवशिष्टं तदप्यग्निहोत्रोच्छिष्टमेवेत्यात आह
। अय यस्थाल्यामिति। यत्स्थाल्यां परिशिष्टं न घर्मापरीणहि अनसो निर्व
पेत्। न घर्मात्कुर्वंबा र्थ सर्वस्याधारणं नाहद्धं ननयस्थाल्यां। परितोनद्धं परिश्रि
तं धान्यं पूर्णं शकटं स्यापरिस्थानं परीणत्। अप्यथानस्य नोह्याविशेषो निर्वापेपि
तद्गतं धान्यं नशेषः किं तर्हि पुनरपि यागान्तरयोग्यमेव। एवमेव न घर्मस्थाल्यां
पयःइत्यर्थः। तस्मान्नघर्मः कश्चिदकर्मसंबंधो पि पिबेत्। नयापि वाग्नावधि
श्रितं चादब्राह्मणो न पिबेत्। ब्राह्मणस्तु संबंधो पि पिबेदिति। तथाशाखान्तरे
तयोः सान्नाय्यभक्षप्रतिषेधः श्रूयते। न राजन्यो न वैश्यो वा सान्नाय्यं पिबे
२

श्री द् सोमपीथोऽस्त्येष इति। तया दर्शपूर्णमासयोः त्वार्त्विज्ये चतुर्णां करणेन ब्रा
२५ ह्मण एव निर्दिश्यते। ब्राह्मणानामेवेदं हविः सोम्यानां सोमपानां नेहाब्राह्म
णस्यास्तीति। शेषभक्षार्थं हि चतुर्णां करणं। शेषभक्षाश्चर्त्विजो यदि च रा
जन्यावैश्ययोरप्यार्त्विज्यं स्यात्तदा न ब्राह्मणानामेवेदं हविः स्यात्। राजन्यवै
श्ययोरपि पक्षे स्यात्। तत्रेदमवधारणमसंगतं भवेत्। दर्शनाच्च। अतएव
ऽयमर्थो दृश्यते यत् ब्राह्मण एवर्त्विजो भवति। न क्षत्रियावैश्याविति न
था हि दृश्यते। द्वया वै देवा देवा इत्युपक्रम्य तेषां द्वेधा विभक्त एव यज्ञ आहुतय एव
देवानां दक्षिणा मनुष्यदेवानां ब्राह्मणानां शुश्रुवुषामनूचानानामाहुतिभिरेव
देवान् प्रीणाति दक्षिणाभिर्मनुष्यदेवान् ब्राह्मणान् शुश्रुवुषोऽनूचानानिति। तस्माद्दृ
त्विग्भ्य एव दक्षिणां दद्यात् नानृत्विग्भ्य इति। ऋत्विग्भ्यो यद्दीयते परिक्रयार्थं तद्दक्षि
णाशब्दाभिधेयं। दक्षिणाभिर्ब्राह्मणान् प्रीणातीत्यनेन दक्षिणानां ब्राह्मणसंबंध
एव दृश्यते। अतोऽपि ब्राह्मण एवार्त्विजः। किं च दर्शपूर्णमासिक्यां चान्वाहार्यद
क्षिणायां ब्राह्मण एव दृश्यते। तदेते वै देवा अहुतादो यद्ब्राह्मणा यदन्वाहार्य
माहरति तानेव तत्प्रीणातीति। दक्षिणा ऋत्विग्भ्यो दीयते। तस्माद्ब्राह्मण एव ऋ २५

25

त्विजो न क्षत्रियवैश्याविति सिद्धान्तः। ब्राह्मणा एवर्त्विज इति नियमः क्रत्वर्थः। य
तो ऽब्राह्मणस्यार्त्विज्ये प्राप्ते वैगुण्यमेव दृश्यते रामायणे। क्षत्रियो याजकोऽप
स्यवैडालस्य विशेषनः। कथं सहसिभो नारोहविसत्स्यसुरपेय इति। तथा राज
याजकयाज्यस्य विनश्यति यथाह वसिष्ठः ब्राह्मणो र्त्विज्येह विर्विनाशः। स्र
न्ः। तथा प्रतिमन्होधिको विप्रो याजनाध्यापनेन थेनिस्मनेन्त्र। स्रत एवाग्न्य
धिः श्रितस्य न स्मणप्रतिषेधात् क्षत्रियवैश्ययोरिष्टो यजमानभागस्यापिहो
मणेवविहितेनानमक्षणमिति इदानीमिदं विचार्यते। चित्रया यजेत पशुका
मः। द्वादशाहमृद्धिकामा उपेयुः। स्वर्गकामस्य नपेय इत्येवमादीनां फलयुक्तानां
कर्मणामारंभे किं कर्तुर्यथाकाम्यं उत वश्यं नैयांकरणमिति। तत्र विधिव
लाद्वश्यकरणे प्राप्ते आह फलयुक्तानामारंभे यथाकामी फलार्थित्वात्।
फलयुक्तानां फलसंबद्धानां काम्यानां कर्मणां द्वादशाहादीनामारंभे कर्मणां कर्तु ओ
र्यथाकामी स्यात् कर्तुर्यथाकाम्यं भवेत्। नां इच्छया प्रवृत्तिः। साधिस्यर्थः। कुतः
। फलार्थित्वात्। फलमर्थयते याचत इति फलार्थी। यतः तस्य फलार्थिनः फल
प्राप्त्यर्थं कर्म विधीयते नान्यस्या तेन यः फलं प्राप्तुं वांछति स फलयुक्तानिव

श्री ण्णिन स्यास्य हीकरोति नान्यः। कामममनति कम्य यथाकामं। यथाकाममित्य
२६ स्य भावो याथाकामी। याथाकाम्यमित्यर्थः। ब्राह्मणादित्वाद् यथाकामशब्द
स्य गुणवचनब्राह्मणादिभ्यः कर्मणि चेति ष्यञ् प्रत्ययः। यथा स्वभावात्तल्लंते
स्त्रियां वर्त्तते। एवं ष्यञन्तमपि द्रष्टव्यं। स्त्रियां वर्त्तनेय यौ षित्वाद् वैदग्धी याथाका
मीति पदद्वयं। तेन न द्विवित्तत्वं तेन स्त्रियां नपुंसके च वर्त्तते। यदा स्त्रियां तदा ष्य
ञः षित्वात् षिद्गौरादिभ्यश्चेति ङीष्। यस्येति चेत्यकारलोपः। हलस्तद्धितस्येति
यकारलोपः। यथा औचित्यं औचिती। तानेव याथाकाम्यं याथाकामीति स
मानार्थं शब्दद्वयं। तस्मात् सकलपुंसां नां काम्यकर्मणां आरंभे कर्त्तुर्याथाका
म्यमिति सिद्धान्तः। एवं सर्वकर्मसु इच्छयानुष्ठाने प्राप्तावाह ननियमनिमि
त्ताग्निहोत्रदर्शपूर्णमासदाक्षायणाग्रयणपशुप्रभृतेः। नियमः सत्यं
वेदेऽभिहितत्वात्। नियमं कर्मविनाश्य शास्त्रात्। अग्निहोत्रं सायंप्रातर्होमः। द
र्शपूर्णमासौ पञ्चचतुष्टौ। दाक्षायणो यज्ञ दर्शपूर्णमासविशेष एव। आग्र
यणं नवयज्ञः। पशुर्निरूढः। एषु नियमादिषु पशुत्वं नेषु सत्त्वो नेषु कर्त्तुर्ने
याथाकामी। न याथाकाम्यं। कुतः। प्रवृत्तेः। शास्त्रचोदितेषु पुनि यत्नेन तु २६

रूपं प्रवर्त्तयन्ति। अतएतेषां नियोगतोनुष्ठानं कर्त्तव्यं। नेच्छया। नियमेषु तावत्।
सत्यवादी स्यात् अधःशायी स्यादित्येवमादिशास्त्रं नियमेन प्रवर्त्तयति। कथं। यदि नि
यमेषु याथाकाम्यं स्यात्। तर्हि नियमशास्त्रमनर्थकं स्यात्। शास्त्रं विनापि याथाकाम्य
स्य सिद्धत्वात्। सर्वोपि यदेच्छति तथा संवदति अधः शेते च। न च वेदमात्रमात्रस्याप्या
नर्थक्यमिष्यते। अतः शास्त्रस्यार्थवत्ताय नियमेषु न याथाकाम्यं। निमित्तेषु तु निय
न्ते निमित्तिकं विधौ यतेत्तत्रापि न याथाकाम्यं। तद्यथा सायंप्राप्ते द्वौ हान्तौ वैद्वं पर्वं शएवमो
दनं निर्वापेत् गेहदाहेनये क्षामवते पुरोडाशं इत्यादि। यद्यत्र याथाकाम्यं स्यात्। तर्हि
सायंप्राप्ते दोहात्तौ गेहदाहे इत्यादिनिमित्तश्रवणमनर्थकमेव स्यात्। निमित्तश्रवणं
विनापि विश्वजिदादिवत् ऐच्छिकानुष्ठानस्य सिद्धत्वात्। अतो त्रापि न याथाकाम्यं। अ
ग्निहोत्रेपि न याथाकाम्यं। कुतः। यावज्जीवमग्निहोत्रं जुहुयादिति श्रुतेः। न त्वग्निहो
त्रस्यापफलसाधनत्वं श्रूयते अग्निहोत्रं जुहुयात्स्वर्गकाम इति। तत्र श्रफलयुक्तत्वा
द्याथाकाम्यं स्यात्। अन्यकस्मिंश्च न ब्राह्मणे काम्यं प्रयोगं विधाय यावज्जीवमग्निहो
त्रं जुहुयादिति पठ्यते। तत्रायं संदेहः। किं यावज्जीवप्रयोगात्काम्यः प्रयोगो भिन्नः
उतयएवायं काम्यप्रयोगः स एव यावज्जीवकालपरिमित इति। तत्र यदि यावज्जी

श्री
२७

वकालः कर्मधर्मत्वेन विधीयते यतः सायं जुहोति प्रातर्जुहोतीति वाक्यद्वयेन
तत्कालसमायतनमग्निहोत्रं न शक्नोतीति तावन्तं कालं पूर्णमिदमित्यर्थात् ज्योतिष्टो
मवदभ्यस्तरूपमेकमेव प्रयोगं प्रतिपद्यन्ते। यदि पुनर्जीवितं निमित्तत्वेनोद्दिश्य
कर्म विधीयते। ततो यावज्जीवं आविनिनियते निमित्ते विनाकामसंबंधेनैवोपमान चे
मकरणो दोषः प्रसज्येत स्वरूपे पुरुषेण जीवनार्थासिध्यर्थमनर्थपरिहाराय यत्नक
र्तव्यमिति कर्त्तृधर्मो नियमो नेन वचनेन चोदितो भवति। न तावत्सायंप्रातःका
लयो जीवेनस्य चरणं तानो निमित्तत्वात्स्वतिदिवसं निमित्ते पर्यवसितं कर्मनिमि
त्तावृत्तिवशात् पुनः पुनः क्रियत इति प्रयोगान्यत्वमिति। तत्र किं जावत्साम्ना
कः प्रयोगोभ्यस्तरूपः कर्मधर्मे यावज्जीविकता यावज्जीवशब्दो मरणावधिककाल
परः। तत्कालसंबंधश्च प्रवृत्ते काम्येग्निहोत्रे पूर्वमप्राप्तत्वात् विधीयते। तथा सत्यस्य वा
क्यस्य नित्यप्रयोगविधायकत्वाभावेन वाक्यान्तरविहितः काम्यप्रयोग एवाग्नि
होत्रस्य पर्यवस्यति। सर्वो काम्यप्रयोगोभ्यसितव्यः। स च हृदनुष्ठानस्याग्निहोत्रं जुहुया
त्स्वर्गकाम इत्यनेनैव सिद्धे यावज्जीवमिति कालविधिवैयर्थ्यप्रसंगात्। तस्मादयं
काम्यस्य कर्मणोभ्याससिद्धये कालरूपधर्मविधिः यावज्जीवकालमभ्यस्येदिति। तथा २७

27

थासति। कृत्स्नं र्मांगविधौ कथंभावसंबंधात्मकरणानुग्रहो भवति। पुरुषार्थविधौ
तु तदसंबंधात्मकरणाबाधः स्यात्। कथं। तद्धि कथंभावात्मकं कर्मधर्ममपेक्षमाणं
पुरुषधर्मो विधीयमानेऽसंतं बाधितमेव भवति। एवं चैकप्रयोगे सति दीर्घसत्रसं
सत्तवदुपपन्नो भविष्यति। इतरथा पुनः प्रतिदिवससमाप्तेर्न किंचित्सत्रसारूप्यं भ
वेत्। तस्मात्कर्मधर्मोऽभ्यास इति पूर्वः पक्षः। सिद्धांतस्तु। यावज्जीवशब्देन कालस्यवा
चकः। किंतु कृत्स्नस्य जीवनस्य। न च जीवनं कर्मधर्मत्वेन विधातुं शक्यते तस्य कर्तृधर्म
त्वात्। तं च कर्तृधर्मं निमित्तीकृत्याग्निहोत्रप्रयोगो विधीयते। इह हि यावत्कर्तृभाविजी
वनं श्रुत्यैव प्रतिपादितं जुहोतीत्येतदपि स्वार्थविधायकमेव। न च सक्षे तु जीवनेन
कालो लक्ष्यते। जुहोतिना ह्यभ्यासः। न च प्रकरणवशेन श्रुतेर्लाक्षणिकोऽर्थो वर्ण
यितुं युक्तः। तस्मात्कृत्स्ने जीवने प्राणधारणक्रियारूपे निमित्ते पुरुषस्य प्रत्यवायप
रिहाराया ग्निहोत्रप्रयोगो विधीयते। न चात्र कर्मभेदः। तद्धेतूनां शब्दांतरादीना
मभावात्। न चाभ्यासः। अविशेषपुनःश्रुतेरभावात्। अतः प्रयोगभेद एवायं पर्यव
स्यति। जीवनस्यावांतरनिमित्तत्वात्सतिच निमित्ते नैमित्तिकस्यासागायोगान्नित्यत्व
मप्यर्थसिद्धं। न चैवं जीवननैरंतर्येण प्रयोगनैरंतर्यापत्तिः। सायंप्रातःकालविशिष्टस्ये

श्री
२८
28

वजीवनस्य निमित्तत्वात्। न कालान्तरीयस्यात्। तस्मात्काम्यस्वर्गार्थप्रयोगादयं नित्यः प्र
योगो भिन्न इति सिद्धान्तः। तत्र अग्निहोत्रेऽपि न यथाकाम्यमिति सिद्धं। अयं तु विशेषः
। काम्ये प्रयोगे वृत्ते नित्यः वृत्त एव भवति यतः सोऽप्यग्निहोत्रप्रयोग एव। तथा चोक्तं तत्र
(मे। अग्निहोत्रं जुहोतीत्येवमुत्पन्नस्य कर्मणो विपरिवर्तमानस्य निमित्ते फले च विधा
नान्तत्वात्कर्मान्तरमिदं। नापि प्रयोगभेदः अन्तर्गतत्वात्काम्ये नित्यप्रयोगस्य काम्य
नित्ययोस्तन्त्रेणानुष्ठानं। अतिवृत्त एव तस्मिन्भेदः। पृथक्त्वे निमित्ते फले च कर्म श्रूयते
। अत्र तत्रूपाधिक एव भेदो न वास्तवः। तस्मान्नित्यकाम्ययोस्तन्त्रेणानुष्ठानसिद्धान्ती
ति दर्शपूर्णमासयोरपि न यथाकाम्यं। कुतः। यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति
श्रवणात्। अत्राप्यग्निहोत्रवन्नित्यकाम्यप्रयोगभेदो ज्ञातव्यः। तदुदेवात्रापि वाक्य
द्वयस्य श्रवणात्। दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत यावज्जीवं दर्शपूर्णमासाभ्यां
यजेतेति। अत्रापि यावज्जीवकालं स्वर्गार्थं दर्शपूर्णमासाभ्यासः कार्य इति कर्मध
र्मविधिः पूर्वपक्षः। सिद्धान्ते तु पौर्णमास्यमावास्याविशिष्टे जीवने कर्तृधर्मप्रमाणाधार
णाक्रियारूपे निमित्ते दर्शपूर्णमासयागविधिरिति। तस्माद्दर्शपूर्णमासयोर्न यथा
काम्यं। दाक्षायणयज्ञेऽपि न यथाकाम्यं। तस्य गुणमात्रविवृत्त दर्शपूर्णमासरूपत्वात्। २८

नत्वत्र हि प्रथमस्याग्रहणं न कार्यं दर्शपूर्णमासग्रहणेनैव सिद्धत्वात्। अत्रोच्यते। प्र
जापश्चन्नयज्ञस्य कामस्यैवमादिफलसंबंधदर्शनात्काम्यत्वाशंका स्यात् तदर्थं
पृथग्दाक्षायणाग्रहणमित्यदोषः। प्रजादिकं फलं च गुणात् न तु दाक्षायणादिति
वक्ष्यामः। अतो दाक्षायणोऽपि न यथाकाम्यं। आग्रयणोऽपि न यथाकाम्यं। अनयो
र्वा अयं द्यावापृथिव्योरसौ स्वरसस्य हुत्वा देवेभ्यो यमम श्नामेति तस्मादु आग्रय
णेष्ट्या यजेत इति श्रवणात्। अत्र द्यावापृथिव्योरसस्यान्नस्य देवेभ्यो होमानन्तर
मशनं विधीयते। अशनं च नित्यमवश्यं कार्यं। अन्यथा जीवनासंभवात्। नवा
हुत्वैतत्कर्तुं शक्यं। हुत्वा यमश्नामेत्युक्तत्वात्। तस्माद्दर्शनवदाग्रयणादिनित्य
त्वात् न तु यथाकाम्यं किं च अकृत्वाग्रयणस्य नवान्नभोजने प्रा यश्चित्तं
विहितमस्ति। अनिष्ट्वाग्रयणेन नवस्याश्नीयाद्वैश्वानरं निर्वपेदिति। तथा
चाहापस्तंबः। एतामेव निर्वपेद्योऽकृत्वाग्रयणं नवस्याश्नीयादाहिताग्निर्वा एष देवा
नां यश्चाहिताग्निरहुतस्य देवान्नं यदकृत्वाग्रयणं नवस्याश्नीयाद्देवेभ्यो
भागं प्रतिचृ समघाता जितमार्छेदिति। तस्माद्दाक्षायणोऽपि न यथाकाम्यं निरू
ढपशावपि न यथाकाम्यं। यत एतं प्रक्रम्योपसंगृह्यते। तं वै संवत्सरीणानीजानम

स्र
श्री तीयादिति षड्ढोत्रं सपशुबंधयाजीति च तस्मात्स्वशाखाविपिन याथाकाम्यं अन्तर
२९ वा हविःषु इषुः। अवश्यं ब्राह्मणोग्नीनाधीत दर्शपूर्णमासाग्रयणेष्टि चातुर्मा
स्यपशुसोमैश्च यजेति। हारीतोपि पाकयज्ञान्यजेन्नित्यं हविर्यज्ञांश्च नित्यशः। सो
मांश्च विधिपूर्वेणाय इच्छेद्धर्ममव्ययमिति च गौतमेन दर्शिताः। अष्टकापार्वणश्रा
द्धं श्रावण्याग्रहायणी चैत्र्याश्वयुजी चेति सप्त पाकसंस्थाः। अग्न्याधेयमग्नि
होत्रं दर्शपूर्णमासौ चातुर्मास्यान्याग्रयणेष्टिर्निरूढपशुबंधः सौत्रामणीति
29
सप्त हविर्यज्ञसंस्थाः। अग्निष्टोमोत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोतिरात्रो
प्तोर्याम इति सप्त सोमसंस्थाः इति। पार्वणं पार्वणे क्रियमाणं स्थालीपाकलक्ष
णं। श्राद्धं मासि मासि श्राद्धं। मनुः अग्निहोत्रं च जुहुयादाद्यंते द्युनिशोः सदा। दर्शेन चा
र्द्धमासांते पूर्णमासेन चैव हि। सस्यांते नवसस्येष्ट्यां तथर्त्वंते द्विजोध्वरैः पशुना त्व
ते यनस्यांते समांते सोमिकैर्मखैः। आद्यंते द्युनिशोः सायंप्रातरित्यर्थः। अध्वरैश्चा
तुर्मास्यैरिति सोमैर्वैदिकैः सोमैः सोमयागैः अग्निष्टोमाख्यैर्न याथाकाम्यं। कुतः वसं
ते वसंते ज्योतिषा यजेतेति श्रुतेः। नन्वग्निहोत्रे दर्शपूर्णमासयोश्च यावज्जीवग्र
हणात्कर्तृधर्मनिमित्तत्वं भवतु सोमादिषु कथं उच्यते। अत्रापि वीप्सा संयुक्तं का २९

लशास्त्रमेवनिमित्तंवसंतेवसंतेज्योतिषायजेतेत्यादिकं।नतावदेतत्काम्यस्योपदि
श्यते।तस्यहियथेष्टमनुष्ठानस्योक्तत्वात्।नित्यंवक्तुंयुक्तं।अथापिनित्यस्यास्यफल
योगःस्यात्तदावीप्साव्यर्थास्यात्।नचवसंतेयत्नावधारणेप्रमाणमस्ति।तस्मा
द्यावज्जीवंयेवसंतास्तेष्वितिविज्ञायते।सम्भवपिचभिन्नेजुहोतीतिवन्निमित्तार्थे
व।अतएवंजातीयकेसर्वत्रकर्तृधर्मनिमित्तत्वावधारणात्कालशास्त्रमेवंप्रत्येत
व्यं।एवंसर्वत्रचातुर्मास्यादेर्ज्ञेयं।ननुज्योतिष्टोमेनस्वर्गकामोयजेतेतिकाम्यत्व
मथास्यश्रूयते।सत्यं।वसंतेवसंतेज्योतिषेत्यनेननित्यत्वमपिश्रूयतएव।अ
तःप्रयोगभेदएवायमत्रापिअग्निहोत्रादिवत्।एकःस्वर्गकामप्रयोगः।अपर
स्तुनित्यइति।अतएवगवामयनेकारणांतरेणसोमानंतरायाःश्रुतावुच्यते।क
यमेषांसोमोनंतरितोभवतीतिसर्ववेदसंदद्यात्।इति।यदिसोमस्यावश्यकर्त
व्यंतानस्यात्तर्हिकारणांतरेणानंतरार्थवचनंनस्यात्।अस्तिचात्रसोमेपि
नयाथाकाम्यं।एकेग्रहणंतुपूजार्थं।मतांतरस्यात्राभावात्।अत्राहवसिष्ठः।आरू
मग्न्याधेयायनानाहिताग्निःस्यात्।अलंवसोमायनासोमयाजीति।अलंसमर्थ
ःसामर्थ्यंचयाज्ञवल्क्येनोक्तं।त्रैवार्षिकाधिकान्नोयःसहिसोमंपिबेद्द्विजः

श्री
३०

मनुः। यस्य त्रैवार्षिकं भक्तं पर्याप्तं भृत्यवृत्तये। अधिकं चापि विद्येत स सोमं पा-
तुमर्हति। एतत्काम्यसोमयागविषयं। क्रतोश्च नित्यस्यावश्यकर्त्तव्यत्वादक-
रणे प्रत्यवायश्रवणात्प्रायश्चित्तविधानाच्च। शंखोपि। त्रैवार्षिकाधिकान्नस्तु पि-
बेत्सोमममन्त्रितः। इष्टिं वैश्वानरीं कुर्यात्तथैवाल्पधनो द्विजः। याज्ञ०। प्राक्सौमि-
कीः क्रियाः कुर्याद्यस्यान्नं वार्षिकं भवेत्। मनुः। पुण्यान्यन्यानि कुर्वीत श्रद्दधा-
नो जितेंद्रियः। न त्वल्पदक्षिणैर्यज्ञैर्यजेतेह कथं चन। इंद्रियाणि यशः स्वर्गमायुः
कीर्त्तिं प्रजाः पशून्। हंत्यल्पदक्षिणो यज्ञस्तस्मान्नाल्पधनो यजेत्। मत्स्यः। अ-
न्नहीनो दहेद्राष्ट्रं मंत्रहीनस्तथर्त्विजः। यष्टारं तु दक्षिणाहीनो नास्ति यज्ञसमो रिपु-
रिति। अन्नपरिमाणमपि शंखेनोक्तं। सहस्रं भोजयेत्सोमे ब्राह्मणानां शतं पशौ
चातुर्मास्येषु सर्वेषु शतं पर्वणि पर्वणि। यत्तु श्रुतौ शतं चैव यज्ञे दक्षिणा भवस-
त्यिकापीति। तन्नित्याभिप्रायं। अत एव बौधायनः। यस्य नित्यानि लुप्तानि तथैवा-
जस्रिकाणि चाप्यथ स हि न स्वर्गं गच्छेत्तु पतितो हि सः। तस्मात्कंदैः फलैर्मूलै-
र्मधुना पयसापि वा। नित्यं नित्यानि कुर्वीत न च नित्यानि लोपयेदिति। नाल्पधन-
स्यापि आधाने सोमे चाधिकारः। तथा च प्रजापतिः। सर्वसंख्याधिकारः स्याद्दाहि ३०

30

नाग्निहूर्नेसत्ति। आदध्यान्निर्धनोप्यग्निं न तु पापभयाद्द्विजः। न पापभयाद्धा
हि नाग्निः संरक्षाधिकारी। किं तु धनेसत्येवान्तासां काम्यत्वात्। कूर्मपुराणे। नास्ति
क्यादथवालस्याद्योऽग्निनाधातुमिच्छति। यजेत वा न यज्ञेन स याति नरकान्बहू
न्। तस्मात्सर्वप्रयत्नेन ब्राह्मणो हि विशेषतः। आधायाग्निं विशुद्धात्मा यजेत
परमेश्वरं। इति। तथा च स्मृतौ। पशुसोमादीनामशक्त्या करणासंभवे प्रत्याम्नाय त्या
उपदिश्यते। ऋतूनां पशुसोमानां निष्कृत्यर्थमसंभवे। इष्टिं वैश्वानरीं नित्यां नि
र्वपेद् दृष्टपर्यये। ऋतूनामारब्धानां पशुसोमानामनुष्ठानासंभवे तन्निष्कृत्यर्थं
तत्प्रत्याम्नायत्वेनाब्दपर्यये वर्षसमाप्ते वैश्वानरीमिष्टिं नित्यमवश्यं निर्वपेदित्य
न्वयः। तथा याज्ञवल्क्योपि। प्रतिसंवत्सरं सोमः पशुः प्रत्ययनं तथा। कर्तव्याग्र
यणेष्टिश्चातुर्मास्यानि चैव हि। एषामसंभवे कुर्यादिष्टिं वैश्वानरीं द्विजः इति
। स्वस्वकाले तत्प्रत्याम्नायरूपां वैश्वानरीमिष्टिं कुर्यादित्यर्थः। चातुर्मास्येषु च
तुर्मुखेष्वकृतेः चातुर्मास्येषु वै यथाकामी। कुतः। ऋतुमुखेष्वकृतेः। ऋतुमुखेष्वृतुमु
खे वा चातुर्मास्ये यजेतेति वाप्या श्रवणात्। ऋतोर्मुखं प्रथमं दिनं प्रतिपत्तत्रेत्यर्थः
अत एव वैश्वदेववरुणप्रघासादीनि चातुर्मास्यपर्वाणि प्रतिपद्येव क्रियन्ते नपौ

श्री
३१

र्म्मास्यामित्यवसीयते। यतः प्रतिपदे वर्त्तुर्मुखं नपौर्म्मासीत्ति तथा चश्रू
यते। एषाह संवत्सरस्य प्रथमारात्रिर्यत्फाल्गुनी पौर्म्मासी योत्तरेति। नित्यत्वेका
रणांतरमाह नियतसहपाठात्॥ नियतैर्नित्यैरग्निहोत्रादिकर्मभिः सहपाठा
द्दपि चातुर्म्मास्यान्यपि नित्यरूपकत्वान्नीत्यवसीयते। तेषु नयाथाकाम्य
मिति प्रतीयते। तथाहि। तत्र नात्र्यदृष्टकं। नित्येऽग्निहोत्रं दर्शपूर्म्मासौ चा
तुर्म्मास्यानि पशुबंधः सोमयज्ञ इति। नित्यैः सहपाठेन नित्यत्वमव
गम्यत इत्यभिप्रायः दर्शनाच्चागवामयने उपायान्तरेण श्रौतो वा चातुर्म्मास्याना
मनंतरं पदर्शनाच्चातुर्म्मास्येषु नयाथाकाम्यमित्यवगम्यते। तथाहि। कथमे
षां चातुर्म्मास्यान्यनंतरितानि भवंतीति पप्रच्छ येति ब्रूयाद्दिति। यद्यावद्रूप मनु
ष्ठेयं तस्यैव लोपत्रयं कथा कारणांतरेणानुग्रह उपपद्यते। तेषु यानुष्ठेयस्या
परेतु दर्शनाद्येत्यमुं हेतुमग्निहोत्रादिषु सर्वेषु योजयंति। यतः सर्वत्र श्रूयते
कथमेषामग्निहोत्रमनंतरितं भवतीति प्रतेतेति ब्रूयादिति कथमेषां पौर्म्मा
सं हविरित्यादि कथमेषां पशुः सोमोऽनंतरितो भवतीत्येतत्। यतः सर्वत्र कारणांत
रेणानुग्रहो हश्यते। एवं सिद्धांतमुक्त्वा नरापूर्वपक्षमाह नोत्सर्गयोगात्। चातु

31

स्येष्वनयाथाकामीतिपदं कं तन्न। किं तु तत्रापि याथाकाम्यमेवानि
त्यत्वं कुतः। उत्सर्गयोगात्। यत्र चातुर्मास्यानामुत्सर्गयोगो ऽस्ति। उत्सर्गेण यो
गः संबंध उत्सर्गयोगः। इत्युत्सर्गे यजमानस्याप्ति। यदि हि चातुर्मास्यानि नित्या
नि भवेयुस्तदा उत्सर्गयोगो न स्यात्। अस्ति च। अतो ऽत्रापि याथाकाम्यमेवानि
त्यत्वं इत्येवं पूर्वपक्षिते उक्तमेव सिद्धांतं द्रढयति स्यात्त्रिंशच्छब्दत्वाच्चातुर्मा
स्यानां नित्यत्वेप्युत्सर्गयोगः स्यात् न वेत्। किंवत्। त्रिंशच्छब्दवत्। यथा दर्शपूर्णमा
सयोस्त्रिंशच्छब्दवर्णनंतरमुत्सर्गः अस्तीति। नित्यत्वं च नयोरसंदिग्धं विधानत एव
। तथा हि। यो दर्शपूर्णमासाभ्यां यजेत इति प्राकृत्येनदुच्यते तत्तस्मादु त्रिंशत् शत
मेव वर्षाणि यजेतेति। एवमत्रापि वचनादुत्सर्गयोगो ऽपि विवेकस्यापि को ऽभविष्य
ति। नित्यत्वं च। तस्माच्चातुर्मास्यानामपि नित्यत्वं अन्तएषूपि नयाथाकाम्यमि
ति सिद्धं। अथवा एवं योजना। उत्सर्गयोगे सत्यपि चातुर्मास्यानां नित्यत्वं स्यात्
। त्रिंशच्छब्दत्वात्। यथा दर्शपूर्णमासयोस्त्रिंशच्छब्दवर्णनंतरमुत्सर्गयोगे सत्यपि नि
त्यत्वमविप्रतिपन्नं विद्यते। एवमिहापीति। अपि च। यद्युव स्यं कर्त्तव्यं तन्नित्य
मित्युच्यते। अथेदं विचार्यते। द्विप्रकारं कर्म। नित्यं काम्यं च। तत्र नित्यं प्रवृत्तं सेदंवि

श्री —वार्यते। किं सर्वांगोपेतं कर्त्तव्यं उत यावत्स्वंगानि कर्त्तुं शक्नोति तावद्भिरंगैरुपे
३२ तमिति। किं तावत्प्राप्तं। सर्वांगोपेतमेव कर्त्तव्यमिति। कुतः। भावनांशस्य क
थंभावस्य सर्वैरंगैः परिपूरणेन सर्वांगोपेतमेव कर्त्तव्यमित्येवं प्राप्ते आह
स्येव प्रधानस्य फलवत्वाद् न्यथा अंगाम्नानस्य वैयर्थ्यापत्तेः। तस्मात्सर्वांगोपे
32 तमेव कर्त्तव्यमित्येवं प्राप्ते आह विगुणोपि फलनिर्वृत्तिरंगप्रधानभेदात्। नि
त्येषु कर्मसु अग्निहोत्रदर्शपूर्णमासादिके विगुणोपि अंगहीनेपि चूर्ते फल
निष्पत्तिः प्रत्यवायपरिहाररूपस्य फलस्य निष्पत्तिर्भवत्येव। कुतः। अंगप्र
धानभेदात्। यतोंगानि प्रधानानि च भिन्नानि। नित्येषु वेति कर्त्तव्यतैव नास्ति
कुतस्तस्मात्साकल्यं। कुत इति कर्त्तव्यताना स्ति अपूर्वाभावात्। अपूर्वं प्रयु
ञ्जाहीति कर्त्तव्यताशा च तस्मिन्नसति भवितुमर्हति। कथमपूर्वाभावः फलाभा
ध्य वात्। कालांतरभाविफलमि[illegible]र्थत्वपूर्वकल्पनं। अत्रास्ति फले कल्पयितुं न
शक्यते। तस्मान्नित्येषु यागस्यैव भावमत्वं न फलस्य। तस्मात्सोमसमासस्य मम्मा
वास्यायांवाग्निमुद्दिश्य पुरोडाशस्य क्रम इत्येन बहु पदिश्यते। तेन इह प्राप्तां
नियाम्यं अंगानि संनिपत्योपकारकाणि येर्विना प्रधानभूतयाम निष्पत्तिर्नभव ३२

नि। अन्यथानुपपत्त्यातावद्विरूपेन प्रधानेकर्त्तव्यं। नांगानि। अंगत्वात्तं तु
वाम्यप्रयोगार्थं अतो निकालह पुरोडाशमात्रमादरणीयं अन्यदंगजातं
अदृष्टार्थं नादरणीयमिति। कथं तर्हि दृशे निःफले पुरुषस्य प्रवृत्तिरिति चेत् वे
उच्यते। प्रत्यवायानुत्पत्त्यर्थं प्रवृत्तिर्न तु फलार्था। विहिताकरणे हि प्रत्यवा
यः स्मर्यते। अकुर्वन्विहितं कर्म प्रायश्चित्ती यते नर इति। अतो नित्यकर्मणो
निःफलत्वादपूर्वाभावाद्धि तिकर्त्तव्यतानाकांक्षतीति ही नांगस्यैव प्रयोग इति के
चित्सिद्धांतमाहुः। तदेतन्नोपपद्यते। कथं। भावनातो हि तिस्र आकांक्षा जायं
ते किं केन कथमिति। तत्र कथमिती तिकर्त्तव्यताकांक्षा नित्येप्यस्ति। तस्माद्द्वा
प्यस्ती तिकर्त्तव्यता। सत्यं। अस्त्येवेहाप्याकांक्षा त्रयं तथापि किमाकांक्षायाः
समानपदोपात्तेन यागेनैव पूरणात्तन्निहेतिप्रयोगिन्येवेतिकर्त्तव्यताकथ
माकांक्षयागः घनेन त्वदृष्टत्तुपयोगिप्रयाजाद्यंगमदृष्टस्य साध्यस्याभावादि
ति चेत् न। यागस्य खतोऽपुरुषार्थत्वेन प्रवृत्त्यन्यथानुपपत्त्या समानपदोपा
त्तं यागमुत्सृज्य सर्वेषामभिमतस्य प्रत्यवायपरिहारस्यैहभाव्यत्वयावत्त्वेना
त् ननु च सर्वेषामभिमतः स्वर्गः किमिति न कल्प्यते। तस्य शरीरारंभहेतुतया

दे॰ प्र मोक्षविरोधित्वेन मुमुक्षूणामनभिप्रेतत्वात् प्रत्यवायपरिहारस्तु नैरपीष्य

३३ त एवाकरणे तस्मिन्पापे तज्जन्मोपार्जिते भवान्तरोपार्जिते वा स्थिते सति तदु

पभोगहेतुभूतशरीरारंभावश्यंभावेन मोक्षाभावात् अतो मोक्षार्थिनाप्य

वश्यं पापक्षय एषितव्य एवासमीहितफलाया इतरथा: अप्रक्षीणे पापे

फलप्राप्तेः तस्मान्नित्यानि कर्माणि पापक्षयस्योपायत्वेन चोद्यमानानीति

33 कर्तव्यतामपेक्षंत एव धर्मशास्त्रेषु च यथैवाकरणे प्रत्यवायः स्मृतस्तथै

व करणादपि पापक्षयः स्मर्यते पूर्वसंध्यां जपंस्तिष्ठन्नैशमेनो व्यपोहती

त्यादिभिः नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयमिति च तस्मान्नित्येष्वपि अस्त्ये

व प्रत्यवायपरिहाररूपं फलं तस्मान्नित्यान्यपि कर्माणि सर्वाभिमतस्य पाप

क्षयस्योपायत्वेन चोद्यमानानीति कर्तव्यतामपेक्षंत एव न तत्र सर्वांगोपे

तानामनुष्ठानं कश्चिदपि सर्वदा कर्तुं न शक्नोति ष्ठीवनादिनिमित्ते च तानि

विधीयंते निमित्तस्य चेतन्देवरूपयास्मिन्सति नैमित्तिकमवश्यं कर्तव्यं तन्ने

नयावज्जीवं कर्तव्यं सर्वांगोपेतं च कर्तव्यं इति देशकमेवान्ते नययाशक्तु यादि

स्तु पवध्यते तत्रावश्यमन्यतरस्मिन्नहोनत्वेनिमित्ते सति नैमित्तिकस्य कर्त ३३

अतं प्रधानवाक्यं श्रूयते। न च दिकस्य विदंगस्यानुरोधेन सति निमित्ते नैमि
त्तिकं न क्रियते तेनतः प्रधानवाक्यविरोधः स्यात्। प्रधानमात्रे श्रूस्या निमित्ते वि
धीयते अंगानि तु तदर्थतया प्रकरणेन गृह्यन्ते अतस्तानि प्रधानवाक्यगतावं
श्यकत्वानुरोधेन यथाशक्त्युपसंहर्त्तव्यानि इतरस्याप्रधानस्यावश्यकर्त्तव्यत्वं
श्रुतं हीयेत। तस्मात्प्रधानाविरोधेनांगानि यथाशक्त्युपसंहर्त्तव्यानि। नन्वेवं
हीनांगादपि प्रधानात्फलसिद्धेरभ्युपगमात्समर्थोप्यंगानि परित्यक्ष्यति। नैमे
वं। शक्तस्य कामतो गत्यज्यमानेनैव गुण्यं स्यादेव। अंगोपदेशं निमित्ते चालोच्यो
भयानुरोधेन यावत्संगानि कर्त्तुं शक्नोति तावद्विरूपेण प्रधानमेतः क्षपयती
ति शास्त्रार्थो विधार्यते। तावते व शास्त्रवशात्फलनिष्पत्तिरिति साधूक्तं विगुणे
फलनिष्पत्तिरंगप्रधानभेदादि। तत्र प्रयोगविध्यनुष्ठापकांगेषूच्यते। य
द्धि कुर्यादित्युच्यते। तत्र यथाशक्त्युपवक्ष्यते। यानि तु स्वभावसिद्धानि विधेयं
तरसिद्धानि योपजीव्यन्ते। यथा लौके धनार्जनादि। वेदेपि कालो विद्याग्न्य
श्वानेषां स्वरूपेणैवाधिकारी विशेषणत्वममावास्यासंबंधी द्रव्यवान्विद्यावा धा
नग्निमानिति। न तदुक्तं भवति। अंगं हि विधिबलादुपादीयते। निमित्तानुरो

धाह्वात्यज्यते। तु भयानुग्रहार्थं वाशक्तं प्रत्युपादीयते। अशक्तं प्रति त्वज्यत
इति नात्यागतिरस्ति। तत्रो भयानुग्रहो युक्तो यदि संभवति। संभवश्चोपादेयेष्वं
गेषु यथाशक्ति। व्रीहीन्संपादयेत्। यथाशक्त्यवहन्यादिति। आहवनीयादिस्व
रूपं तु नानेन विधिनोपादीयते। तस्मादग्निमान्विद्यावान् द्रव्यवान् जीवं
श्च यजेतैवमाश्रीयते। अतो विद्याग्निकालाद्युपरित्यागो। नान्येषामंगानां
यथाशक्त्यनुष्ठानसिद्धं। तथा बोधंतेत्र रत्नो। यानि प्रयोगविधिना कर्तुरूपादे
यत्वे[illegible]नां गानि चोद्यंते तेषामेव शक्तिपरिमितत्वं यावच्छक्नुयात्तावंति कु
र्यादिति। यानि तु विध्यंतरप्रयुक्तानि स्वयंसिद्धानि यांगत्वेन गत्यंते तानि स्वरू
पत एवाधिकारिविशेषणं। यथाग्न्यादीनि तेषामुपादानस्य प्रयोगविधि
नानुपादानान्नयावद्वक्तौ तु पदबंधसंभवः। किंतु तद्रूपेणोविधिस्तद्वंतमए
वाधिकरोतीति तेन सपत्नीकस्याविषयस्याख्यातोपात्तसंख्याविशिष्टस्याग्नि
मतो विद्यावतः प्रदोषादिकालसंयोगिनोधिकारो नान्यस्येति। एवं चाप्रतिस
माधेयांगवैकल्येप्यग्न्यादिमानधिक्रियेतैव आधानं तु न कुर्यात्तस्यानैमि
त्तिकत्वात्स्यादिति प्रायश्चित्तविधानाच्च। प्रायश्चित्तविधानादप्येवं ज्ञायते

य

नेत्तं द्विगुणेपि फलनिर्वृत्तिर्भवतीति। यदि च विगुणात्फलं तस्यात्तर्हि प्रायश्चि
त्तेन विद्धीतानर्थहि निःफलस्यांगैः कृत्यमस्ति। अस्ति च विधानं। तस्माद्द्विगुणा
दपि फलं भवतीति येषां मतं तेनित्येषु फलाभावेनापूर्वाभावात्तद्यैतिकर्तव्य
तानास्ति। तेषां प्रायश्चित्तविधानमस्येतानुपपन्नं। सेतिकर्तव्यतानाके तु निमि
त्ते भेदने सजाते वैगुण्यात्तत्परिहारायापरं होमारव्यमंगं भिन्ने जुहोतीत्या
दिकमुत्पन्नं संस्कृत्य एवं पक्षान्तरे तु सत्यामितिकर्तव्यतायां भेदने जातेपि
नास्ति वैगुण्यं गुणहानिर्हि वैगुण्यं अस्मिन्गुणेकस्य हानिः स्यात्। तत्र श्वा सम
स्तपक्षे एव प्रायश्चित्तविधानमुपपन्नमिति तथा च दृष्टं नित्यं कर्मयथाकथंचि
त्स्कन्तांग परित्यागेनापि प्रयाज्ञान्तं गोपेतमनुष्ठानं व्यत्वेकृतो दृष्टं। तथाहि
यत्स्ययोतस्यात्स्केवजुहुयात् इति व्रीहियवाभ्यामित्यादिनवाइहतर्हि किं चनासी
हश्चेनदह रूपनेव सत्व ऽ अद्धायामित्यं तेनगं थेन। तथा तद्देवयाहृत्कोहरूहो
तव्यमिति शास्वान्तरात्। तस्माद्द्विगुणोपि नित्ये प्रत्यवायपरिहाररूपं फलं भव
त्येव अतएवोक्तं कर्मपार्थेऽपा तद्दुरितक्षयो वा तत्स्य स्यमानदुरितप्रतिबंधो
वा भवत्येवेति। अथ काम्ये कर्मणि विंस्मते। काम्येपि विगुणेपि फलाभिनिष्पत्तिर्भ

दे॰ प
३५ वत्येवायत्तत्वात्राप्यंगानि प्रधानानि च भिन्नानि। अत एव कामेष्टौ प्रायश्चि-
त्तविधानमप्यस्ति। अत एवं प्रयुज्यते। अथातः प्रायश्चित्तानि। यदि दैवतं वाऽवस्कन्देद्वा
यव्यं पयोऽनुनिर्वपेदग्नये हि स्वाहा मेदिं देहि इत्यादि। तथा पंचशारदीयेऽपि तस्य
ह्यान्यत्र चूर्ण्यतां दोषप्रायश्चित्तविधानं दृश्यते। अपो न प्रियोऽसुमतन इत्या २
दिकं। यदि च विगुणादपि काम्यात्फलं तस्मात्प्रायश्चित्तविधानमनर्थमेव स्या
त्तथा च दृष्टं। विगुणादपि काम्यं फलं स्यादृचं वेदे दृष्टं। कारीरीमिष्टिं प्रचूर्ण्य
श्रूयते। यदि वर्षेत्तावत्येव जुहुयादिति। अत्रासमाप्तायामेव कारीर्यां तत्फलं
ह्यादिरूपं वेदे दृष्टं। अतो विगुणोऽपि काम्ये फलं सिध्यतीति पूर्वपक्षितेऽसिद्धां
तमाह तत्र तिलक्षणत्वात्। यदुक्तं विगुणोऽपि काम्ये फलं सिध्यतीति तत्र न्यायुक्तः
त्या अत तिलक्षणे काम्यस्य। यतः काम्यं सगुणमेव सर्वांगोपेतमेव श्रूयते स्वालक्षिते फ
लसाधनत्वेन विहितं। न त्वांगलोपे काम्यमानफलानुत्पत्तेः। तत्र प्रधानस्य
त्यागे यथा फलं नास्ति एवमंगत्यागेऽपि फलसाधनत्वं हि शास्त्रैकसमधिगम्यं
ततो यदंगं प्रधानं वा यावच्छास्त्रोपात्तं तस्य लोपे साधनत्वं नास्ति। अतो यदा सर्वा
गोपेतं कर्तुं शक्नोति तदैव तत्र प्रवर्तते। ननु यथाशक्ति। न हि तत्रांगत्यागे प्रमाणं ३५

35

मस्ति। प्रधानवाक्यसंत्यागेप्यविरोधात्। न हि तस्यावश्यकत्वं केनचिदुक्तं
यत औदासीन्येन लभ्येत। काम्यश्चानित्यस्तु समर्थोपि वर्त्तमानश्च स्वार्थतां न जहाती
ति नांगत्यागे प्रभवति। निमित्तश्चानित्यस्तु निमित्ते सत्यक्रियमाणो नैमित्तिके पीड्ये
त इति वैषम्यं। अनित्यो निमित्ते सति नित्यस्यावश्यकर्त्तव्यत्वबलात् सर्वदा सर्वा
ङ्गोपेतस्य केनापि कर्त्तुमशक्यत्वाद्यथाशक्त्या तथा कुर्यादित्येवं कल्प्यते।
काम्ये त्ववश्यकर्त्तव्यताभावादेवं कल्पयितुं न शक्यते। अतः काम्यं विगुणं फ
लं न साधयत्येवेति सिद्धं। ननु यद्येवं तर्हि काम्ये एवाश्वमेधपर्वशारदीयादौ
किमर्थं प्रायश्चित्तविधानमित्याशंकायामाह   प्रायश्चित्तं तत्काले। आस्तां
हि काम्यं अपथ्याकरणादिना विगुणमपि असमापने शिष्टविगर्हणरूपा
च्छिष्टाचारात्स्मृतिस्मृतेश्च आनिकल्पयित्वा अवश्यं समापनीयमेव। विगुणा
५ च्चयत्वेपि श्रुतं फलं न भवति। नन्वयापि नाह शास्त्रस्ववायपरिहारो न भवत्येव। अ
तएव तत्कालं तस्य काम्यस्य कर्मणो विनाशाकाले यत्प्रायश्चित्तं तत्तस्य विनष्ट
स्य कर्मणः प्रत्यवायपरिहारजनने उपकारकत्वात् स्वार्थकमेव भवति ननु भ
वतु प्रायश्चित्तविधानमर्थवत्। विगुणायां अपि असमाप्तायां कार्यं हि हि

दे॰प रूपफलदर्शनस्य काम्यकार्याकांक्षायामाह दृष्टे तत्परिमाणं। ज्ञात्वा दृष्टीयमा
३६ मिष्टो वर्षणो दृष्टे सति तत्परिमाणमेव कर्म कर्तव्यं। यत्परिमाणमदृष्टे वर्षणे
क्रियमाणेनानुदृष्टो दृष्टायां किमप्यूनं न्यूनाद्गो वा परिसमाप्तमिति। न च वर्षणान्त
स्या दृष्टेः फलं। किंतु कालस्वभावात्तन्निबन्धकापगमात्। काम्यस्य कर्मणो वी
36 नायां फलेच्छायां अवाप्ते वा फले अवश्यसमापनीयत्वं च जैमिनिनोक्तं षष्ठस्य
च द्वितीये वैरणे। प्रक्रमात्तु नियम्येतारंभस्य क्रियानिमित्तत्वादिति। अथवा एवं व्या
ख्या॥ वर्षणे दृष्टे सति तत्परिमाणमेव कर्तव्यं। यावत्परिमाणेन तेनेष्टिरिह दृष्टा
तत्परिमाणमेव कार्यं न समापनीयमिति स्वार्थः। पञ्चवर्षेणावस्येव जुहुयादिति व
चनान्नान्यथा वोक्तं कर्मचार्यैः। न तत्तावत्समाप्तं ता कर्मणोऽवमनमिति। वाक्य
प्रकरणाभ्यामंगविनियोगमुक्त्वा। अधुना लिंगेन मन्त्राणां विनियोगं वक्तुका
मो ध्येत्प्रसिद्ध्यां मंत्रानाह २ ऋग्यजूंषि सामानि निगदा मन्त्राः। ऋगा
दयो निगदान्ताश्चत्वारो मन्त्राः। तत्रार्थवशेन यत्र पादव्यवस्थासा
क ऋक्। तत्र समिधाग्निं दुवस्यतेत्यादि। यत्र मन्त्रस्य क्षेण समासो थीह ऋषेनै तत्रार्थ
वशेन पादव्यवस्थाय तत्र च क्रिया पदानुषादानात्सु समिद्धाय शोचिषे तं त्वा समि ३६

ष्ठिरंगिरइत्यादेरप्यपर्यवसितोर्थस्तत्रहेतुवशेन पादव्यवस्था भवति। अतश्च
यत्र नियताक्षराणि नियताश्च पादाः नियतानि चावसानानि सा ऋगित्युच्यते।
अनियताक्षरपादावसानं यजुः। यद्यपि प्रगीतं मंत्रवाक्यं सामेत्यभियुक्तप्रयो
गः। तथापि तत्र विशेषणं गीतिः विशेष्याणि ऋगक्षराणि। नागृहीतविशेषणा
विशेष्ये बुद्धिरिति प्रथमप्रतीयमानत्वात् गीतिरेव सामेत्युच्यते। तथा च वक्ष्य
तीपुरथंतरं गायति। यद्योन्यां तदुत्तरयोर्गायति। बृहत्साम गायति प्रजाप
तेर्हृदयमनुचं गायतीत्याद्युपपन्नं भवति। अतस्तद्गक्षरातिरिक्तं यजुरिति शब्द
वाच्यं तन्नाम शब्देनोच्यते। ननु यदि रथंतरादिशब्दा गीतेरेव वाचकास्तदा रथं
तरेण स्तुवीतेति कथं स्तुतिसाधनत्वं गुणगुणिसंबंधकीर्तनं हि स्तुतेः सा च गी
तिरूपेण साधनं न संभवतीत्युच्यते। गीतेः स्वयं स्तुतिवाचकत्वाभावादृगक्षर
प्रकटनद्वारा स्तुतिसाधनत्वं भवतीति नोक्तदोषः। निगदाः प्रैषाः परसंबोधना
र्थाः प्रोक्षणीरासादयाग्नीदग्नीन्विहरेत्येवमादयः। ननु निगदा अपि यजुष्वे
व। ततः किमर्थं पृथगुक्ताः। उच्यते। उपांशु यजुषा उच्चैर्निगदेनेति धर्मभेदेन य
जुःष्वनंतर्भावशंकया पृथग्वचनं। वस्तुतस्तु निगदानां यजुष्ट्वमेव। परसंबोधना

दे॰प्र
३७

र्थत्वान्तृचे र्लिंगदेनेति धर्मभेदः। न च धर्मभेदाद्भेदः। तत्र क्वाम योरपि बहु
पां शुप्रयोगविधानात्। अत्र तस्तोविष्णुमेकमंत्राणां तयाचोक्तं। अहिर्बुध्न्यमं
त्रमे गोपायमृषयस्तोविदो विदुः ऋचो सामानि यजूंषीति। त्रीन्वेदान्विदंति
त्रिविदः। त्रिविद्यासंबंधिनो ध्येनारस्तोविदाः। ते वयं मंत्रभागमृगादिरूपेण त्रि
विधमाहुस्तं गोपायेति योजना। ऋग्यजुःसामात्मको मंत्रभेदोभिहितः। तत्र कां
37 चां तरभेदाकांक्षायामृचां साम्नां चाधीवृत्तप्रसिद्ध्यैव भेदे सिद्धे लक्षणं न क्रियते। य
जुषां तु प्रश्लिष्टपठितत्वात्तत्र लक्षणं विना भेदो न ज्ञायते इत्यत आह। तेषां पाकां
निराकांक्षं तत्पादमिति तत्र छंदे न यजुषां निर्देशः। ऋचां साम्नां च भेदे लक्षणापेक्षा
भावात्। ननु यजुषामपि भिन्नप्रतीकविनियोगाद्भेदः सेत्स्यति। सत्यं। न तावत्
त्सर्वेषां प्रातिस्विकेन विनियोगोस्ति। न च परस्परं नाप्यवांतरस्येतत्र लक्षणं वेदक्वथ
ने। न्यायेन तु सत्रकृतेदमुक्तमिति तत्र तो लक्षणमुच्यते। तेषां यजुषां प्रश्लिष्ट
मधीतानां मध्ये यावत्पदसमूहं निराकांक्षं पूर्वापरपठितपदांतराकांक्षारहितं
तावत्पदसमूहात्मकमेकवाक्यार्थदर्शकमेकं यजुः। अर्थैकत्वादेवं वाक्यं तत्र यजु
रंतरं चेत्युक्तं भवति। सर्वमंत्राणामनेन यजेतानेन यजेतेति प्रथमं प्रकरणं

म्नानानुमितवाक्यविनियोगो भवति। ततः साक्षाद्यागसंबंधासंभावा
त्तदुपकारिप्रकाशने तैरिष्टं भवतीत्येवं कल्प्यते। तेन यावता पदसमूहे
न यागसाधनं स्मार्यते तावद्यजुर्वाक्यं। क्वचनार्हं हि वाक्यं कार्यसमर्थं च तदर्हं
भवति न न्यूनमधिकं वा। न ह्येकार्थसाकांक्षावयवं वा तद्ध्याहेवस्यलाघवितुः
प्रसवइति अत्र हि सर्वाणि पदानि गृहणप्रकाशनार्थानि अतएकार्थानि सा
कांक्षाणि च। तस्मादेषामेकं यजुस्त्वं। एवं सर्वत्र पुरस्तात्परस्ताच्चैकार्थपदं विभो परिग्रहणासम र्थपदं
वेन भिन्नानि यजूंषि कल्प्यंते। एकप्रयोजनं साकांक्षं पदजातं एकं यजुरित्युक्तं
। अनेन लक्षणेन यत्र समवेतार्थप्रकाशकं गृह्णामीत्यादिकं पदमस्ति तत्रैत
त्सुगमं परिमाणं। अत्र यत्र समवेतार्थपदाभावाद्धैतौगिकविनियोगाभावे
वार्वनिक एव विनियोगः परस्परनैराकांक्ष्यं च स्वरूपतोवगम्यते। यथेषे
त्वोर्जे त्वेति। यथा वायुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतामिति। तत्र विषयदे
कं यजुरिति विंशयते। किं प्राक् दृष्टार्थमंत्रावधेरेकमंत्रत्वं उत यावदेव मिथः
संबद्धं इषे त्वेति तावदेकं यजुरन्यत्तु यजुरन्तरमिति। तदर्थं च किं सर्वमेकार्थ
मुत भिन्नार्थमिति विचारः। तत्र तावदनुष्ठेयार्थप्रकाशनादेषामदृष्टार्थत्वं

दे.प
३०
38

अग्रहणे चात्र कल्प्यमानं एकमेव कल्प्यं नावनाप्युपपत्तेः। बहुग्रहणे कल्प
नायाभिः प्रामाणिकत्वाच्च। अतः सर्वेषामेकार्थत्वात् प्रत्येकं साधनत्वा
नय भावात्संहत्यकारित्वाद्धि भज्यमानानां साकांक्षत्वमस्तीत्येकवाक्यता।
कथं पुनरेकत्वपक्षे प्रतीकभेदेन विनियोगः। इषे त्वेति शाखां छिनत्ति ऊ
र्जे त्वेति अनुमार्ष्टि। कथं च वत्सान् वाचयतीति बहुत्वनिर्देशः। उच्यते
। आदिमध्यावसानग्रहणेनैकोऽपि मंत्रस्तत्र विनियुज्यमानो न पीड्यते। या
वद्धि विनियोगं सकले आवर्त्तिष्यते खंडस्याप्रयोजनत्वात्। कल्पतां कल्पतामि
ति च पुनः पुनः प्रयोगाद् एकवाक्येऽपि बहुवचनाविरोधः। तस्मादेतेषामे
कार्यत्वमेकमंत्रत्वं चेति प्राप्ते आह मिथः संबद्धं। यावदेव मिथः संबद्धं प
रस्परसंबद्धं अन्वययुक्तमिष्टत्वेत्येतावत्। तावदेकं यजुः एकं वाक्यं। ततोऽन्य
द्वाक्यांतरं यजुरंतरमिति। यद्यपि एषां समवेतार्थप्रकाशकपदार्थत्वादेह
कार्थत्वं। तथापि न तस्मादेकत्वं। यतो विनियोगप्रयोजने रूपादुत्तरका
ले। नहि विनियोगप्रयोजनोत्तरकालं रूपनिरूपणं युक्तं। अत्रोत्तररूपस्य वि
नियोगाशक्तेः अविनियुक्तस्य च प्रयोजनकल्पनानुपपत्तेः। रूपं तु निरपे ३०

क्षेपपाठादेवावधार्यते। तत्कालावच्छिन्नभेदानुवर्तित्वं च प्रयोजनविनियोगयोः
।प्रमाणं चन्द्राद्यवच्छिन्नस्य पञ्चहस्तानिकः। स्यादेतत् यद्यपि प्रमाणेनैवं त्वेकहस्तानिकत्वा
नि सुबहून्यपीति। न चैकरूपोपलब्धिवेलायां परस्परसाकाङ्क्षत्वमेव प्रयोजन
त्वं चोपलभ्यते। तत्र च निर्विरोधे भेदे निर्धारिते पश्चादेकत्वापादनकारणं
किमपि न संभवति। न च प्रागनुपलब्धं साकाङ्क्षत्वं पश्चात्कल्पयितुं शक्यते
। न चैतेषामदृष्टार्थत्वं च ब्राह्मणोपदिष्टदृष्टार्थसाधनत्वात्। तथा वैरूप्ये त्वे च
ति मन्त्रः द्वारवाच्छेदनेकरणत्वेन ब्राह्मणेनोपदिष्टः। क्रियानिष्पादकं च कर
णं। न च मन्त्राणां क्रियानिष्पादकत्वं तत्प्रकाशनादन्यत्किमपि संभवति। ते न वि
धिबलादेषां प्रकाशनार्थत्वं। तत्र च तद्बलेनैव चैषां यावत्ताविना विहित
प्रकाशनसामर्थ्येन। इति नावदनाम्नातमपि अध्याहर्तव्यं। किं नयोत्यादि
। यद्यायदेवरयघोषेण माहेन्द्रस्य स्तोत्रमुपाकरोतीति वचनाद्वाचकस्या
पि विनियोगानुसंधानेन स्तोत्राभिमुख्यचिह्नत्वं भवति। एवमिषेत्वेत्यादी
नां छेदनादिस्मरणादिहेतुत्वं। उभयमपि चेत्तत्प्रमाणवशादिति सत्रकारैः के
श्चित्कथंचिदाश्रितं। सर्वथा तत्रैकमध्यवसातव्यं। विकल्पे वा कथं प्रयोगासंभवा
चि

दे॰ प्र ३८

द्वावक्यप्रयोगानुपपत्तेश्चाध्याहारः। यथाम्नातविनियोगानुसारात्ताद्
शे नैव समर्थं संस्काराधाने पतितत्वात् तन्त्रानुष्ठानेभिप्रायाधीनोन्यतरपरिग्र
ह इति तन्त्रटीकायां। नन्वेवं नव्येदनं प्रकाश्यते अन्येनानुमार्जनमिति। हविष्प्र
योजनभेदात् पिसिद्धो वाक्यभेदः। तथा श्चापुर्याजेन कल्पतामित्यादीनामपि
स्वरूपतो निराकांक्षत्वात्। ऋत्वीर्वा वयतीतिष्ठपि वर्हिर्वनस्पत्योदितत्वा
39 त्तत्संपत्त्यर्थमायुरादिविशिष्टतद्धिभेदप्रकाशनपरत्वादर्थभेदेन मंत्रभेदः
। तदेवं साकांक्षस्य यजुषो विहितार्थप्रकाशकत्वनिर्वाहियोग्यपदाध्याहारे
उक्ते पियत्र संनिहितेन वाक्यो मंत्रशेषो हइयते। साकांक्षे च मंत्रे ताद्दशएवापेक्ष
तानग्रया।। अस्मादन्नाद्यस्य प्रतिष्ठायाइत्यादौ। तत्र किं लौकिकः शेषोध्याहा
र्यो ऽथ उत यः पूर्वमंत्रानंतरपठितः निर्भक्तो यो स्मान्द्वेष्टीत्यादिः स एवानुषंजनी
य इति। किं प्राप्नोति लौकिकोनुषंजनीय इति। लौकिको हि शब्दः सर्वार्थो यथे
ष्टं सर्वत्र विनियुज्यमानो न विरुध्यते। वैदिकस्तु यदर्थमाम्नातस्तत्रैव निबद्धो
नान्यत्र नेतुं शक्यते। तस्माल्लौकिक इति प्राप्ते उच्यते। वेदे नैवापेक्षितं तद्रूपे
वाक्यशेषसमर्पितेनिः प्रमाणोक लौकिकशेषकल्पनं न युज्यते। तस्माद्वैद ३८

दिक एव निर्मन्त्र इत्यादिः शेषोऽस्मादन्यादित्यत्रानुषंजनीयः अस्यै प्रति
ष्ठायाऽ इत्यत्र चानन्वध्याहारानुषंगयोः को विशेषः। उच्यते। अध्याहारो लौ
किकः। अनुषंगस्तु वैदिक इति। प्रयोजनं एतच्चिंतायाः। अध्याहार विना
शोऽस्मात्तु प्रायश्चित्तं। अनुषंगवि नाशे तु श्रौतमिति। एवमूह प्रवरनाम्नां
लौकिकत्वं न मंत्रत्वं। सं ते प्राणो वातेन गच्छतामिति। यत्र गच्छतामित्येतस्य मे
दैकवचनांतत्वात्समंगानि यजत्रैरित्यत्रान्वेतु मयोग्यत्वान्नानुषज्यते
। तद्व्यवायेन बुद्धि संनिध्यभावाच्च संपद्यपतिराशिबेत्यत्रापि नानुषज्यते
। तेनानयोर्गच्छतां गच्छतामित्यध्याहारो यथाक्रमं कार्यो तत्राध्याहारपक्षा
श्रयणे सौकर्याय ते प्रदर्शयंते। तत्र दर्शपूर्णमासयोरिषे त्वेत्यत्र छिनद्मी
त्यध्याहारः। ऊर्जे त्वेत्यत्र संनमयामीति। इमौ चाध्याहारौ सूत्रकृतैवोक्तौ। व
र्मणो वामित्यत्राददे इति। उरुवाता यमवेति। प्रेक्षे इति केचित्। नाभृतायत्वा
नारातये परिशेषयामीति। प्राणाय त्वेत्यादिषु पिनह्मीति। चक्षुषे त्वेत्यत्र
ईक्षे इति। इषे त्वेत्यत्राधिश्रयामीति। त्रिताय त्वेत्यादिषु निनयामीति। ऊर्जे
त्वेत्यत्रोद्वासयामीति। संज्योतिषा ज्योतिर्गच्छतामिति चावसम्यक् त्वेत्यादिषु न

उक्षामीति। संगच्छतं यज्ञपतिराशिषेति चावहरणमघासेषु अनुत्वा देवा वीत
ये हरामीति। भूतेभ्यस्त्वा उद्गच्छामीति चाप श्रोविषु वेत्वा उपस्तृणामि दिवे
त्वेत्यादिषु प्रोक्षामीति। सुपिप्पलाभ्यस्त्वौषधीभ्यः प्रतिमुञ्चामीति। यूपायो
च्छ्रीयमाणाय। यूपायपरिवीयमाणायेति च। अग्निमन्थने। अग्नये जा
तायेति। अग्नये प्रह्रियमाणायेति। पशुसमञ्जने। संगच्छन्तामङ्गानि यज
त्रैः संगच्छतां यज्ञपतिराशिषेति। शेषनिषेके। शामहोभ्यो निषिञ्चामीति। सो
मे। स्वाहा यज्ञं मनसः इत्यत्र आरस्यानुषंगः स्वाहोरोरिति। स्वाहा द्यावापृथि
वीभ्यामित्यनयोर्यज्ञमारभ इति। स्वाहा वातादित्यस्यां यज्ञमिति। त्वेष्यः सं
तु मेष्यः संस्थिति। प्रजाभ्यस्त्वा बध्नामीति। हविर्द्धाने स्कूणनिखनने। विस्र
वेत्वा उपनिहन्मीति। तन्नो सहासु। तन्मे क्षितिरिति च। सुत्यायां। सोमम्मानेड्रा
यत्वेति पंचसु मिमे इति। देवेभ्यस्त्वा मरीचिपेभ्य उपमार्ज्मी इति। ग्रहसादनमं
त्रेषु प्राणायत्वेत्यादिषु साकांक्षेषु सर्वत्र सादयामीति। ग्रहणमंत्रेषु च सर्वे
षु साकांक्षेषु गृह्णामीति। उपांश्वंतर्यामाग्रयणोक्थ्य ध्रुव वर्जं। शुक्रामंथिसा
दने सादयामीत्यस्याभावः। महावीरसंभरणे पिंडादेः आदानेमखायत्वा ४०

40

मखस्य त्वा शीर्ष्णे आहृद्धेद इति परिगृह्णामीति वा। संभाराभिमर्शने। मखा
य त्वा मखस्य त्वा शीर्ष्णे अभिमृशामि निधाने। निदधामीति। संसर्गे। सं
सृजामीति। करणे करोमीति। अंतिमाभिमर्शने अभिमृशामीति। श्लक्ष्ण
ने श्लक्ष्णयामि प्रदहने प्रदहामीति। ऋजवे त्वेत्यादिषु उद्धयामीति। अ
जा पयोवसेके अवसिंचामीति। यमाय त्वेत्यादिषु प्रोक्षामीति मधु मधु
श्चा धूनोमि उपवाजयामि इति वा। चयने। प्राणो भक्षं इत्यादि विराजामुप
धानमंत्रेषु मया उपधीयत इत्यध्याहारः। प्राणेन सुपंचस्वपि कंडिका
सु इह शर्म इह श्राम मंत्रे अध्याहाराभावः गृह्णामीत्यनेन निराकांक्षत्वात्। आ
युस्तिष्ठ इति कंडिकापठितेषु धत्रैव तु षोमइत्यंतेषु च मयाउपधीय
त इति। वात रंहि त्वा सुव आयुषे त्वेत्यादिषु त्वांनेषु अप्रश्रासु मंत्रेषु उपद
धामीति। यंत्री राडित्यत्रासीति। मूर्द्धासि राडित्यत्रासीति दर्शनात्। अ
स्याप्यनेन समानार्थत्वात्। पशुशिरसि नासिकयोः प्रस्फुषो प्रहिरण्य
शकल प्रासने प्रास्यामीत्यध्याहारः चक्षुर्षमंत्रेषु त्वचे त्वा प्रास्यामीत्यादि
। अग्निर्ज्योतिषेत्यस्यां ते अहित्विति। पुरुषशिरस उद्ग्रहणे सह स्नाय त्वा उ

दे॰ प्र॰ श्री
४१

गृह्णामीति। हिरण्यशकलप्रोक्षणे पंचमे मंत्रे सहस्रायत्वा प्रोक्षामी
ति। अश्मस्ते क्षुदस्तु मयि त ऊर्गस्तु इति। वाजपेये ऐन्द्रेषु ग्रहेषु ग्रह
णे नाध्याहारः। अन्येषु सर्वेष्वपि ग्रहणे सादने च गृह्णामि सादयामीति
चाऐन्द्रेष्वपि सादनमंत्रेषु भवत्येव। सप्तदशसु सोमग्रहेषु सादने एवमे
षते योनिः सादयामीत्यध्याहारः। न ग्रहणे। एवं सौत्रामण्यां च ग्रहणे सा
दने च। अंगालंभनमंत्रेष्ववक्ष्यते। पिष्टमेधे अग्नेर्वो जसा सूर्यस्य वर्चसेत्यन
योः पुनातु पदस्य अनुषंगः। तदेवं मंत्रस्वरूपेण द्वैदेवो जेते षां प्रकरणप्रमा
णेन सामान्येन विनियोगे सिद्धेऽधुना लिंगप्रमाणेन विशेषविनियोगमाह ते
षामारंभेऽर्थतो व्यवस्था तद्वचनात् तेषां मंत्राणामारंभे प्रयोगे अर्थतः विहि
ताथाभिधानरूपेण सामर्थ्येन लिंगेन अनेन मंत्रेणायं पदार्थः कर्तव्यः। अ
नेनायमित्येवंरूपा व्यवस्था भवति। यो मंत्रो यस्य पदार्थाभिधानसमर्थः स तत्र
विनियुज्यत इत्यर्थः। कुत एतद्वनानर्थकमेवार्थवत्त्वादिति तदुच्यते। तस्याभावस्त
त्वं तस्मात्। यत एतमेवार्थं वक्ति शब्दो नार्थान्तरं प्रयाजादिरूपं प्रयाजादिरूपं यस्ये
ति अयं प्रयत्नमेवाभिधातुं समर्थः अत एतत्रैव विनियुज्यते। ननु सूत्रकारः ४१

41

प्रतिपदार्थं मंत्रविनियोगं वक्ष्यत्येवाधिकमर्थमिदमुक्तं। अनुक्तसंग्रहार्थं
। यथाप्रवृत्तं सर्वानर्थानिति प्रतिमंत्रमित्यादौ मंत्रान्तैः कर्मादिः सान्निपात्यो
ऽभिधानात्। कर्मसु ये मंत्राः पठ्यन्ते तेषां मंत्राणां मंत्रैः सह कर्मादिः क्रियमाण
स्य कर्मणः आदिः सान्निपात्यः संयोजनीयः कृतः। अभिधानात्। यतो मंत्रपठि
तएव संकर्माभिदधातीति वर्ति। नान्यथा। ततो मंत्रेण स्मारितं सन् कर्मानुष्ठीयते।
सकलस्य मंत्रस्य विनियुक्तत्वात् सकलेन संपादितं संस्मरणं कर्माङ्गं। अतः सकल
मंत्रसमाप्तौ जनितं स्मरणं यावद्देवानां पश्यत्वं तावदेव प्रयोगः कर्तव्यः। तेन मं
त्रान्तश्च कर्मादेश्च संनिपातः अनियमं वा स्यात्। वा तस्य आचार्यो मंत्रप्रयोग
स्य कालानियमं ब्रवीति पूर्वे क्रियमाणे वा तते वा कर्मणि मंत्रः पठितव्य इति
। मंत्रस्य कर्माभिधायकत्वमेवमपि न वस्येव। अथ सिद्धान्तमाह आदि त्वा
चार्याः। उशत्वेवास्य मतनिरासार्थं।। आचार्याः सर्वेपि मुनयः कर्मण आदि
मेव मंत्रान्तैः सह योजयन्ति नानियमः। यतो मंत्रेण स्मृतं कर्म कर्तव्यं। न हुक्तं। अ
नुष्ठाने पदार्थानामवश्यं भाविनी स्मृतिः। अनन्यसाधनानन्यकार्यैः मंत्रैः प्र
साध्यते न तावदनुष्ठानवेलामस्मृतः कश्चिदपि पदार्थः शक्यः कर्तुमित्यवश्य

वे॰ द॰ श्री
४२

42

भाविन्यास्तस्या योग्यसाधनमात्रापेक्षणाद्युक्तिंविद्धास्तेण पदार्थानुष्ठानेसं
नंवा पूर्वपदार्थप्रसवे क्षणेवास्तत्वग्रंथोवाक्यात्मीयग्रहणाकथाक्यान्निवोप
द्रष्टावासाधनंगृहीत्वुमारभ्यते।तत्रानन्यप्रयोजनात्प्रकरणेपठ्यमानासामा
न्यतः किमध्यभिरकर्त्तव्यमित्येवंप्रयोगवचनेनगृह्यमाणमन्त्रानुपलभ्यया
हशेनवाक्येनस्मृतिं।कर्त्तुमाकांक्ष्यतेतत्राहमप्राणइति विदित्वालिंगप्रकरणानु
मितयाश्रुत्या विनियोगे सत्यभिधानार्थतां विज्ञायते।तत्रश्रोध्यायांतराणप
प्रमाणकवान्निवर्त्तते।नियमादृष्टसिद्धिश्चमंत्रैरेवस्मृतं कर्मकृत्वा सुदृष
कारिनवतीत्यवधार्यते।यत्रत्वमंत्राभावस्तत्रविधिवाक्येनैवात्रदृसंभवेऽप्य
यांतरेणापिपदार्थस्मृतिःकार्या तत्स्मादायुक्ताः।तेमंत्राःसत्त्रमध्ये आयुक्ता
श्चादिमात्रेणोक्ताः सेतः प्रयोगकाले सकलाः प्रयोज्याः।ननुसत्त्रमध्येयावान
वयवडपातस्तावन्मात्राइति पराहिनापूर्वोक्तः।परस्यमंत्रस्य सत्रोपात्तेना
दिनाविदूभूतेनपूर्वस्यमंत्रस्यांतोज्ञेयः।नन्वेतन्नचवक्तव्यंवाक्यलक्षणेने
वमंत्रांतस्यसुगमत्वात्।सत्यं।कचिद्वाक्यसमूहस्यैकमंत्रत्वसिद्ध्यर्थंपुनरुक्त्य
नट्टस्यदोषः।तद्यथाविश्वेषांदेवानांभागधेयीस्थेतिसमाप्ते पिवाकेप्यमूर्ण ४२

उपसर्पो यात्रित्यादि प्रयुज्यते। यथा बाहुगृहीतं जुहोति संततमुरुहकन्युंजान
इत्यस्त्राह्मणानामेव कर्मत्वं। तथा देवस्यत्वेत्यभिमाहाये त्यत्रेतयाणां मन्त्रत्वं। वि
त्यंगच्छंतिपंवदिशइत्यादौ च उपांशु प्रयोगः। श्रुतेः। तेषां यजुषां यजुर्वेद
मंत्राणां कर्मसूपांशुप्रयोगो भवति। कुतः श्रुतेः। उच्चैर्ऋचा क्रियते उच्चैः साम्नो
पांशु यजुषेति शाखान्तरे श्रवणात्। स्वशाखायामपि सयत्उपांशु यजुर्भिश्च
शेष्यः रन्तीत्यादि श्रुतेश्च। अत्रेति न्यसैल्पायो वेदा अजायन्तेति वेदान्यथ [illegible] म
ध्ये उच्चैर्ऋचा क्रियत इत्यादीनि वाक्यानि पठित्वा पुनरपि वेदेनैवोपसंहारोऽस्ति
। तेनात्राग्रगादयः शब्दा वेदोपलक्षकाः। तेन न ऋचा ऋग्वेदेन विहितं साम्नासा
मवेदेन विहितं चोच्चैः। यजुषेति यजुर्वेदविहितं चोपांशु इत्यादि। अस्य सत्रस्ये
हि पशुसोमव्यतिरिक्तं कर्माग्निहोत्रादिकं विषयः। एते श्रुतिश्रो यस्य वक्ष्यमा
णत्वात् न संप्रैषाः। संप्रैषा निगदाः। प्रोक्षणीरासादय अग्नीदग्नीन्विहर। हरय
जमानवाचं यच्छेत्येवमादयः। याजुर्वैदिका अपि संप्रैषा उपांशु न प्रयोज्याः
। अन्यबोधनार्थो हि ते। न चोपांशुच्चारितै रेभिरन्यस्य बोधनं संभवति। तस्मात्ते
उच्चैरेव प्रयोज्याः। शाखान्तरे दर्शपूर्णमासयोः श्रूयते। बर्हिर्लुनाति ज्ञितत्रे दं

43

चिंत्यते। किं बर्हिःशब्दः संस्कारनिमित्तं जातिनिमित्त इति। न च बर्हिःशब्द
स्य शास्त्रे सर्वत्र संस्कृतेष्वेव दृष्टेषु प्रयोगात् यूपाहवनीयादिवत् संस्कारवाची ब
र्हिःशब्द इति प्राप्ते। आह कोऽयं बर्हिः। बर्हिः कौशं। कुशा दर्भाः। तस्येदं कौशं।
कुशजातिमात्रमेव बर्हिःशब्देनोच्यते न संस्कारः। कुतः। अन्वयव्यतिरेकाभ्यां
जातिवाचित्वाद्बर्हिःशब्दस्य। यत्र यत्र बर्हिःशब्दप्रयोगस्तत्र तत्र जातिरस्त्यस्या
व्याप्ते लौकिके वैदिके च नास्ति व्यभिचारः। संस्कारव्याप्तेस्तु लौकिकप्रयोगे व्यभिचारो
दृश्यते। क्वचिद्देशविशेषे लौकिकव्यवहारे जातिमात्रमुपजीव्य विना संस्कारं ब
र्हिःशब्दः प्रयुज्यते। बर्हिरादाय गावो गता इति। तस्मात् जातिवाची बर्हिःशब्दः अ
संस्कृतं कुशमात्रं बर्हिःशब्देनोच्यत इत्यर्थः। प्रयोजनं। बर्हींषि प्राक्सुदर्भांश्च वि
प्राप्स्यते। तस्माद्दोषसंस्कारा न कर्त्तव्याः। स्मृतौ कुशाभावे तु काशाः स्युः काशाः कुशस
माः स्मृताः। काशाभावे ग्रहीतव्या अन्ये दर्भा यथोचिताः। दर्भाभावे स्वर्णरू
शा प्यताम्रैः कर्म त्रिमाः सदा। कुशाः काशाः शरो दूर्वा यव गोधूम बल्बजाः। सुवर्णं रा
जतं ताम्रं दश दर्भाः प्रकीर्तिताः। स्नाने होमे तथा दाने स्वाध्याये पितृतर्पणे। स
पवित्रो सदर्भो वा करो कुर्वीत नान्यथा। सर्वेषां वा न वेद्याभ्यां पवित्रं ग्रथितं नवा। ४३

सपवित्रः सदर्भो वाक्संयमनं चरेत्। नोच्छिष्टं तत्स दर्भेच दर्भोच्छिष्टं तु वर्ज
येदिति अर्थात्परिमाणं। अग्न्यगाराद्वैवसोर्द्वारा होमे च स्रुचः स्रुचस्रुचा। अ
र्थात् परिमाणं भवति। यावता परिमाणेनार्थः प्रयोजनं सिध्यति तावत्प रि
माणं भवतीत्यर्थः। परिमाणान्तरस्यानुक्तत्वात्। प्रयोगाद्बर्हिरेवशुष्के ष्विवह्ना
जश्चमद्रस्यत आरभ्य वेद्यां हेत्येस्यर्यन्तं पठनाक स्मिन्श्चिस्यान्नेसं नतं घृतं स्रु वप्र
णालिकयानिनीयत स्याज्जस्यतोलनाघु पायेन परिमाणं निश्चित्य तावदाज्यं
पत्परिमाणायां स्रुचि मातितावत्प्रमाणेनास्रुवं कुर्यात्। तस्याज्यस्य पंचमभाग
संग्राहकश्च स्रुचश्च कार्यः। एवं यदा षडष्टपत्ता माये पावके स्विवेश्वानरे इत्यादि
कं क्रियते तदापि वेदः पश्चाद्भागो र्थो तावत्परिमाणो विपुलः कार्यो यावति
आवरोतमुत्तरठं हविषी तिन्यायेन सर्वेषामुदकं स्रुच्मासादनं संभवति। तदनु
सारेण प्राचीप्रमाणं पुरस्तात्तिर्यक्प्रमाणं च यादृशेनेकस्थ्यं। तदुक्तं शतपथे। याव
तीमेव स्वयं मनस्या मन्येत तावतीं कुर्यादिति। सूत्रे चोक्तं। मपरिमितां चेति। अप
रिन्त्राश्रोत्रप्रमाणो नियमपरदृत्तिव स्यामः। एवं बर्हिर्होविर्द्भ्य परिमाणमनुक्तो
सर्वत्रोत्यं अयुग्धातून्नियूनन्निदृध्मबंधनबर्हिबंधनार्थानि सूत्रानिःसंन्त

दे.प्र.श्री
४४

55

हना निरञ्जवो स्रुग्भ्यामूनिमववंति। मानव स्तृणमुष्टिप्रक्षेपः। अयुजो विषमानेक
ति पंच सप्त नवादि विषम संख्या धानवो ये बांतान्यसुग्भ्यामूनि। तथा चापस्तंबः
। त्रिधातु पंचधातु वा स्रुत्वं करोतीति। स्रुत्वं रज्जुमित्यर्थः। तथा। समत्कानामम
त्कानां वाहर्भीणां पूर्ववत्स्रुत्वं तत्वोदग्गं निधायेति। धमप्रस्तावे। मानवे चा स्रुत्वं
प्रति दध्या स्रुग्भ्यानुप्रदक्षिणमिति। तैत्तिरिसतेः। अथ त्रिरन्वाहितं स्रुत्वं ह
त्वेति। अथ बर्हिषो बंधनप्रकारमाह प्रागग्रे पूतदुदगग्रं बर्हिराचिनोति। प्रा
ग्रे पूते प्रागग्रं संनहने बंधनार्थं यां रज्जो उदगग्रं बर्हिराचिनोति। बंधनार्थे स्थाप
यति। अथ धर्मं बंधनस्य प्रकारमाहे उद[illegible] नवगूहति। इध्मबर्हिं बंध
ना नार्थां यां पूतां ग्रंथी। ग्रस्य गवगूहति नेन गाढं बध्वा पूतस्याग्रमक्षेसंकलुं प्र ग्र
दक्षिणमावेष्ट्य धम बर्हिषो रग्रभागप्रोतपित्वा पश्चादिति तयो मूलभागे अव
गूहति ये रपति। यस्य कञाहेनद्य धम बर्हिषोः पश्चाद्भागो मूलभाग उत्पन्ने दि
ग्नाचिनो बर्हिः स्रुदगग्रे निहितं अ संभवात्। काठके। ग्रंथिं कृत्वा पुरस्तात्सं
च मपकर्षतीति। मानवे। स्रुत्वं स्याती समायम्य पृष्ठाते ग्रंथिमिति प्रदक्षिणमा
वेष्टयति सतेमाच्छादयति पश्चात्तां च मयकर्षतीति। तैत्तिरीये पायपश्चात्सां च मु ४४

उरगप्रागग्रमिध्मं आचिनोति स्नुवर्तते उदगग्रे युने संहनने प्रागग्र
मिध्मामाचिनोति बंधनार्थं निदधाति प्रसङ्ग

उपगूहतीति। आपस्तंबः। पुरस्तात्प्रत्यंचमुपगूहतिपश्चात्प्रांचमिति। अ
ष्टादशेध्मं परिधिवृक्षाणां परिधिनो वृक्षाः पालाशायैकंकतादयः परिधि
वृक्षाः। तेषांपरिधिवृक्षाणांसंबंधिनमष्टादशसंख्याकाष्ठकमिध्मंकुर्यात्।
मानवे। समूलैर्दर्भैः पालाशंखादिरं रौहीतकं वाष्टादशदार्विध्मं संनह्यतित्री
न्परिधीन्योयज्ञियवृक्षस्तस्येति। काठके। अष्टादशदारुं सुषुं समानवृक्ष
स्यसंनह्यतिविंशतिमिध्मायसुंबंधे चेति। अतएवसामिधेनीविवृद्धौ काष्ठ
वृद्धिर्भवति। ह्रासे च ह्रासो न भवतिपित्र्यादौ। तथाबौधापस्तंबः। सामिधेनी
विवृद्धौकाष्ठानिविवर्द्धयेत्प्रतिह्रसमानासुप्रह्रसेदितिउपसत्सुतुमात्रावृद्
ध्माबर्हिरितिषचना ह्रासः। इध्मप्रमाणंचारत्निरितियज्ञपार्श्वेनिगमेच
। प्रादेशद्वयमिध्मस्यप्रमाणंपरिकीर्तितमितिकात्यायनः। तथा सामिस्यवि
त्रं वेदं च त्रयं प्रादेशसंमितं। इध्मस्तु द्विगुणः कार्यः परिधिस्त्रिगुणः स्मृतः
। स्मार्तेप्रादेशाद्इध्मो वा द्विगुणः परिधिस्ततोऽपि एकविंशतिर्वा। अयवा
एकविंशतिमेकविंशतिसंख्याकाष्ठकमिध्मंकुर्यात्। तथाचापस्तंबः खादि
रं पालाशं वैकविंशतिदारुमिध्मं करोतीति   ततः परिधीनेके। एके आचार्या

दे॰ प्र॰ श्रा
४५
45

स्तत एकविंशतिसंख्यकाष्ठकादिध्मात्त्रीणि काष्ठान्यरत्निमात्राणि एधैवोपादा
यपरिधीन्परिदधातीति तद्धूकरधमस्यैवैतान्परिधीन्परिदधातीति मन्तेः ॥ अथ
वैकमेवेदं सूत्रे एकविंशतिं वा । ततः परिधीनेकविंशति । एके आचार्या विक
ल्पेन एकविंशतिसंख्यकाष्ठकमिध्मं कुर्वन्ति ततः इति तस्मादेवैकविंश
तिकाष्ठके ध्मान्परिधीन्परिदधाति चाएन हे वद्युक्ततरं । आपस्तंबसूत्रे एकविं
शतिकाष्ठानां विभागदर्शनात् । तथा चाह आपस्तंबः खादिरं पालाशं वैकविंश
तिदारुमिध्मं करोति त्रयः परिधयः पालाशकाश्मर्यखदिरोदुंबरबिल्वरोहीत
कविकंकतानां येवा यज्ञियाहक्षा आर्द्राः शुष्का वा सत्वक्काः स्थविष्ठोमध्यमो
णीयान्द्राघीयान्दक्षिणो द्राघिष्ठ उत्तरोऽर्ध्वो हिं आधारसमिधावनूयाज
समिदेकविंशतिसमूलानाममूलानां वा दर्भाणां पूर्ववच्छुल्बं तत्रोदगग्रं
निधायेति अत एवं विधमेकीयमतेऽयहे कविंशतिकाष्ठइध्मः तस्मिन्पक्षे चे
ध्मादेव त्रीणि काष्ठान्यादाय परिधिपरिधानमिति । बेधनानंतरमिध्माब
र्हिषोर्भूमौ निधानेन कार्यं । आपस्तंबसूत्रे अनधो निदधातीत्युक्तत्वानात
द्धूकरध्मस्यैवैतान्परिधीन्परिदधातीत्यग्रहरिस्वामिनः । तद्दूत्त यानकुर्यात

देनवकृत्साह तस्येते भवंतीति बाहुमात्रैः परिधिभिरिद्धे इध्मभवितव्यं । इध्मस्तु
क इंधनाथा रेवाहिमादेशश्चा तेन तेइध्मेके देशभूताः परिधिस्तु घस्मर्याः स्तुः
तदिदमाह अभ्याधानाय ह्येति सुषोत्पसावा बाध्येयः यावत्व रमात्र आहवनीय
खरे संभवतीभिप्रायः । परिधिबुध्न्या आहरति सो वश्यं वै हनीयाद् अग्निख
रादतिरिक्तमेवाहरति । अग्निवेष्टनं च दाह मयान्न मुखमिति तथा एवकृत्साः इति
अपरिमितं प्रणयनीयं त्रिवृतं । प्रणयनस्यायं प्रणयनीयः । तं प्रणयनीयं अ
ग्निप्रणयनार्थमिध्मम परिमितं अपरिमितकाष्ठकं त्रिवृतं तित्त्रभिः सन्नहनर
ज्जुभिर्बद्धं कुर्यात् । त्रीणि पूनानि बंधनानि यस्य सत्रिवृतः तं त्रिवृतमिति । अप
रिमितत्वं च प्रागुक्तेध्मकाष्ठसंख्यापेक्षया तिशयेनाधिकसंख्यकाष्ठकत्वं ते
न चतुर्विंशतिसामिधेनीकोपइष्टकापसुत्रसप्तविंशतिः । काष्ठानि भवं
ति । ततश्च प्रणयनीये ततोप्यधिकानि अष्टाविंशतिप्रभृतीनि इष्टसंख्यानि
काष्ठानि भवंति निरुप्याज्यं वेदोसीति यजमानो वेदं करोति । यजमान आज्यं
निरुप्य प्रथमवक्ष्यमाणप्रकारेणाज्यनिर्वापमाज्यस्थाल्यां कृत्वा वेदोसीत्यनेन
नमंत्रेण वेदं करोति ॥ अस्य मंत्रस्यानेक यजयमानके उहो भवति तेना वाभ्यां

46

वेदो भर्त्याऽइति ह्यि प्रयुक्तमानवेके। तेनास्मभ्यं वेदो भवत्याऽइति बहुयजमानके। देवपि
तृभ्यो वेदो भवेति पित्र्यायां। कीदृशं तमित्यपेक्षायामाह।। कुशमुष्टिं सव्या
वृत्तं वत्सजानुं त्रिवृतं मृतकार्ये वा पशुब्रह्मवर्चसान्नाद्यकामा [illegible]य यथासंख्यंप
शुब्रह्मवर्चसकामा यजमानाय यथासंख्यं यथोपदेशक्रमेण एवमाकारं वेदं कु
र्युः। तत्र पशुकामः कुशमुष्टिं सव्यावृत्तं प्रदक्षिणावृत्तं वत्सजानुं वेदं करोति।
अस्य निर्माणप्रकारः कण्ठमेत्रादिसत्त्वाद्दृष्टिविलोकनीयः। ब्रह्मवर्चसकामः कु
शमुष्टिं त्रिवृतं करोति। अन्नाद्यकामो मृतकार्यमिति यथासंख्यं ज्ञातव्यार्थः। वत्स
जानुरिति वत्सजानुसदृशः। त्रिवृत्त्रिगुणः। मौञ्जं त्रिवृद्रज्जुरूपं। मुंजरज्जुवलि
वृतो मृद्दिग्धः। त्रिवृतं परिक्रम्य नीत्वा होतव्येव दर्शनात्। मेखलायां वेणि त्रिवृ
तमिति। यग्निहूँ शान्तिहच्छेद्ध्रे नवेणाकारतामावेश्य दुर्गतं वेनाप्यनिमाये
णोतितन्न एव विदुः। मृतो धान्यावापपात्रेवृण व[illegible] स्थादिनिर्मितं तन्तुक्तिं यतइति
मृतकार्ये मृताकारः सर्थः। तथा च मनुः। वेदं करोति वत्सैर्तुं प्रसव्यमावेश्य तत्रूले गा
ही। क्षिणोत्तरतूले पुसुत्वं प्रतिनिधाय त्रिशवेष्म्यसंनद्ध सुत्तरमुत्तरं पादे त्रामात्रे
सुल्बास्परिवास्पोकरे मूलानि गमयन्ति तूलानि निदधाति वेदं तत्वावेदिं करोति। ४६

ति। तैत्तिरीये। वेदिं करोति वत्सजानुं पशुकामस्य मन्तकार्यमन्नाद्यकामस्य त्रिवृ
तं तेजस्कामस्योद्धृताग्रां स्वर्गकामस्येति। श्रौताश्रित्याः वेदिं करोति धर्ममुष्टिं प्रसव्यमा
वेष्ट्योप[illegible] गृह्याग्न्याणि ८ मुष्टिं कृत्वाग्निः परिहत्य गुल्फेषु मुष्टिबन्धं तमच कृष्याप्यस
मुष्टिबान्याद्देशे छिन्नाग्न्याणां धेयोत्करे मूलानि ततो वेदिकरणमिति। आपस्तंब
स्य गोतिमिधा इर्मा णां वेदिं करोति वत्सजानुं पशुकामस्य मन्तकार्यमन्नाद्यकामस्य त्रि
वृं छिरसं ब्रह्मवर्चसकामस्य मुष्टिबान्याद्देशे परिवासस्य वेदपरिवासनानि इधा
नीति। त्रिवृदेकशिराः त्रीणि शिरांसीति केचित्। कामाभावे प्रोता आवृत यस्य
कामस्यान्यस्याविधानात्। परिवासनानि सर्वाण्येव वेदाग्राणि। इति धूर्तस्वा
मिनाव्याख्यातं। अत एव सूत्रकृता वेदिं बंधनं परिभाषायां सूत्रितं वेदाकार
णां सर्वसाधारणत्वज्ञापनाय। अन्यथा तु तेषां दोहनादिवद्गुणफलसंबंधा
त्स कृताववेवतिविशेषु नैव कृताविति। तस्माद्दर्शपूर्णमासप्रकरणान्निः कृष्या
त्सर्वत्र साधारणं परिभाषोपबंधनमध्येसूत्रितं। वेदस्य प्रमाणं परिशिष्टे
उक्तं। वेदिं समिस्सविनं चतुरयं प्रादेशसंमितं आमुष्मादितिकर्म सुनस्त्राकर्म
सुपश्चाद्दिषु यत्रयत्र [illegible] स्या अमुष्मादिस्येवमादः प्रयोगाः क्रियतस्सूत्रमत

दे.प्र.श्री: ५७

मध्येऽन्तर्यथा॥ आग्रयणेष्ट्या आङ्ङाया आवेश्यहवाद्विनितत्रनत्रोपवर्थौ॥
तदपि कर्मकर्तव्यत्वेन ज्ञेयं यदाङ्गसंबद्धं प्रयाजेङ्गादिकं सर्वत्राङ्.भिविध्यर्थो
स ज्ञेयो न समर्पादार्थः। यदाङ्गसंयुक्तं तदपि कर्तव्यमध्ये ज्ञेयं न त्ववधित्वेनेत्यर्थः
अन्तवचने च शंघन्तं भवतीङ्गान्तं भवतीत्येवमादावन्तवचने चकारान्तद्येति
पूर्वसूत्रात् अनुवृष्यते। तदन्यंन संयुक्तं शंघिडादिकं कर्तव्यमध्ये ज्ञेयो नन्वं
नङ्गाद्वं समीपार्थं परिकल्प्यतत्समीपेनन्तोवा कस्मान्नस्यामिति प्रतिकर्मोद्ध
रणप्रसंगे। प्रतिकर्मक्रमे प्रतिसर्वेषु कर्मसु पृथक्पृथक् आहवनीयाद
क्षिणाग्न्योर्गार्हपत्यादुद्धरणं कर्तव्यं नत्वाधानकाल एवोद्धृतो गार्हपत्यवत्स
र्वकर्मसाधारणो भवतः। परे अप्रसंगे सति। अन्यार्थमनुष्ठितस्यान्येनोपजी
वने प्रसंगः न प्रसंगः अप्रसंगस्तस्मिन्निति। तेन यदि दर्शपूर्णमासपश्वाद्यर्थमुद्ध
तोऽग्निरनपहृतोऽलभ्येन निसकर्मकाले। तदा तत्कर्मार्थं पुनः पृथगुद्धरणं न क्रि
यते। तयोरेव तद्विपि नियतकालीनं कर्म क्रियते। यथा। अग्निहोत्रमागतो पस्था
नादिकं वा पुनराधानानन्तरं धारणे वृत्ते विवृत्ते पिपशुचातुर्मास्यादिकं च अ
पहृतकर्मालोधिकोऽर्थसंयोगात्। अपहृतं समाप्तं कर्म यस्मिन्सोऽपहृतः कर्मा अ ५७

हवनीयो लौकिको भवति वैदिकमाहवनीयत्वं संस्काररूपं ततो प। गच्छतीत्य
र्थः कुतः। अर्थसंयोगात्। यदर्थमुद्धृतस्तेनार्थेन प्रयोजनेन संयोगात्। ते
स्य न यत्कर्मार्थमुद्धृतस्तस्मा[द]नंतरं लौकिको ज्ञेयः। अनुद्दिष्टमाहवनीयशब्देन
विहितं कार्यं तत्र न कर्त्तव्यमित्यर्थः। अतएव योऽर्थस्यामादौ यदि बहुदक्षपः
पचनं त्वाः क्रियंते तदाहवनीये पचयच्यगेवाहरणां कार्यं न समुद्धृत एवस
र्वासामनुष्ठानमिति। अप्रकरणोत्पत्तिरनारभ्यवाद आश्रयित्वात्सर्वगुणः
। न विद्यते क[स्य]चित्कर्मणः प्रकरणे उत्पत्तिर्यस्य असौ अप्रकरणोत्पत्तिः। किं
चित्कर्मारभ्योपक्रम्योद्यते उच्यते इत्यारभ्यवादः न आरभ्यवादो नारभ्यवाद
स्तस्य पर्णमयी जुहूर्भवतीत्यादिरः सक्तवो भवतीत्यादिर्यो विधिः कस्यचित्क
र्मणः प्रकरणे पठितो न भवति। वाक्यांतरेण च कर्मविशेषे विनियुक्तो न भवति
अमुष्मिन्कर्मणि त्वादिरः सक्तवो भवतीत्येवंविधः तस्य प्रकरणेन वाक्येन वा
गत्वेन संभवति स एवंविधः पर्णमयीत्वादिरत्वादिविधिः सर्वगुणो भवति
प्रकृते विप्रकृते च साधारणो एवोपदिष्टो भवति। कुतः। आश्रयित्वात्। आश्र
योऽस्यास्तीत्याश्रयी तस्य भावस्तत्त्वं तस्मात्। जुह्वां सक्तवे वाश्रितत्वात्। पर्णमयी

दे॰प्र॰मी॰ खदिरत्वादेः। यतो व्यभिचरितक्रतुसंबंधवती जुहूर्माभूदित्यत इह तु उः पर्णमह
४८ क्षोवाक्येन निधीयते। या जुहूः सा पर्णमयीति। एवं अव्यभिचरितक्रतुसंबंध
वंतं स्रुवमाश्रित्य तत्र प्रवृत्तिमतः खदिरह क्षोवाक्येन विधीयते। यः स्रुवः स खा
दिर इति। वाक्यं च प्रवृत्तिविकृत्योस्तुल्यमेव वर्तते। उभयत्राश्रयभूतयोः स्रुवजु
48 ह्वोः सत्वात्। अतः खादिरत्वस्य पर्णमयीत्वस्य वा अपि स्रुवजुह्वाश्रितत्वा
त्स्रुवजुह्वोश्च प्रवृत्तिविकृत्योर्विद्यमानत्वादेवं विधो नारभ्यवादः सर्वत्र गुणः प्रवृ
त्तिविकृत्योरुभयोरप्यंगमिति प्राप्ते सिद्धांतमाह प्रकरणे चाविशेषात्वैका च
ना रोवधारणोनिपातोऽमनेकार्थत्वात्। प्रवृत्तिसंतेस्मिन्धर्मा इति प्रकरणं प्रवृ
त्तिः। अप्रकरणे त्वतिर नारभ्यवादरूपो विधिः प्रकरणे एव प्रवृत्तावेव नि
विशते। नो भयत्र प्रवृत्तौ विकृतौ चेति। कुतः अविशेषात्। यत अपोदकः प्रवृ
त्तितः सर्वमंगजातं प्रकरणपठितमनारभ्यवादप्रापितं चाविशेषेण विकृतौ प्रा
पयति। तथा हि। किमयं विधिर्विकृतौ चोदकात्पूर्वं निविशते पश्चाद्वा नाद्यः।
आश्रयभूतयोः स्रुवजुह्वोरचोदकमंतरेणासंभवात्। अतोनेन विधिना आ
यभूतस्रुवजुहूलाभार्थं विकृतौ चोदकप्रवृत्तिः प्रतीक्षणीया। पश्चादयं वि ४८

ज्ञानइतिहितीयपक्षस्यपर्स्मत्वंवादिरत्वं च तु ह्यासत्वेणव सहैव चोदकेनाति
दिश्यते ॥ तत्र चोदकेन प्रापिते सति यद्यनारभ्यविधिः पुनः प्रापयेत् द्विरुक्ति
ता दोषः स्यात् । अत्र चोदकेन प्रापितत्वात्पुनर्विधेयैर्वैयर्थ्यादनारभ्यविधेः
प्रकृतावेव निवेश इति सिद्धान्तः । ननु विकृतावनारभ्यविधिनैव पर्स्म मयी
त्वे रवादिरत्वे च प्रापिते पश्चाच्चोदकस्तु जर्मं नानि प्रापयिष्यति । एवं द्विरु
क्तिता दोषो न भविष्यति मैवं । यतो वैकृतस्य प्रधानस्यानारभ्यविधिं प्रत्यपे
क्षा नास्ति चोदकेनासारूप्यात् आमावान् । नित्य प्रयस्य पर्स्मत्वादेर्विधानुमाश्रकत्वा
त्वाच्च । अतो वैकृतं प्रधानं धर्मापेक्षं सच्चोदकेनासारूप्यात्मा कृतानेव धर्मा
न्प्रयमं गृह्णाति तदनन्तरं पर्स्मत्वादिकं चेति सिद्धं । दर्शनाद्वा विकृतौ प्रया
जादीनां प्राकृतानां धर्माणां दर्शनादप्येवं ज्ञायते यदनारभ्यवादो विकृतौ
चोदकात्पूर्वं न निविशत इति यदि पूर्वं निविशेत् पुरस्तादा वैकृतं प्रधानमनार
भ्यविधिनैव पूरितकयमंशं सन्निहितं एकांक्षत्वात्प्राकृतान्यंगानि न गृह्णीयात्
तदा च विकृतौ प्रयाजादीनां प्राकृतानां दर्शनं न स्यात् । अस्ति च । तथा हि आ
श्वमेधे प्रसावित्रीमिष्टिं निर्वपतीति प्रकृत्य तस्य प्रयाजेषु तायमानेषु इति
पुत्रस्त्राणो वीणा गाथी उत्तरमन्द्रासुर भिर्षितः स्वयं ॰ संभृ तागायतीति

दे॰प्र॰श्रा अत्रगाथागानविधिपरे वाक्ये प्राकृतान्यङ्गान्दर्शयति । पि-आयांचसनत
४९ सं एवप्राकृतं बयजुर्हरती सन्नसपञ्जोपवीती भूत्वाज्यानि गृह्णातीति यज्ञोपवीति
त्वविधिपरे वाक्ये बहून्प्राकृतानन्यदार्थान्दर्शयति । ते च प्राकृतधर्मसापेक्षत्व एव न
प्रयुज्यन्ते नान्यथा । तस्मादनारभ्यवादाः प्रकृतावेव निविशन्त इति सिद्धम् । उदाह
49 रणान्तरं च ताण्ड्ये अनारभ्याधीताः प्रतिपत्त्यक्षाः सन्ति । ते यदि सर्वार्थाः तर्हि वि
कृतावपि ते भवन्ति । यदि प्रकृतावेवानारभ्यविधेर्निवेशः तदा तेषां प्रतिपत्त्य
क्षाणां विकृतावप्रयोगः पुरुषार्थत्वेन विकृतौ प्राप्त्यभावादिति वैकंकता
नि पात्राणि यज्ञपात्राणि सर्वाणि वैकंकतानि विकंकतवृक्षकाष्ठघटितानि
भवन्ति ततो वैकंकतः सम्भवत्तस्मादेष यज्ञियो यज्ञपात्रीयो वृक्ष इति श्रव
णात् । सामान्यस्य तमेतत् । अस्यापवादमाह खादिरः स्रुवः । स्रुवः खादि
रः स्यात् स्फ्य आवकारः स्फ्योऽवज्योऽपि खादिरः स्यात् । खादिरस्य इति श्रुते
पालाशी जुहूः । जुहूपते अनयेति जुहूः स्रुक् सा च पालाशी पालाशवृक्षकाष्ठ
निर्मिता भवति ॥ यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीति श्रुतेः
आश्वत्थ्युपभृत् । उपभृत्संज्ञिका स्रुक् आश्वत्थी अश्वत्थवृक्षकाष्ठघटिता भव ४९

ति। ध्रुवान्तु वैकङ्कती भवति। वैकङ्कतानि पात्राणीत्यनेनैव। अपवादाभा
वात्। होमसाधनत्वाच्चास्या हि समिष्टयजुर्हूयते। तिष्ठ ध्रुव पात्र समिष्टय
जुर्जुहोतीति शाखान्तरश्रुतेः। अत एव मैत्रकठापस्तंब[illegible]सूत्रे स्रुवे वैकङ्कती
ध्रुवेति पठ्यते। तेषां हि वैकङ्कतानि पात्राणीति सामान्यवचनं नास्ति वा
रणान्यहोमसंयुक्तानि। होमेन संयुक्तानि येर्होमः क्रियते तानि होमसंयुक्ता
नि न होमसंयुक्तान्यहोमसंयुक्तानि येर्होमो न क्रियते तानि वारणानि भवं
तीत्यर्थः। परिशेषाद्यानि होमसंयुक्तानि होमसाधनानि येर्होमः क्रियते। ता
नि वैकङ्कतानि। तत्र वारणान्युदाहृयन्ते। उलूखलमुसलकूर्चेडापात्रीपिष्ट
पात्रीपुरोडाशपात्रीशम्याश्च तावदानाभ्रुपवेषांतर्द्धानकटप्राशित्रहरण
षडवत्तब्रह्मयजमानासनहोतृषदनादीनि। तत्रोलूखलमुशलयोर्विशे
षः। मुसलोलूखले वार्क्षे स्यातां ते सुदृढे तथा करछात्रप्रमाणे भवतः। स्फ्यं वैण
वमेवषेतित्तथा। खादिरं मुसलं कार्यं पालाशस्याद्दुलूखलः। यद्वोभौ वार
णौ कार्यौ तदभावेन्यवृक्षजाविति। कूर्चो बाहुमात्रः पीठाकारः इडापात्री
रत्निमात्री मध्यसंगृहीता तथैव हृतीयाह विहरणपात्री अनि विपूला।

पिष्टपात्रीति सैवोच्यते। पुरोडाशपात्री प्रादेशमात्री समचतुरस्रा। अथ यावदं-
गुलपरिमितपरिमंडलखातवती। लोकाच्छेषस्य प्रतिपत्तिरिति कठसूत्रात्।
शम्या प्रादेशमात्री। प्रादेशमात्रीति क्ष्णांगुष्ठपर्वमात्रपद्ममुखं प्रतावदानं
। अग्निरत्निमात्री क्ष्णामुखः। उपवेषोरत्निमात्रः। प्रादेशमात्रो वा हस्ता-
कृति। अंतर्हीनकरखडं चंद्राकारो द्वादशांगुलः समावारात्। षाशित्रहर-
णस्य वा कार्यं स्यात्। षडवत्तं चतुरवत्तं खातवत्। आसनानि चारत्निमा-
त्राणि वा प्रादेशमात्राणि वा प्रादेशमात्रपद्मपृष्ठानि सर्वेषु पात्रेषु मूलाभिज्ञाप-
कानि कृतानि कार्याणि। एतान्यहोमसंयुक्तत्वाद्धारणानि। अथ यवैकं तान्युच्यं- क
ते। यथा। प्रचृत्तौ वैकंकती ध्रुवा। अग्निहोत्रहोमार्थं स्रुवः। अग्निहोत्रहवणी व
संज्ञा ह अग्निहोत्रहोमार्थः स्रुक्। सोमयागे ग्रहहवमसहोमा वकलशादीनि च।
नत्वापि हविर्हीनाभिषवणोपलकपरिप्लवसंतरणपात्राण्यहोमसंयुक्तानि वा-
रणान्येवा। षोडशिपात्रं खादिरं। अंशुग्रहाभ्यपात्रमौदुंबरं वचनात्। वाजपे-
ये सप्तदश सोमग्रहाः सप्तदश सुराग्रहाश्च तेषां पात्राणि वारणानि एवमसं-
युक्तत्वात् सप्तदश सुराग्रहाणां पात्राणि मृन्मयान्यपि शाश्वानि रेसत्रेषु ५०

क्तानि संति। एवमादि सर्वमूहनीयं। परिभाषायाः साधारणत्वाद्दावसथ्यपात्रा
ण्येव पाकहोमसंयुक्तानि वारणान्येव। प्रणीतामोक्षणीपात्रदर्वीकङ्कतादी
नि। यज्ञपात्रे। चमसानां तु वक्ष्यामि दण्डाः स्युश्चतुरङ्गुलाः। अङ्गुलस्तु नवेत्स्तं
धो विस्तारश्चतुरङ्गुलः। विकङ्कतमयाः प्रोक्ष्याः स्त्वग्विलाश्चमसाः स्मृताः।
अन्येभ्यो वा पिवाकार्यो [illegible] स्तेषां दण्डोऽङ्गुलक्षणं। होतुर्मण्डल एवस्याद्ब्रह्म उ
णश्चतुरस्रकः। उद्गातुश्चतुरस्रिः स्याद्याजमानः प्रथमन्तः। प्रशास्तुरवेत
[illegible]स्याद्ब्राह्मणाच्छंसिनः। पोतुरग्रे विशाखी स्यान्नेष्टुः स्याद्विगृहीतकः।
अच्छावाकस्य रास्नाच आग्नीध्रस्य समपृष्ठकः। इत्येते चमसाः प्रोक्ता इत्ति जाय क
ज्ञकर्मणि। पात्रान्तराहुर्वदाहुर्न्यह्यन्ता हुश्चमसाः स्मृताः। इतिसूत्रस्थसारे
। स्वामि सवित्रे वेदं च मुख्यं लौकिकं खलं महानता स्रुवा संयुपरपात्र शम्यास्कव
पुष्कराणि च। इतः सर्वस्य विषाणानि चरूणामेक्षणीनि निधौ कुर्यात्स्याद्देश
मात्राणि महावीरास्त्रयस्तथा।। द्रोणकलशाधिषवणे फलके स्नागदंडपरिधिः
शूलानि स्फ्य पूर्णोपवेषधवित्रपिशरणयनीयावपाश्रपण्यौ कुर्यादित्र मा
त्राणीति। निगमेनेयगोपाश्वमसाश्चतुरस्राः प्रच्छोदकगाहिताः स्त्वग्विन्द्रादं

दे·प्र·श्री
५१

51

डलक्षणाः।परिमंडलश्चतुरस्रस्तस्याग्निः ह योवनहोत्र षुवि शाखविग्रहीना
रत्नावमयूषोक्तिःयाहोतृब्रह्मस्वामिसामगहोतृप्रशास्तृब्राह्मणाच्छंसिपो
तृनेष्टृछावाकाग्नीध्राणांद्रोणकलशः पलशतग्राही परिपूर्णा वृत्तिः स्रुचा स्य
र्द्ध शतिकैकघनास्त्रिंशतिकाग्रहाः पंचपलिकाः पुष्करान्नावाणोहस्तप
र्णमात्राजानुमात्रमुलूखलं पालाशंपंचविंशतिपलमिडापात्रमुसलंखा
दिरंअरत्निप्रमाणं हषद्रत्निप्रमाणा शूर्पंद्वात्म्या हवींषि लशांकवोधिषव
णमसिस्नाखधा हविः [illegible] भुम्निरघरारणिः परशुश्चेतिपवित्रसंनद्धनार
णिर्वेदोमेक्षणंपेनदारवाःशरावंप्राशित्रहरणंप्रनावदानं स्वरूपवेषसमि
धश्चेतिप्रादेशमात्राणिसत्प्रणयनचमसो प्राशित्रोविंशतिप्रमाणं पद
प्रमाणमिति।मंडनः।रोहीनकान्यग्नोधोच्छान्यालोभावकरश्रनेः कुर्वीत शा
चमसांस्तेषामभावेन्यद्रुमोद्भवान्।अश्वत्थवारणौनोचेदिडापात्रमिहा
न्यजे।अग्निहोत्रहवण्या [illegible] घावेकंकतीमुमा॥पालाशीतुकठश्रुत्या
हुयाभावेन्यद्रुसजेत्।अपर्णोवः।खादिरः स्रुवः [illegible] पर्णमयी जुहूरात्म
छ्रुपन्हैवैकंकतीध्रुवैनेषांहस्तानामेकस्य तु चः कारयेद्रूहमात्मारत्नि ५१

मात्मोवा[illegible]त्वाग्नास्त्वक्कोबिलाहंसमुखः स्रुशम्याप्राशित्रहरणामिति
स्वाहिरण्यधारणाग्निहोमार्थानि भवंतीति मानवे। स्वाहिरं स्रुवं घ्नाग्नीजुहू
राश्वक्षुपमंहेकं फलीभावा[illegible] मोरत्निमात्रदंडाः पाणितलमात्रपुष्कराः
स्रुवः बिलाद्यंगुलखातोश्चतुरंगुलच्छायाः प्रादेशमात्रः आणिप्रसर्वेषामिति। काठ णा
के। न्यारत्निमात्रीस्रुग ग्नीहोत्रहवणीपालाशीसामान्यात यानिर्वापणामिति
मा रत्नीबाहुमात्राः स्रुवः दंडाः प्रहर्तत्राणिमल्लवणान्यर्थपरिमाणानि यात्रा
णीपालाशजुहूराश्वक्षुपमंहेहं कत्नीभावाशमीमर्जमय्योवात्वक्कोबिला
हंसमुखोभवतीति श्रुतितैयगोधाश्वमसारोहीतकावासर्वाणिवापस्मिम
यानिस्पचस्रुवशम्यास्वाहिरंप्राशित्रहरणं चयज्ञायज्ञियानां पात्रीडा चमसं
लोकाल्केषस्य प्रतिपत्तिरिति बाहुमात्राः स्रुवः पाणिमात्रपुष्करास्त्वग्बिला
हंसमुखप्रसेकामूलदंडा भवंति। बाहुः प्रमाणमासां ताः बाहुमात्राः बाहुप्र
माणाः स्रुचो भवंति तथा पाणिः प्रमाणमस्य तत्पाणिमात्रं पाणिमात्रंपुष्क
रं मुखं यासां ताः पाणिमात्रपुष्कराः स्रुचो भवंति। तथा त्वग्बिलाः त्वचि बिलमग्रदे
शे बिलं मुखं यासां ताः त्वग्बिलाः। तथा। हंसमुखप्रसेकाः प्रसिच्यते क्षार्यतेऽने

नेति प्रसेकः प्रणालिका हंसमुखसदृशाः प्रसेकः प्रणालिकाद्या सा न ता हंसमु
खप्रसेकाः सा च प्रणालिका एकैव भवति। एकयापि शास्त्रार्थस्य कृतत्वात् का
र्यसिद्धेश्चानन्तु इति स्तोवा। कुत्राप्यनुक्तत्वात्। तयामूलदंडाः। मूले हंडो यासां
तामूलदंडाः। अयोदग्रे पुष्करं सिध्यति। एवंविधा स्रुचो भवंति। शाखांतरी
यो विशेषः पूर्वसत्रे उक्तः। अरत्निमात्रः स्यादंगुष्ठपर्ववृत्तपुष्करः। अरत्निप्र
माणमस्यासावरत्निमात्रः स्रुचोरत्निप्रमाणो भवति पुनः कीदृशः। अंगुष्ठप
र्ववृत्तपुष्करः पर्वशब्दः संधिवाची। संधिर्ग्रंथिः तदुक्तं। अगुष्ठांगुलिमाने तु यत्र य
त्रोपदिश्यते। तत्र तत्र बृहत्पर्वग्रंथिभिर्मिनुयादित्यादि। अतो अंगुष्ठस्य बृहत्प
र्वग्रंथिप्रमाणं चतुरस्रं कृत्वा तद्वमंडलं चतुरस्रं चिकीर्षन्नित्युपायेन वृत्तं विधा
य तत्प्रमाणमस्य पुष्करनासिकाखातं चस्यात्। तदुक्तं कात्यायनेनाग्नेर्घ्राणवत् स्फ वा
खातमिति। तया पुष्करं दृढं भवेत् खातं इतिवत्। स्प्योस्याकृतिः। अप्रसिद्धः खड्गः। असेरि
व अस्याकृतिर्यस्य असावस्याकृतिः खड्गसदृशः स्प्यो वज्रो भवतीत्यर्थः। आद
न र्शाकृति प्राशीहरणं। प्राशित्रहरणमिति ब्रह्मणो भागावदानं। तत्र छिद्यते येन तत्
प्राशित्रहरणं। आदर्शो दर्पणः। आदर्शस्येवाकृतिराकारो यस्य तदादर्शाकृ ५२

ति:। आदर्शसदृशं वर्तुलं तत्रावदानविधानात्खातवत् प्राशित्रहरणं भव
ति चमसाकृति वा। चमसस्येव आकृतिराकारो यस्य तत् चमसाकृति वा विकल्पे
। अथवा चमससदृशं चतुरश्रं प्राशित्रहरणं भवति चात्वालोत्करावंतरेण संच
रः। संचरंत्यनेनेति संचरो गमनागमनमार्गः। चात्वालश्च उत्करश्च चात्वालोत्करौ
।। तौ अंतरेण तयोरंतरालेन सर्वेषां विहितकार्यार्थं संचरो गमनागमनमार्गो
भवति अयं च सोत्तरवेदिषु वरुणप्रघासमहाहविःपशुसोमेषु ज्ञेयः। चात्वालस्य
एष्वेव सत्त्वात्। अतः सोत्तरवेदिकेषु सर्वेष्वनेनैव मार्गेण गमनागमने कार्ये।।
प्रणीतोत्करावित्येषु। अंतरेण संचर इत्यनुवर्तते। इष्टिषु दर्शपूर्णमासादि
षु प्रणीतोत्करावंतरेण प्रणीतोत्करयोरंतरालेन सर्वेषां विहितकार्यार्थं सं
चरो भवति गमनागमनमार्गो भवति अंतरेणेत्ययं निपातोंतरालवाचकार्थेत
द्योगे चात्वालोत्करौ प्रणीतोत्करावितिच द्वितीया। अंतरांतरेणयुक्ते इति सूत्रे
ण। अथ येदृविंत्पने। व्रीहिभिर्यजेत यवैर्यजेतेत्यादिभिर्वाक्यैः अतापे व्रीहिय
वादयः। यदि देवान्मानुषाद्वा कारणान्नेयागार्थं न लभ्यंते तदा किं द्रव्यांतरेण प्र
तिनिधिभूतेन तत्कर्मारंभणीयमुत नेति। तत्र यागस्य प्रधानत्वाद्द्रव्यस्य गुण

भूतत्वाद्द्रव्यांतरेण कर्मारंभे प्राप्ते आह ३ चोदिताभावेनारंभस्तत्त्वसिद्धत्वात्
स्याचोदितस्य विहितस्य श्रुतस्य व्रीहियवादेर्मुख्यद्रव्यस्याभावे प्रतिलाभे अप्रा
प्तौ सत्यां काम्यस्य कर्मणो नारंभोऽप्रयोग एव भवति। कुतः तत्त्वसिद्धत्वात्। तेनै
व सिद्धिर्यस्य तत्तत्त्वसिद्धि तस्य भावस्तत्त्वसिद्धित्वं तस्मात्। तस्य काम्यस्य कर्मणस्त
त्त्वसिद्धित्वात्। यतः काम्यं कर्म तत्त्वसिद्धि। तेन श्रुतेनैव चोदितेनैव द्रव्येण सिद्ध्यति
नान्येन। यत् तत्तदेव तस्य साधनत्वेन श्रुतं तेन द्रव्यान्तरं। अतो यदि द्रव्यान्तरेण
तत्कर्मारभ्यते। तदा कर्मणो यागरूपस्य तदेकसाधनकत्वाद्द्रव्यान्यत्वे सति य
था श्रुतद्रव्याभावात्कर्मणो विगुणत्वमेव स्यात्। न च विगुणात्काम्यात्फलं भव
ति विनष्टशक्तित्वाद्दग्धबीजवत्। न हि काम्यस्यावश्यकर्तव्यत्वं येन विगुणमा
णेन सिद्धं यद्गुणत्वेन यथाशक्तिप्रयोगं दृष्ट्वा द्रव्यान्तरेणारभ्येत। तस्माच्चोदि
तद्रव्यस्याभावे काम्यस्यानारंभ एव भवति। अग्रिमेण सूत्रेण नित्ये कर्मणि विशे
षस्य वक्ष्यमाणत्वादिदं काम्यविषयं। अथ यथाविहितद्रव्याभावे काम्यस्या
नारंभमप्युक्तः। तथा नित्येऽपि विहितद्रव्याभावे द्रव्यान्तरेणानारंभे प्राप्ते आह
नियते सामान्यतः प्रतिनिधिः स्यात् यथाशक्तिप्रयोगस्य रक्षापितत्वात् निय ५३

52

नियमेन नित्ये कर्मणि दर्शपूर्णमासादौ श्रुतद्रव्याभावे सामान्यतो मुख्यद्रव्यसादृ
श्यात् प्रतिनिधिर्भवतीत्युक्तं तद्द्रव्यसदृशेन द्रव्यान्तरेणापि नित्यं कर्मारम्भणीयं
यावज्जीवचोदनया हि श्रुतानारम्भमपि नित्यमवश्यकर्तव्यमिति नियमश्चोद्य
त एवं न तु यागप्रधानचोदनानियमेन यागः किंचिदर्थो द्रव्यमाकांक्षति सा च व्रीहि
भिर्यजेतेति श्रुतैर्व्रीहिभिर्विधीयमानैरेकवाक्यतां प्रतिपद्यमानार्थप्राप्तानि द्र
व्यान्तराणि बाध्यन्ते। श्रुतद्रव्याभावेन यागद्रव्यान्तरेणार्थप्राप्तिः केन वार्यते
तस्माद्द्रव्यान्तरं प्रतिनिधेयं। यदि त्वाग्नेये चोदना न स्वयं द्रव्यं प्रयुंजाना व्रीहिवा
क्यमेव तु तस्य प्रयोजकं स्यात्तत्तदभावेन द्रव्यान्तरमुपादीयेत न त्वेवमस्ति। प्र
धानचोदनयैव प्रयुज्यमानेषु द्रव्येषु नियममात्रं व्रीहिवाक्येन क्रियतेऽतस्तद
भावेऽपि प्रधानमेवावश्यकत्वाद्द्रव्यान्तरमुपादापयतीति ननु द्रव्यान्तरे कर्म
भेदो न विष्यतीति उच्यते। न हि द्रव्यकर्मणोर्भेदः। न च द्रव्यालंबकं कर्म येन तत्
द्भेदाद्भेदः जातेरिव व्यक्तिभेदेन च द्रव्यान्तरेऽपि तावेव दर्शपूर्णमासाविति तस्य सम
स्तपस्य प्रत्यक्षावगतस्याबाधोऽस्ति। कुतः शब्दान्तरादीनां भेदकारणानामभावा
त्। न हि नीवारैः क्रियमाणस्य शब्दान्तरादिनिमित्तो भेदोऽवतरति येन तद्देवेद

मिति प्रत्ययो बाध्येत । तस्मान्नीवारैरपि क्रियमाणयोर्दर्शपूर्णमासाभिधेय
तास्त्येव यथा नैव चैत्रीप्रयोगाद्देशान्तरप्रयोगो भिद्यते । तेनैव च भेदाभावेन
नैव दर्शपूर्णमासाभिधेयत्वं न जहीतः । तथा प्रतिसामान्याज्जातुल्यत्वान्नीवा
रैरपि क्रियमाणयोरस्त्येव तदभिधेयता स्वरूपाभेदात् । यथान्वाश्रयभेदेपि गो
त्वादिसामान्यस्याभेदात्तन्निमित्तं गवादिनामधेयं सर्वत्र वर्त्तते । तद्वत् द्रव्यभे
देपि कर्मभेदाभावात्तन्नाम तावन्निवर्त्तते । तन्नाम कार्यफलमतो द्रव्यान्तरेप्य
स्त्येव फलमिति । तथा यद्यपि देशादिभेदेपि भिन्ना एव कर्मव्यक्तयः सामान्यमेव तु
दर्शपूर्णमासाभिधेयं फलवत् । तथापि देशादिभेदवत् व्रीहियवभेदवच्च नीवारे
ष्वपि न सामान्यव्यतिरेकः ॥ अतः सिद्धं द्रव्यभेदेपि कर्मैकत्वं । एवं द्रव्यभेदेपि कर्मैक- व्य
त्वे सिद्धे इदं संदिह्यते । श्रु. तद्द्रव्याभावे किं यत्किंचिद्धि सदृशमपि प्रतिनिधित्वेन
ग्राह्यमुत श्रु. न सदृशमेवेति । तत्राष्टाकपालश्चोदनायेन केनचिन्निवर्त्यते । तत्र वि.
सदृशोपादानेनान च व्रीहिसदृशत्वात् व्रीहिफलं नीवाराः साधयन्तीति वाच्यं । यदि
तथा स्यात्तदा व्रीहिभिर्विकल्पेरन्नेकार्थत्वात् यववत् । न चैतदिष्टं । तेन सगुणस्यासंभ
वे विगुणोप्याग्नेयश्चोदनार्थः कर्त्तव्य इति कृत्वा द्रव्यान्तरोपादानं । तत्र च सदृशस्य ५४

दृष्टयोर्नास्ति विशेषः तस्मान्न सदृशोपादानमित्येवं प्राप्तेऽब्रूमः। फलार्थि
नापयाश्च, नं व्रीह्यादिद्रव्यकं कर्म प्रक्रान्तं तदादृष्टस्येव फलसाधनत्वेन अव
गतं तस्य व्रीह्यभावे गृहीतस्य फलाभावात् तदन्तस्योत्सर्गे प्राप्ते शिष्टाचारानुमि
तात् स्मारस्तेन पवजेत्येवं भूताद्वचनात्समाप्तिर्विधीयते। सा च सामाप्तिर्यादृशः
क्रतुः प्रक्रान्तस्तादृशस्य विधीयते। नान्यादृशस्य। तत्र च प्रक्रान्ते क्रतौ व्रीह्या
द्याकृतिर्यागसाधनं स्वाश्रयभूतं द्रव्यं परिच्छेदत्वं गतां प्रतिपद्यते। तथैव व्री
हिगताये विशेषा दीर्घशूकत्वादयस्तान्यपरिच्छिन्नन्ति तेऽपि च क्रियायाः साधनमे
वयवेषु वानस्याप्रियमाणे ष्वैवयवी आपतः संभवन्ति। व्रीहि हि सोमादिषु च पेषणादि
विधानाद्वयवानामेवाङ्गत्वं नावयविनो विनष्टत्वात्। जातिश्चाश्रयवत्तद्व
यवानामप्युपलक्षणं संभवाद्व्यक्तिस्तद्वयवाश्च सर्वं एव क्रियाङ्गतया विधीयं
ते। तत्र यद्यपि नीवारा व्यक्तिव्यक्तिः अव्रीहिजातेर्न ते। अन्यान्तथाप्यन्येब्रहवोध
र्मा व्रीहि समानास्तेषु विद्यन्ते अतः केदेशसंपत्तये अवश्यमुपादेयाः। न हि संभ
वित्यागो युज्यते। ये तु असमानननीवारगतास्ते नान्तरीयकत्वादुपादीयन्ते न त्वा
दि—सयातस्मात्तदुपादानमदोषः। अतो यदि सदृशं प्रतिनिधीयते ततस्ते बा

मवयवानां क्रियंते लभ्यंते जातिमात्रमवयवांतरं च परित्यक्तं भवति। असदृशो
पादाने पुनः समस्तपरित्यागः स्यात्। अतोऽत्री हि दृष्टान्तमपि यथासंभवमुपपादयि
स तुं सदृशोपादानं। एवं च सुदृशलाभे मंद सदृशं नोपादेयं तु सदृशो बहुवयवानुग्र
हात्। तदाह त्रिकांडमंडनः। कार्येरूपैस्तथापरस्मैः क्षीरैः पुष्पैः फलैरपि। गंधै रसैः
सदृक् सत्यं पूर्वलाभे परं परमिति। तस्मात्साधूक्तं सामान्यतः प्रतिनिधिः स्यादिति
। तदुक्तं। यथोक्तवस्त्वसंपत्तौ ग्राह्यं तदनुकारि यत्। यवानामिव गोधूमा व्रीहीणामि
व शालयः इति। अत एवं सिद्धं। नित्येकर्मण्यारब्धे अनारब्धे च प्रतिनिधिर्भवति। अ
वश्यकर्तव्यतया यथाशक्ति प्रयोगस्याज्ञापितत्वात्। काम्ये पुनरवश्यकर्तव्यता
भावादनारब्धे मुख्यद्रव्यालाभे आरंभो न भवतीति प्रागुक्तं। अथ काम्ये प्रारब्धे स
ति पश्चात् श्रुतद्रव्यस्य नाशदोषापहारालाभादौ जाते तस्य त्रिगुणस्य फलसाधन
त्वाभावस्य प्रागुक्तत्वात्प्रयोजनाभावेन काम्यं न समापनीयमिति प्राप्ते आह आ
रंभान्नियमः। काम्येप्यारंभादूर्ध्वं समाप्तेर्नियमो वश्यंभावः। आरंभादिति हेतौ
पंचमी। तेनारंभ एव समाप्तेः कारणं। यत आरब्धं अतोऽवश्यं समापनीयमेव समा
प्तिश्चामुख्याभावे प्रतिनिध्युपादानं विना न भवति। अतः काम्येपि आरब्धस ५५

55

समापनार्थं प्रतिनिधिर्भवत्येव नित्येष्ववश्यकर्तव्यत्वान्नैवम् । नित्येषु पा
ठानेकारणं साचारस्येकाम्येष्वविशिष्टा । आरंभस्तु काम्यस्य विहितद्रव्याभावे
द्रव्यांतरेणान भवत्येव । अनारब्धस्यावश्यकर्तव्यत्वाभावात् दोषश्चासमासो
स्यात् सामान्यात् । किं च । आरब्धस्य काम्यस्यासमापने दोषः स्यात् । कुतः । सामान्यात्
। आरब्धस्य काम्यस्यावश्यकर्तव्यत्वं यानित्येन समानत्वात् । यथा नित्यकर्मसामक
रणे यथा शिष्टविगर्हणं । एवमारब्धानां काम्यानामसमापनेऽपि पुनः शिष्ट
विगर्हणारूपाच्छिष्टाचारात् तस्मान्निःस्कृते स्वश्वनिंवत्स्य पित्वा प्रक्रांतं त्वात्सीयं क
र्मावश्यं समापनीयं । अपि च प्रक्रांतस्यासमाप्तौ निंदा प्रायश्चित्ते नैत्तिरीये श्रूये
ते । देवताभ्यो वा एष आवृश्च्यते यो यक्ष्य इति । उक्त्वा न यजते त्रेधातवीयेन यजे
तन्तेन देवताभ्य आवृश्च्यते इति । तस्माद्ध्यारब्धमेवरूपं समापनीयं । तदुक्तं जैमि
निना ॥ प्रक्रमात्तु नियम्येतारंभस्य क्रियानिमित्तत्वादिति दर्शनाच्च । अध्वरो मुख्यद्र
व्यस्याभावे द्रव्यांतरेण परिसमाप्तिः दर्शनाच्चैवमवसीयते यन्मुख्यद्रव्यस्याभावे
द्रव्यांतरं प्रतिनिधेयमिति । तद्यथा । यदि सोमं न विंदेत्पूतीकानभिषुणुयादिति ।
अत्र सोमे प्रहृते सोमाभावे सति तत्स्थाने पूतीकानामभिषवणविधानात् पूतीके

य

दे॰ प्री॰ श्री ५६

र्यागः समाप्नोतीत्यमुमर्थं दर्शयति। तच्छिद्रदर्शनं कथ्यते यदन्यविधिपरं सत्तत्प
संगादन्यमर्थं ज्ञापयति। यथा तत्रैव प्रयाजेषु नायमानेषु ब्राह्मणो वीणागाथी दक्षि
णत इत्यादिगाथा गायतीत्यत्र वाक्यं गानविधिपरं सदवस्यामिष्टे प्रयाजास्विष्टं न द
र्शयति। यदि सोमं न विन्देदिति। इत्युत्तरत्रा दर्शनं न भवति। कुतः पुनस्त्र हणात्। सोमा
भावे सति पुनर्द्रव्यान्तरस्य पूतीकलक्षणस्याप्यग्रहणात् विधानात्। तथा हि

56

यदि सोमं न विन्देत् पूतीकानभिषुणुयादिति किमयं सोमाभावे द्रव्यान्तरविधिः सो
माभावे पूतीकैर्यागं साधयेदिति सोमजातिवत्पूतीकजातिर्यागसाधनपरिच्छेद
कत्वेन विधीयते। उत प्रतिनिधिनियमः सोमाभावे सुसदृशेष्वौषधसदृशेष्वपि प्राप्ते
षु पूतीकानभियम्यन्ते। यदा त्वेवं तदा द्रव्यान्तरेण परिसमाप्तेर्दर्शनं भवति। अधुना वे
तदाक्षिपति। अत्र सोमेन यजेतेति सोमद्रव्यं जातिशिष्टः। अतः सोमान्तरतस्यैव कर
णत्वात् तदसंभवे करणत्वमेव हीयेतेति प्रतिनिध्यपेक्षा कुतस्तन्नियमार्थता
विधेः। दर्शपूर्णमासयोस्तु व्रीहीणामनुष्ठितिशिष्टत्वान्नीवारैः कर्मस्वरूपस्य भे
दो न भवति। तेन तत्र प्रतिनिधिर्युज्यते। किं च नियमार्थो विधिरस्त्वेतदप्ययुक्तं। न
हि सोमस्य सुसदृशो द्रव्यान्तरे सत्यसदृशः पूतीकः पक्षेऽपि प्राप्तः सुसदृशो हि बहवः ५६

अतद्द्रव्यावयवाः संगच्छंते। अन्यत्वाच्चावयवसदृशो न च भूयोऽनुग्रहे संभवत्यस्मा
नुग्रहो युक्तः। तस्माद्दृष्टं तत्प्राप्तसभावे एवं दर्शने तु तत्ते दर्शनस्वरूपकथनपूर्वकं
मस्य दर्शनस्य माक्षिपति अन्यार्थं दर्शनं न पुनर्ग्रहणात्। अन्यार्थं सत् दर्शनं
भवति १२ विधीयमानाः पूतिकान नियमार्था भवंतीति तस्मात्सोमाभावे अप्रा
प्तानां पूतिकानां यागसाधनत्वेन विधिरिति साधूक्तं पुनर्ग्रहणादिति। अथ सिद्धां
तमाह अन्यार्थं पुनर्ग्रहणं पूतीकानभिषुणुयादित्येतत्पुनर्ग्रहणमेवान्यार्थं
।पूतीकरूपप्रतिनिधिनियमार्थमित्यर्थः। न तु अप्राप्तानां पूतीकानां विधानार्थं।
विचारस्यैतत्प्रयोजनं। प्रतिनिधिनियमपक्षे पूतीकविनाशे सोमसदृशस्योपादा
नं। द्रव्यांतरविधाने तु पूतीकसदृशमुपादेयमिति। कथमन्यार्थमिति चेदुच्यते
।प्रक्रांतं कर्म तावदवश्यं समापनीयमेव। अतो द्रव्यांतरोपादानं प्राप्तमेव।
ननूक्तं सोमस्योत्पत्तिशिष्टत्वान्न प्रतिनिध्यपेक्षेति। तत्रोच्यते। यजेतेत्येतस्य हि य
त्किंचिद्द्रव्यमपेक्ष्यमाणं सोमेनेति निराकांक्षीक्रियते। यथाग्नेयोऽष्टाकपाल इति
वाक्यं वाक्यांतरेण व्रीहिभिर्यजेतेत्यनेन। पक्षांतरवाक्यांतरग्रासयोर्नैव कश्चि
द्विशेषोऽस्ति। अपेक्षायास्तुल्यत्वात्। अनन्तरं हि कार्यनिध्यपेक्षा भवत्येव। यस्त्वो

57

तं सत्यपि प्रतिनिधौ पूतीकानामीषत्सदृशत्वात् प्राप्तिर्नास्तीति अभावविधि
रेवायमिति तन्नो अनेन। यत्क्वचिदपि न प्राप्तो नित्यं हि धीयते पूतीकास्तु कदा
चित्प्राप्नुवन्ति। यदा मुख्यस्याभावात्प्रतिनिधानत्वं किंचिदिति निरूप्यते तस्यां
वेलायां सर्वेषामेव सुसदृशानामीषत्सदृशानां चास्ति प्राप्तिरनियमेन। तत्र यथा
वद्देवान्यायेन सुसदृशं नियन्तुमुपक्रम्यते भावदेवेषत्सदृशः पूतीको बलीयसा
वचनेन नियम्यते। तस्मादिदं पूतीकानभिषुणुयादित्येतत्सु नर्ग्रहणमन्यार्थं
सत्यक्षेप्राप्तानां पूतिकानां नियमार्थं सत् प्रक्रान्तस्य कर्मणो मुख्यद्रव्यालाभे
द्रव्यान्तरेण परिसमाप्तेर्दर्शनं न भवत्येवेति सिद्धं। अतः सा घत्र मन्यार्थं पुन
र्ग्रहणमिति। अन्यार्थत्वाद्दर्शनं भवतीत्यभिप्रायः। अथेदं विचार्यते। सोमेप
योव्रतं ब्राह्मणस्य यवागू राजन्यस्यामिक्षा वैश्यस्येत्यस्मिन्नपि किं प्रतिनिधिर्भ
न वत्युत न भवतीति। तत्र पूर्वपक्षमाह व्रतेप्रसंगो न नियमशास्त्रात्। व्रतेपयोव्रता
दौ प्रतिनिधेः प्रसंगो न भवति प्रतिनिधिर्न भवतीत्यर्थः। कुतः। नियमशास्त्रात्। नि
यमप्रतिपादकः शास्त्रो नियमशास्त्रः एवकारः। सोत्र श्रूयते। व्रतं ६ः स्येवास्यातो
शनं भवतीति। एवकारेण प्रतिनिधिरेव निवार्यते। अन्यस्य निवारणे यस्मा ५८

भावात्। एवं पूर्वपक्षिणेदमेव सत्त्रं सिद्धान्तपरतयापि आम्नायतेऽपि प्रतिनिधेः अंते २
प्रसंगो भवति। प्रतिनिधिर्भवत्येवा कुतः न नियमशास्त्रात्। यतो नायं नियमः श्रुत्युक्तः
न त्वयं नियमं प्रतिपादयितुं शक्तः। यतोयमिष्टाशनसमुत्थोर्थः। पुरा एके शास्त्रमज्ञोर्न
पनाद्यलाभमयेन नदाचार्यादिना शास्त्रं हि प्रवृत्तेन तत्र श्रूयते। तत्र ८ः त्येवमस्या
तोऽशमने भवतीति। अनन्तसंप्लव एवायं। अतो न स्वार्थे प्रमाणमिति न प्रति
निवारणाय प्रभवति। तस्माद्दृष्टेऽपि प्रतिनिधिर्भवत्येव। अथ चैवं सत्त्रयोजना
। नियमशास्त्राद्युक्ते प्रतिनिधेरप्रसंग इति यदुक्तं तन्नेति। एवं अप्रसंग इत्यकार प्र
श्लेषः कार्यः। अथेदं चिन्त्यते। विहितद्रव्यस्याभावद्रव्यान्तरे प्रतिनिधित्वेनोपा
त्ते छागाभावे मेषरूपे अनुवाचनप्रैषादौ किमूहं कृत्वा प्रतिनिहितद्रव्यशा
ब्दस्य प्रयोगः कार्यः। अग्नीषोमाभ्यां मेषस्य वपाया इत्येवं। उत विहितद्रव्यशा
ब्दस्यैव अग्नीषोमाभ्यां छागस्येत्येवमेवेति। तत्र मन्त्रेण द्रव्यमभिधेयं। तथा
नूहितः प्रतिनिहितं द्रव्यं शक्नोत्यभिधातुं। तस्मादूहित्वा प्रतिनिहितद्रव्यवा
चिशब्दस्य प्रयोगे प्राप्ते आह शब्दे विप्रतिपत्तिः। प्रतिनिधावुपात्तेऽपि विहि
तद्रव्यवाचिनि शब्दे अविप्रतिपत्तिरपि परिणामोऽनूहो भवति। अग्नीषो

दे॰ प्रश्री
५८

58

मान्यं छागस्य वपाया इत्यनूहे दिनमेषेपि प्रयोऽयं न तु मेषस्येत्येवं विपरिण
तरूपमित्यर्थः। कुतः प्रतिनिधिः श्रुतद्रव्यबुद्ध्यागृह्यते न तु द्रव्यांतरबुद्ध्या। अ
तश्छाग एव बुद्ध्या गृहीतत्वात्तच्छब्देनैवाभिधानं यद्यत्र मेषेण छागवत्साधनं भवेत्त
तस्तत्प्रकाशकं मेषपदं प्रक्षिप्येत न त्वेवं किं तर्हि मेषगततायेच्छागं शास्त्र एवा
त्र साधनं। तेन च छागगताइव मेषगता अपि छागशब्देनैव प्रकाशयितुं शक्यं तत्र
त्यनूहे नैव प्रयोगः। यत्र तु द्रव्यांतरं वचनेन विधीयते। यथा सारस्वतं मेषमिति ऐं
* द्रं मेषमिति। ऐंद्र पमः सारस्वती मेषीमिति। तत्र द्रव्यांतरबुद्धिर्भवति। तत्र ऊ
होपि भवति। न चात्रैवंविधं किमपि वचनमस्ति। तस्मादूहो नाभव यवानां सामा
न्यात् श्रुतद्रव्यमेवेदमिति बुद्ध्या मेषादिद्रव्यस्य छागादिप्रतिनिधित्वेनोपादा
नं। तेन श्रुतद्रव्यशब्देनैवाभिधानं युक्तमिति साधूक्तं शब्दे विप्रतिपत्तिरिति। य
तु त्र वचनेन द्रव्यांतरं विधीयते तत्र ऊहो भवतीत्युक्तं। तेन सोमाभावे पूतीकानभिषु
णुयादिति पूतीकानां वाचनिकत्वादूहो भविष्यतीत्याशंक्याह सोमेन जात्यभा
वात्। सोमेनेति तृतीयैकवचनं। सोमाभावे पूर्वके पूपातेषु सोमेनेति सोमशब्देने
व पूतीकानामभिधानं कर्तव्यं अंशुः अंशुष्टे देव सोमाप्यायतामित्येवं। न तु पूतीक ५८

ग्राहेण। अथवा सोमइति समस्यैकवचनं। नेति निषेधः। सोमप्रतिनिधित्वेनो
पात्तेषु अर्जुनश्येनहृतपूतीकादिषु सोमे सोमशब्देन ग्रहो न भवति। कुतः। जात्या
भावात्। जात्यंतरबुद्ध्यभावात्। न त्वत्र वचनेन इष्ट्यंतरं विधीयते। किं तर्हि
सोमाभावे यागस्यावश्यकर्तव्यत्वादनेकेषु सुसदृशेष्वसदृशेषु च प्राप्ते
षु पूतीकादेर्नियमः क्रियते। नैतैर्होमे पद्धतिवद्भावे निकृजात्यंतरविधाना
भावात् ग्रहो न भवति। अथ यदेदं विचार्यते। वरुणप्रघासेषु पशौ च श्रूयते
पृषदाज्यं गृह्णातीति तेनानुयाजेषु चरंतीति चाम्नातो वीऽस्य पदं संयुक्ता निगमाः
संति। देवानामाज्यपानावह स्वाहा देवानामाज्यपान्। देवानामाज्यपानां प्रिया धामा
नि। देवानामाज्यपा आज्यमजुषंतेति च। आज्यपशब्दो नोत्र प्रयाजानुयाज
देवता उच्यंते। प्रयाजानुयाजा वै देवा आज्यपा इति वाक्यशेषात्। अत्र च पृ
षदाज्येनानुयाजा इज्यंते तेन तद्विह संशयः। आज्यपशब्दस्याज्यदधिपानित्येव
मूहः। अथवा दधिपानिति। उत पृषदाज्यपानिति। आहोस्विद्धविकारेणो
वाज्यपानिप्रयोगइतियधुमयेह विस्तेतः प्रथमः पक्षः। यदि दध्येव तत्र द्वि
तीयः। यदि पृषदाज्यं नामैकं द्रव्यांतरं हविस्तत्र तृतीयः। अथवाज्यमेव ह

विः। तस्य तु प्रयत्नं चित्तनासंस्कारमात्रं तज्जननार्थवद् धि ततः सिद्धान्तः। त
त्र [illegible] पृषदाज्यं गृह्णाति हृदयं वा इदं ६ सर्पिश्चैव दधि चेति तु स्रुव संज्ञा ते
नाद् उभयं हविः। उभयमप्यनुष्ठानांगत्वेन समर्थ्यं। तस्माद् उभयोः प्रकाश
नं। अथवा शाखान्तरे हि हिरण्यस्तृणोतीति हिरण्यं घृते सत्तदभिघारयति। स्रुण स्त
रणाभिघारणवादाद् दधिसंस्कारार्थमाज्यं दध्नो वह विस्तनोद् धियानि त्येव
वज्ञ व्यां ने तदुभयोग्रहणोहि दध्नाज्यपोस्तु स्यात्वेद भ्रोवा [illegible] प्राधान्यं गम्य
ते। यागे त्वाज्यमेव पृषदाज्यग्रहणेन करणत्वेन श्रुत्या विधीयते। नोभयं। नापि द
धि। यस्य यागद्रव्यं तदर्थो ग्रहणसंस्कारः तस्माद् ग्रहणेप्याज्यमेव प्रधानं। त
स्य तु पृषत्तासंपादनार्थं दधिग्रहणं स्वार्थेनानुपयोगित्वात्। तथा विधे
तु दधनि तु स्थाने निर्देशात् उपस्तरणादिवादेन च प्राधान्यनिर्देशार्थवाद मात्र
तस्माद् विकारः। अन्यस्त्वाह। दध्नाज्याज्येन वद्रव्यान्तरं निष्पद्यते। तस्य वाचकः
पृषदाज्यशब्दः। तद्धि हविः पृषदाज्येनानुयाजान्यजतीति तस्मात् पृषदाज्यया
नित्येवं बन्धभिति प्राप्ते आह   आज्ये चादर्शनात् अविप्रतिपत्तिरित्यनु
वर्तते। पृषदाज्येनानुयाजान्यजतीति वाचनिके पृषदाज्ये सत्यपि आज्यवाह

नारी। निगमेषु आज्यशब्दे अविप्रतिपत्तिरविकारः। देवानाज्यपानित्येव
वक्तव्यमित्यर्थः। कुतः। अदर्शनात्। आज्यपानिति कस्य द्व्यान्तरस्यादर्श
नात्। तथाहि। स्याद्धिकारोपदिष्टे पृषदाज्यशब्दः समुदायशब्दयोर्द्व्यान्तरमभि
धत्ते। नत्वेवमस्ति। दृषच्छ्रोतो लोके चित्रवचनः। पृषद्गुः पृषन्मणिरिति। ते
न पृषदाज्येनेति चित्रेणाज्येनेत्यर्थः। तेन प्राधान्यस्यैवाज्यस्य चित्रता गुणमा
त्रविधानं गुणोपसंपादयितुं दधिगव्यघृतेन प्राधान्यनिर्देशोऽत्र वादमात्रं। ह
विरेव च प्रभृतानुपलक्षितो। न हि विर्गुणः। तस्मादविकारेणाज्यपानित्येव व
क्तव्यमिति सिद्धान्तः। किंच पशोमन्त्रवर्णात्। पशावेवोक्तमनुयाजप्रैषे पठ्य
ते स्वाहा देवा आज्यपा इति वनस्पतिप्रैषेऽपि। देवानामाज्यपानां प्रिया धामानी
ति। स्विष्टकृत्प्रैषेऽपि अयाड् देवानामाज्यपानामिति। मन्त्रनियमतः पृषदाज्ये
नैवानुयाजा इष्यन्ते। अत एव पशुसंबन्धिनो मन्त्रवर्णाद्देवानामाज्यपानि
त्यादावूहो न भवतीति गम्यते। किंच श्रुतेश्चाएकवचनश्रुतेरप्येकस्यैव प्रा
धान्यं गम्यते तेनोभयोः। अथ पृषदाज्यं गृह्णातीति यदि चात्र दध्नोऽपि स्यात्तदा द्वि
वचनं श्रूयेत। न च श्रूयते। अत एकवचनश्रुतेरप्ययमेवार्थोऽवसीयते। यदेके

स्यैवात्र प्राधान्यमिति तत्त्वाऽस्यैवेति प्राकृताधिनां । अथेदं विचार्यते । व्रीहि
भिर्यजेत यवैर्यजेतेति विकल्पेन विहितेषु भूयेषु मध्ये एकेन व्रीहिद्रव्येण
प्रारब्धे कर्मणि तस्य नाशदोषापहारादिके जाते पश्चाद्यदि व्रीहयो न प्राप्य
न्ते तदा किं विकल्पितं द्रव्यान्तरं यवरूपमुपादेयं उत व्रीहिसदृशमिति । तत्र
मुख्यद्रव्यस्य सति प्रतिनिध्युपादानस्यायुक्तत्वाद्यवानामुपादाने प्राप्ते सिद्धां
माह विकल्पे प्रवृत्तं कर्मान्तरत्वात् । विकल्पे सति यत्प्रवृत्तं येन कर्मारब्धं त
देव तस्मिन्प्रयोगे अंगं द्रव्यान्तरं हि विकल्पितं कान्तरमनंगं तेन व्रीहिभिः प्रयोगे उ
पक्रान्ते तेषामपहारादौ अलाभे च व्रीहिसदृशं नीवारादिकमुपादेयं न तु वै
कल्पिका यवाः । कुतः । कर्मान्तरत्वात् । यथारंभं हि समाप्यनीयं तत्र यदि व्रीहि
भिः प्रारब्धं तदा तस्मिन्प्रयोगे व्रीहय एवांगं । तेषु च विनष्टेषु स्वाम्या तद्गुण्ये
व यदि नीवारा गृह्यन्ते तेन तान्वदेवेदं कर्मेति प्रतीतिर्भवति तेन व्रीहिसदृशा
मेवोपादेयं । यवेषु पुनर्द्रव्यान्तरबुद्ध्योपादीयमानेषु व्रीहिभ्योऽन्यदेवेदं द्रव्य
मिति कर्मान्तरबुद्धिरुदेति साहश्याभावात् । तान्यथासति यथारंभं समापनं च
कृतं न भवति । एवं सर्वविकल्पितेषु यावदेकमनुपक्रान्तं तावत्सर्वेषां प्राप्तिः ६०

तेषामध्ये तु एकेन प्रयोगे प्रारब्धे तस्मिन्प्रयोगे नष्टे श्रुतद्रव्याद्द्रव्यान्तरं च
श्रुतसममेव। अनेन प्रयोगप्रारब्धप्रयोगस्य द्रव्यस्याभावेन सदृशमुपादेयं न
तु वैकल्पिकमिति। अथ चैवं सत्त्रयोजना। सोमेन जातस्य भावादि संज्ञो नेत्यनुव
र्तते। विकल्पे प्रवृत्तयवादिकं न प्रतिनिधेयं। कुतः। कर्मान्तरत्वात्। प्रतत्र सदृश
द्रव्यमानं द्रव्यान्तरं बुद्धौ पादीयमानत्वात्। कर्मान्तरत्वमापादयति। तच्चैनेष्य
नेयथारंभसमापनस्योचितत्वात्। द्रव्यान्तरस्योपादानं न स्यादिति। अतो व्रीह्याग्र
यणानंतरं प्राग्यवाग्रयणात्प्राप्तायां वैगुण्ये कृते तेषामश्रुतसमत्वात् सुतरां व्री
हिभिरेव प्रयोगोऽनुष्ठेयः। अथैतद्विचार्यते। व्रीह्यभावे प्रतिनिधित्वेन नीवारैः
प्रयोगे प्रारब्धे नीवाराणामपहारादिना भावे प्रतिनिधिं प्रतिनिधिभूतनीवार
सदृशमुपादेयं उत मुख्यद्रव्यं व्रीहिरूपं तत्सदृशं वेति। तत्र यथैव वैकल्पि
केषु कस्मिन्सदृशे तस्यैव तत्प्रयोगांगत्वात् तदपचारे वैकल्पिकान्तरं मुख्य
मपि वा तत्प्रयोगांगं तत्त्वान्नोपादीयते। न त्वेवं प्रतिनिधौ प्रवृत्ते तस्यैव
तस्मिन्प्रयोगेऽगत्वात् तदपचारेण सदृशमेवोपादेयं न तु मुख्यं तत्सदृशं वा
तस्य तत्प्रयोगांगत्वादिति प्राप्ते सिद्धान्तमाह। प्रतिनिधौ तत्कालात् प्र

द्रे.प्र श्री ६१ तिनिधित्वं चेन्नीवारादेर्विनष्टे न प्रतिनिधिभूतं नीवारा[illegible]दिसाम्येन प्र
नु तिनिधित्वमुपादानं वा किं मुख्यद्रव्यमेव व्रीहिरूपमुपादेयं संभवेन दृष्टं भवे तु
मुख्यसादृश्येन नीवारादिः प्रतिनिधिरुपादेयः। ननु प्रतिनिहितं नीवारसा
दृश्येन कुतः न कालात्। स कालो यस्यासौ न तत्कालः। भावप्रधानो निर्देशः। प्र
तिनिधेस्तत्कालत्वादित्यर्थः। यतः प्रतिनिधेः स एव कालो यो मुख्यद्रव्यस्याभावः
।ते न प्रतिनिधौ नीवारे विनष्टे मुख्यस्य लाभे मुख्यमेवग्राह्यं। नष्टलाभे नीवारा
61 दिकं व्रीहिसदृशमेवेति ननु कदाचिन्नीवारसदृशमित्यर्थः। नहि नीवाराणां मं
गलमस्ति श्रुतिलिंगादिप्रमाणाभावात्। श्रुतं द्रव्यसाधारणं तु येव यवानी
वारगतादीर्घश्रूकसतुषत्वादयस्तदुपादीसयाप्रवर्तमानो नांतरीयकं न या
नीवारानुपादत्ते तस्मान्नीवारस्यानंगत्वात्। व्रीहियवानामेवांगत्वात्तन्सिद्ध्य
र्थं संभवे व्रीहयोऽसंभवे तत्सदृशमुपादेयं न नीवारसदृशमिति सिद्धांतो वैक
ल्पिकांतरं तु पूर्वाधिकरणे निराकृतमिति नदुपादानस्यात्र शंकैव नास्तीति न
नु यदि प्रमाणाभावान्नीवारादीनामनंगत्वं श्रुतिलक्षणस्य तु पत्नीकादेरंगत्वा
त्तस्य प्रक्रांतस्यापचारेण तत्सदृशमेवोपादेयं न सोमसदृशमिति चेन्न। ननु श्रु ६१

निरपेक्षत्वप्रतिनिधिनियमार्थं गासत्त्वं तथाप्यसता त्वकाचिद्दूरांशका सोमावय
वानामन्यत्रापि सद्भावे सति पूतीक नियमादेवं विज्ञायते । नन्वेवं पूतीकांशोप्यस्या
वेलायां त्रिःयांगमितिद्रस्य था सोमावयवस्यांगत्वे तस्यान्यत्रापि संभवान्न पूती
का एवोपादीयेरन्नात्र नियमविधिरुपरुध्येत । तस्मात्सूतीकस्याप्यंगत्वात्त
दपचारेत सदृशमुपादेयं न सोममिति । तासदृशसिद्धांतस्तु । सत्यं न सोमावयव
मात्रमंगं किं तु पूतीकावयवसहिताः सोमावयवाः । न तु तावता पूतीकावयवा
त्रिःयांगं भवंति । प्रतिनिधिनियमव्याघातप्रसंगात् । किं तु सोमावयवा एव त्रि
यांगं पूतीकावयवसाहित्यं तु तेषामेवांगमेवावरुणं ग्रह स्यैव पयः संसर्गः ततः
पूतीकोपचारे ह्युपसंपादनार्थमुभयसदृशमुपादेयं न केवलं पूतीकसदृशं
नापि केवलं सोमसदृशं । तु नयसदृशालाभे तु सोमावयवानां प्राधान्यात्तत्
दृष्ट्या सोमसदृशमेवोपादेयं न पूतीकसदृशमिति । अतश्च मुख्यद्रव्यस्या
त्यन्तालाभ एव प्रतिनिधेः साधनत्वं । तेन मुख्यद्रव्ये सति नांशस्य प्रतिनिधिद्रव्ये
ण यागे कृते पुनर्मुख्यद्रव्येण यागावृत्तिः । अथ यथार्थद्रव्ययोर्विरोधस्तत्र
कथं नद्ययामुख्यद्रव्यंवाहिरादिकं नियोजनादिकयासमर्थं विदधाति । प्रति

62

निषिद्धत्वं च कार्यसमर्थानां तत्र यदि मुख्यं द्रव्यं कं गत्यैतान्द्यानेन कार्ये
नियुक्तः पश्चान्न पञ्चमणहूपं न सिद्ध्यति। यदि हि च कार्यसिद्धिसमर्थं प्रतिनि
षिद्धत्वं गत्यन्तेन द्यामुख्यद्रव्यं गृहीतेन तस्यानन्तानत्रैवं संदेहः किं कार्यसाधनी
सामर्थ्यमपि मुख्यं गन्तव्यम्। उत मुख्यमनाहृत्य कार्यसमर्थं प्रतिनिषिद्धद्रव्य
मि-ति। तत्र मुख्यामुख्ययोर्मुख्ये संप्रत्यय इति न्यायेन मुख्यस्यैव प्रतिग्रहे
प्राप्ते सिद्धान्तसूत्रं अर्थद्रव्यविरोधेर्थसामान्यं तत्परत्वात्। अर्थः प्रयो
जनं कार्यमिति यावत्। द्रव्यं मुख्यद्रव्यं। अर्थद्रव्यविरोधे कार्यमुख्यद्रव्य
योर्विरोधे सति अर्थसामान्यं अर्थेन प्रयोजनेन कार्येण सामान्यं संयुक्तं का
र्यसिद्धिसमर्थं यत्तद्धनमपि प्रतिनिषिद्धद्रव्यं उपादेयं कुतः तत्परत्वात्।
द्रव्यस्यार्थपरत्वात्। कार्यार्थपरत्वात्। कार्यार्थत्वात्। कार्यार्थं हि द्रव्यं ननु अह
ष्टार्थं। येन च कार्यं न सिद्ध्यति तद्धनमपि सदृश्यं न सममेव अतो द्रव्यस्य
प्रयोजनार्थत्वात् विरोधे तु धनमयनाहृत्य प्रयोजनक्षममेवा धनमपि प्र
तिनिषिद्धद्रव्यमेवोपादेयं। ननु मुख्यं कार्यासमर्थमिति सिद्धान्तः। तदुक्तं जैमिनि
ना। अर्थद्रव्यविरोधेर्थो द्रव्याभावे तदुत्पत्तिर्द्रव्याणामर्थशेषत्वादिति। यद्वा ६२

पुनरश्वशफपरिमाणेन यशेषकार्येभ्यश्चापर्याप्ताः पुरोडाशजातिमात्राभिव्य
क्तिसमर्था व्रीहयो लभ्यापि लभ्यं तेन तदानैरेव पुरोडाशः कर्तव्य इत्यनेनैवारेरिति
संशयः। तत्र यद्यपि यागो हेतुत्वेन व्रीहयो विधीयन्तेन यागस्य जातिशब्द पुरोडा
शविधानात्तत्तेषां साक्षाद्यागसाधनता। किंतु पुरोडाशप्रकृतितया। तत्रश्च
ल व्रीहीणामपि पुरोडाशांगत्वाविशेषेणैवेडाप्राशित्रावत्तु-द्वीकरणषडवत्तं ब्रह्म
यजमानभागभक्षरूपाणां शेषकार्याणामश्वशफपरिमाणस्यैव सर्वेषां पु
रोडाशांगत्वात्तांगप्रधानभूतो विशेषः। तेनाश्वशफपरिमाणस्य मध्यसांशे
षकार्याणां वा तु स्तहा यव्रीहिशास्त्रमेवं बाधितव्यं। किंच प्रतिनिधिश्यापुपादा
ने व्रीहिशास्त्रस्यनात्यंतबाधोपि। व्रीहुपादाने हि शेषकार्याणामसंतलोपः
स्यात्। प्रधानांगभूतपुरोडाशजातिव्यक्तिमात्रसमर्थेषु सत्स्वपि व्रीहिषु शे
षकार्यविध्य बाधायतनी वापत्तौ पादे याज्ञिपूर्वः पक्षः। सिद्धांतस्तु। अस्या
तावद्यागांगत्वमेव व्रीहीणामवगम्यते। यद्यपि तथा। यद्यपि पुरोडाशप्रति स्त
कृतित्वं व्रीहीणामवगम्यते तथापि तद्वययाण्वपुरोडाशनामापन्ना याग
द्रव्यं भवंति। ते न चनापारेषूपादीयमानेषु विगुणाभवंति। तत्रश्च प्रधानमेव वि

दे·प·श्री गुणं स्यान्नान्तरं सान्नाय्यं। तस्मात्प्रधानांगभूतपुरोडाशजात्यभिव्यक्तिसमर्थेषु
६२ व्रीहिषु सत्सु शेषकार्यार्थं व्रीहिद्रव्यस्यासंभवे पुरोडाशमहत्त्वार्थं नीवारपरि
ग्रह इति। एवं सान्नाय्येपि प्रधानयागसाधनसमर्थे तु बहुयत्नपरिमाणम
पि यावत्तदुग्धं लभ्यते न कथंचित् ˘ गणना हस्य व्रीहिभिरेव पुरोडाशकार्ये नष्टे छ्य वत्तमाप्यपर्या ४
षकार्ये तु रोधेन नीवारोपादानमिति सिद्धं। तदुक्तं मंडनेन [illegible]
नावयवत्सान्नाय्यालाभ इति चरून्न भवतः। ह्यवदानमात्रसमर्थं मुख्यद्रव्याभावे
तावर्थद्रव्यविरोधे यः सामान्यमिति न्यायेन प्रतिनिध्युपादानमेव युक्तं। अथ य
त्र गुणद्रव्ययोर्विरोधस्तत्र कथं। तद्यथा नेत्रैतत्परिहृत्ये कृत्स्न व्रीहीणां नव
नि भिन्नानामिति। तत्र ये व्रीहयः संति मुख्याः ते अकृत्स्नाः। ये च नीवारास्ते च कृत्स्नाः
। तत्र किं मुख्यद्रव्यमनादृत्य गुणानुरोधेन नीवारोपादानं उत कृत्स्नं गुणमनादृ
त्य मुख्यद्रव्यं व्रीहय इति। तत्र व्रीहीणामुपादाने कृत्स्नगुणहानिः स्यात्। नीवार
णामुपादाने च तस्यानुग्रहः व्रीहिशास्त्रमपि किंचिन्न्यूनं संपादितं भवति अतः
कृत्स्नानां नीवाराणामुपादाने प्राप्ते आह गुणद्रव्ययोर्द्वयं प्रधानयोगात्तु गुण
द्रव्ययोर्विरोधे कृत्स्नत्वादिगुणमुख्यद्रव्ययोर्विरोधे सति गुणमनादृत्य द्रव्यमु ६२

त्यम्द्रव्यमेवोपादेयं। नगुणानुरोधेनप्रतिनिधिर्द्रव्यं। कुतः। प्रधानयोगान्द्रव्य
स्याप्यतोद्रव्यंप्रधानेनयुज्यते। यतस्तत्रपद्यमानं यागंसाधयति। अतोयागस्य
द्रव्यंसंनिकृष्टंगुणोविप्रकृष्टः। अतोगुणमनादृत्यमुख्यंद्रव्यमेवोपादेयमित्ये
वंप्राप्तेआह नसमत्वात्। द्रव्यमेवप्रधानयोगीतियदुक्तंतन्न। कुतः। समत्वा
त्। गुणयोर्गुणद्रव्ययोः सहकारित्वात्। द्रव्यमपिप्रधानयोगि। अतस्तत्रगुणोपीत्ये
वंप्राप्तेउक्तमेवसिद्धांतंद्रढयति गुणानुग्रहात्। गुणेनानुग्रहीतंविशेषितंद्रव्य
मेवप्रधानयोगि। गुणस्तुतत्रविशेषणमात्रं विशेष्यंतुद्रव्यमेव। अतोविशेष
णविशेष्ययोर्विशेष्येसंप्रत्ययप्रवृत्तिन्यायाद्द्रव्यमेवगुणानुग्रहीतंप्रधानयोगीति
नैतदुभयंसमं। अतएवाग्निहोत्रेपुंवत्साया अग्निहोत्र्याः पयसोऽभावेपुंवत्सल
क्षणंगुणंहित्वास्त्रीवत्साया अप्यग्निहोत्र्याः पयसाहोतव्यं। एवंपालाशानांपरिधी
नामभावेऽन्येषामभावे आर्द्रत्वरूपंगुणंत्यक्त्वा शुष्का अपिपालाशाग्न्याद्याः। बाहुमा
त्राणामसंभवेअबाहुमात्रा अपि। एवंसर्वत्रोत्स्यं। यदापुनःखदिरस्तनुत्वात्स्रु
णादिसंस्काराणामयोग्यः। नियोजनमात्रेयोग्यः। कदरश्चमहान्संस्कारयोग्यस्त
दाकस्योपादानमितिसंदेहः। तत्रसंस्कारक्षमकदरोपादानेखदिरविधेर्वैकल्यमा

त्वेनात्यंतपीडाभावात्। अत्र सम खादिरो पादाने तु संस्कारविधीनामत्यंतपीडा
प्रसंगात्प्रतिनिधिरेवोपादेयः। मैवं। नहि गुणानुरोधेन प्रधानमुपरोद्धव्यं भवति।
तेन भवतु संस्काराणामत्यंतपीडा न तु प्रधानं तदनुरोधेन कथंचिदपि पीडयि
तव्यं। तस्मात्तत्क्षणाद्यसंस्कृत एव खादिरे पशुं नियुंजीतेति। उक्तं जैमिनिना। द्रव्यसं त४
स्कारविरोधे द्रव्यं तदर्थत्वादिति। यदा पुनर्मुख्यमलब्ध्वा प्रतिनिधिमुपादातुं
प्रवृत्तेनानंतरं मुख्यं लब्धं तदा प्रतिनिधिः संकल्पितत्वात् भिध्यासंकल्पदोषपरि
हाराय मुख्यमनादृत्य प्रतिनिधिरेवोपादेय इति प्राप्ते अभिधीयते। यथाशक्ति शास्त्रा
र्थं संपादयामीत्येवं शास्त्रार्थविषय एव संकल्पः कर्तव्यो न तु प्रतिनिधिस्वरूपं सं
कल्पितव्यं। न च मुख्ये विद्यमाने प्रतिनिधिः शास्त्रार्थो भवति समग्रानुष्ठानशक्त्या
मसत्यां हि विकलांगानुष्ठानमपि शास्त्रार्थं भवति। न संकल्पमिति। तस्मान्मुख्यप्रा मुख्यसामग्रीमपि
प्तौ मुख्यमेवोपादेयं। तदुक्तं जैमिनिना। मुख्याधिगमे मुख्यमागमो हि तदभा
वादिति। यदा पुनर्मुख्यं खादिरमलब्ध्वा प्रतिनिधिं कदरमुपादाय तत्क्षणादिषु
कतिचित्संस्कारेषु कृतेषु प्राक् प्रयुनियोजनात् खादिरं लभते तदा किमुपात्तेन प्रति
निधिना कार्यं कुर्यात्। उत तत्त्यागेन मुख्यमेवोपादाय संस्कारांश्च पुनः कृत्वात ६५

तत्रैव पशुं नियुंजीतेति संशयः। तत्रोपादाने प्रतिनिषेधो निवृत्तव्यापारं शास्त्रं ना
न्यदुपादापयतीति तस्मान्न मुख्योपादानमिति प्राप्ते ब्रूमः। नोपादानपरं शास्त्रं ये
न तस्मिन्नश्रुते निवृत्तव्यापारं स्यात् प्रधानानुष्ठानार्थं शास्त्रं न च प्रधानं संनिमु
ख्ये प्रतिनिधिना क्रियमाणं विगुणं स्यात्। अतः संस्कृतमपि कदरं हित्वा खदि
रं संस्कृत्य तस्मिन्पशुर्नियोक्तव्यः। ये च कदरे चूतासंस्कारास्तेषां खदिरे आवृत्तिः स्या
त्। प्रधानवदंगगुणे हि तन्न्यायप्रवृत्तत्वात्। एवं पशुश्रीषादिष्वपि द्रष्टव्यं। तत्रापि प्रा
यणानां मुख्यद्रव्यकल्पनेऽसंस्कृतमपि पुरोडाशादिकं प्रतिनिधिद्रव्यनिष्पादि
तं सत्का मुख्यद्रव्येण पुरोडाशान्तरं संस्कृत्य तेन यागः साधनीय इति। तदुक्तं प्रवृ
त्ते ...वेदिति। अथ यदा प्रतिनिधिना नियोजने चूते यदा मुख्यमुपलब्धं न तदा चूत
मपि नियोजनं साधु स्यात् पुनः खदिरे कर्तव्यमिति मन्वानस्योत्तरं। चूते नियोज
ने कृतेऽपि खदिरोऽनर्थक एवानियोजनार्थं हि न तदुपादानं। न च चूतं न गुणानुरोधा
दावर्त्तयितव्यं। अतो नावर्त्तव्यः खदिरः। तदुक्तं नानर्थकत्वादिति। अथवा सत्त्वद
यमिदमेकाधिकरणं। प्रवृत्तेऽपि कृतेऽपि प्रधाने मुख्योपादानं स्यादिति चेन्नानर्थक
त्वादिति। अथेदं विचार्यते यानेकप्रधानसंबंधीन्यंगकं विं तेषामनुष्ठानेक

मो॰ए॰

दे॰ प्र॰ श्री
६५
65

ष्विक्रमनियमो नास्ति उतास्तीति। तत्र सूत्रेणैव पूर्वपक्षमाह ४ कर्मणामानुपू
र्व्येण युगपद्भावात्। आनुपूर्व्यं पौर्वापर्यं क्रम इत्यनर्थान्तरं कर्मणामिति अग्न्य
न्वाधानादीनामंगकर्मणामनुष्ठाने आनुपूर्व्येण भवति क्रमनियमो न भवति
कुतः युगपद्भावात्। यतस्तान्यंगानि यदा प्रधाने नापेक्ष्यंते। यदा युगपद्भावेनैव
यौगपद्येनैव सहैव संबंधं प्राप्नुवंति न क्रमेण ततश्चैषां नियतेन क्रमेणानुष्ठा
नेकारणाभावात् कर्तुरेकत्वादवश्यंभाविनि क्रमे येन केनचिद् नियतेन क्रमे
णानुष्ठानं अर्थनिर्वृत्तेश्चायेन केनचित् क्रमेणांगानुष्ठाने क्रियमाणे अर्थनि
र्वृत्तिरंगकलापनिष्पत्तिः सुखेनैव भवति। नियतक्रमेण क्रियमाणे तु नियतक्र
मस्यानागतस्य वस्तुनः प्रतीक्षणेन विलंबात् बहुना कालेन स्यात् तथा सति प्र
योगप्राशुभावो न स्यात्। प्रधानप्रत्यासन्नकाले त्वंगानां विहितः अंगानां नि
यतक्रमेणानुष्ठाने च सोऽपि अतिक्रांतः स्यादिति तस्मादंगानुष्ठाने क्रमनियमो नेति ति
पू र्वः पक्षः। सिद्धांतमाह स्याद्वानुपूर्व्येण नियमः श्रुत्यर्थक्रमेभ्यः वा शब्दः पूर्वपक्ष
निरासार्थः। अग्न्यन्वाधानादीनामंगकर्मणामानुपूर्व्येण नियमः स्यात्। अनुष्ठा ६५
ने क्रमनियमो भवेत्। नानियमः। केभ्यः प्रमाणेभ्यः। श्रुत्यर्थक्रमेभ्यः। श्रुतेः अ

र्थानि। क्रमाच्च श्रूयते सावित्राय याहुत्वा दशाहे तेषां गृहपतिः प्रथमो दीक्षते। अ
थ ब्रह्माणं दीक्षयति। अथोद्गातारमथ होतारमित्यादिना क्रमस्यादीनां दीक्षा
विधीयते। यजमानत्वादेव तस्याः प्रवृत्तिक्रमएव। अर्थादपि क्रमो प्राप्तेः॥ क्रम
स्य तन्न्यतः प्राप्यमाना स एवात्र विधीयते। तथा तस्मादेष दर्शमोग्नहोगत्याने
३ रत्नीय एव वषट्क्रियते इति विगम्यते। तथा यावेषणसंयवनयोरवघातपेषणयो
श्च अग्निहोत्रं जुहोति यवागूं पचतीति क्रमेण श्रुते पि अर्थात्पूर्वं पाकस्ततो होम
इति। होमद्रव्यं हि यवागूः तदुत्पत्त्यर्थः। श्रुत्यालिंगेन च पाकः। स च पश्चात्क्रिय
माणोऽनर्थकः स्यात् होमोप्युत्पत्तिद्रव्येन निर्वर्त्यताम्। ततः पश्चाद्धोमः कार्यः क्रमः
पाठक्रमः स च द्विविधः श्रुतिपाठक्रमो मंत्रपाठक्रमश्च। उभयविधोपि क्र का
मेतिपमेकारणं भवति। नियतेन हि क्रमेण पदार्थविधिपाठो मंत्रपाठश्च व २।५
र्तते। तत्रैव मवगम्यते। येन क्रमेण पदार्थविधिपाठो मंत्रपाठश्च वर्तते तेनैव क्रमेणा ८४ व४
नुष्ठानमिति। क्रमांतरेणानुष्ठाने त्ववगतस्य क्रमस्य त्यागः। अनवगतक्र
मस्योपादानमित्यसंगतं स्यात्। तस्मात्स्याद् क्रमादपि क्रमनियमो गकर्मणां ८
भवतीति प्रकृते च विकृतौ अतोपि कारणात्पाठक्रमेणांगकर्मणोनुष्ठानं म१

×अग्न्यादीनि क्रमस्य×

दे॰ प्र॰ श्री भवति। यतो विकृतौ प्राकृतेनेव पदार्थानां क्रमः क्रतिरनुवर्दे(ति) यथा महापि
६६ तृयज्ञे सन्तत एव प्राकृतं ब यजुर्हरनीत्यादिनास यज्ञोपवीती भूत्वास्मातिग्र
हणातीत्येव मंत्रेण। अत्रा अग्रहणे मज्ञोपवीतित्वविधि परे वाक्ये प्राकृतं क्र सो२
मं हर्त्रीयति। यदि पाठक्रमेणानुष्ठानेन स्यात् तदानेनैव क्रमेणानुवादेन
स्यात्। अपरे त्वन्यथा व्याचक्षते प्राकृतं च विकृतौ। विकृतौ प्राकृतयोः कर्म
णोः संनिपाते प्राकृतं पूर्वं कर्त्तव्यं पश्चाद्वैकृतमिति। तद्यथा प्राकृतौ प्रास्य
नृणां चक्षुष्याइत्यात्मालमालभनइति प्रस्तरणं तृणेनेतरमात्मालंभनउ
क्तः। विकृतौ च प्रकृस्य तृणेनैनवैरनीति तृणानुप्रहरणानंतरं वाजिनयाग
उक्तः। तत्र पूर्वं प्राकृतं आत्मालंभोदकस्पर्शरूपं कृत्वा पश्चाद्वाजिनयागः क
र्त्तव्यः। तथा प्रकृतौ हविरासादनोत्तरकालं हविरालंभात्मालंभोदकालंभा
विहिताः। विकृतौ वासा यदहवीष्यग्निमंथनीत्यग्निमंथनं हविरासादनोत्त
रकालं विहितं। तत्र पूर्वं प्राकृतं हविरालंभात्मालंभोदकालंभाः पश्चाद्वैकृ
तमग्निमंथनं। एवमन्यासामपि श्रौतोपदेशस्य परस्पराजानं प्रपादयसीत्येतन
दप्यदाहार्यं। अत्रापि पूर्वं प्राकृतं हविरालंभामात्मालंभोदकालंभाः प ६६

श्चाहृच्चूर्णंसोमप्रपाहनादित्तयापितृयज्ञोपरिषेकाप्राणिगृह्यानक्षणमार्ज
नपवित्रप्रतिपतिदक्षिणादानान्यतएवसिद्धानिमुत्सायांचसवतीयपुरोडा
शानांनिर्वपणाद्धूर्द्धभाविनः प्रागलंकरणाद्येपदार्थास्तेषांप्राक्प्रवरणाद्धो
मादतएवानुष्ठानंसिद्धं। अतएवपशौप्राचूर्तंपूर्वमित्यस्यबाधनायपलं
करोति। उत्तराघारमाघाघापशुपूर्वं ऽ सममनक्तीति। अत्रपूर्वमित्यनेनप्राचू
तध्रुवासमंजनात्पूर्वंपशुसमंजनंविदधाति। तस्मात्समीचीनमेतद्याख्या
नं। अथक्रमप्रमाणानांविरोधेबलाबलंनिर्णीयते। यत्रपाठक्रमार्थ
क्रमयोर्विरोधोभवतितद्यथासर्वेपणाशाखायावत्सानयाकरोतिलामच्छि
नत्तीतिपाठक्रमः। अर्थस्तुअनेनक्रमेणानसिद्ध्यतिनह्यच्छिन्नयाहस्तस्तु
पाशाखयावत्सापाकरणंकर्तुंशक्यंतावत्सापाकरणायेवचच्छेदनमिति
तत्रकिंपाठक्रमात्क्रमाध्यवसानमुतार्थक्रमादितिसंशयेसत्याद्विरोधे
र्थस्तत्परत्वात्। पाठक्रमार्थक्रमयोर्विरोधेअर्थक्रमएवबलीयान्। नपाठ
क्रमः। तत्परत्वात्। पाठस्यार्थपरत्वात्। अर्थार्थत्वात्। कार्यसिद्ध्यर्थत्वादि
र्थः। तेनपूर्वंछेदनंपश्चात्तयाछिन्नया शाखयावत्सापाकरणमिति। अथप

दे॰ प्रश्नो
६७

67

त्र श्रुतेः श्रुतिपाठक्रमस्य च विरोधो भवति तद्यथा संस्थिते यज्ञे ब्राह्मणेन
र्पयितव्यमित्यादि श्रुतेः। कर्मणि समासे प्रेषं विदध्यात् इति पाठक्रमो नुस्थितश्रु
तेः पश्चात् स्याशिराबर्हानास्त्रु पूर्वमिति। तत्र केन क्रमेणानुष्ठानमिति संशये सत्या
ह श्रुतिः क्रमाद् आनुमानिकत्वात् क्रमादिति श्रुतिपाठक्रमा श्रुतिर्बलीयसी
ति न श्रुतिप्रतीतक्रमेणैव संस्थिते कर्मणि प्रेषोच्चारणं। न पाठक्रमेणा कृतः। आ
नुमानिकत्वात् पाठक्रमस्य। अर्थात् श्रुतेः प्रत्यक्षत्वादिति शेषः। प्रत्यक्षा हि श्रु
तिः संस्थिते यज्ञ इति पाठक्रमे तु अनुमानं। अतो नेन क्रमेण पदार्था अनुष्ठेया। य
तो नेनैव क्रमेण पाठ इति। दुर्बलं च प्रत्यक्षाद् अनुमानं। अतः श्रुतिक्रमेणानुष्ठा
नमिति सिद्धं। एवं तस्मादेषदर्शमो ग्रहो गृह्यते इति य एव वषट्कृयत इति त
द्व्यत्रोदाहरणं किं श्रुतिमन्त्रपाठात् श्रुती यत्स्थानेन गृह्यते उत श्रुतिबलाद् द्वा
म इति। तत्र श्रुतिबलानुदद्याम इति सिद्धान्ति। अथ यत्र चोदनापाठक्रमस्य मं
त्रपाठक्रमस्य च परस्परं विरोधो भवति यथाऽग्न्याधिश्रपणो सो सा वाऽग्नमधि
श्रयतीषेत्वेत्यधिश्रपणं विधाय तदनंतरमेव तत्सु नरू हामयसूजे त्वे
ति चोदनपाठक्रमः। मंत्रपाठे आज्याधिश्रपणमंत्रानंतरं द मोसि विश्वायु ६७

रित्यादिपत्नीसन्नहनमंत्राणां मंत्रगणोपठितत्वात् आज्योद्वासनमंत्रस्तु ऊर्द्ध्वत्वे
तिपाठितपूर्वाधिकरणे हि क्रमानश्रुतेः प्रत्यक्षत्वाद्बलीयस्त्वमुक्तं। अ
त्रोभयोः प्रत्यक्षत्वाविशेषे किं चोदनापाठक्रमेण आज्योद्वासनं कर्त्तव्यमुत मंत्रपा
ठक्रमेणेति संशये समाह मंत्रचोदनयोर्मंत्रबलं प्रयोगित्वात्। मंत्रचो
दनयोरिति मंत्रपाठचोदनापाठयोर्विरोधे मंत्रबलं मंत्रपाठ एव बलवानि
त्यर्थः। कुतः प्रयोगित्वान्मंत्राणां। मंत्रा हि कर्मकाले प्रयुज्यंते पठ्यंते। न चोद
नावाक्यानि। अतो मंत्रपाठः पदार्थानां संनिकृष्टो चोदनापाठस्तु विप्रक
ष्टः। तथा हि समिधो यजतीत्यनेन पदार्थो विहितः सोनुष्ठानवेलायां येन वा
क्येन विहितस्तद्वाक्यं स्मारयति। तेन वाक्येन स्मृतेनानुष्ठानवेलायां स पदार्थः
स्मारितः। सन्ननुष्ठीयत इतीतरेतराश्रयं स्यात्। अर्थेन वाक्यं स्मार्यते वाक्येन वार्थो
र्थ इति। नैष दोषः सामान्यविशेषभेदात्। सामान्येन हि दार्शिकमंगं कर्त्तव्यमित्यव
गम्यते विशेषस्मरणार्थं विधायकं वाक्यमपेक्ष्यते तेन चात्म[illegible]तेन पश्चात्
द्विशेषः स्मारितोनुष्ठीयते। अनुष्ठितश्चासौ[illegible]र्थः। इत्येवं द्वितीयं पदार्थेन स्मा
रयति। अर्थानां संख्यानपेक्षेण रूपेण योर्वापर्यस्यानक्रमसत्त्वात्। किं तर्ह्यनु

दे. प्र. श्री.
६८

ष्ठानोत्तरकालं योसौ कृतस्नानमात्मालोचयति। समिधाग्नेयं त्यक्तइति स त्वान्योऽन्यमा
नो येन समिधो यजतीत्यनेन ब्राह्मणवाक्येन विहितस्तस्मारयति तत्र स्मर्तं स्वा
दुत्तरं तनूनपातं यजतीसेतं स्मारयति कुतः पाठान्तानतः परं हि तत्स्थितमि
तित्त ब्राह्मणं पुनः पदार्थं विदधाति विधिरेव तस्य कार्येन स्मृतिः अनुष्ठान
वेलायां तदेव ब्राह्मणं विधिव्यापारं कृत्वा विरनिवृत्तव्यापारे प्रयोगकालाद्ब
हिर्भूतं स्मारकमपेक्षितं। अयं मन्त्रपाठो ब्राह्मणपाठे विप्रकर्षः। मन्त्रः पुनर
न्तः क्रतुप्रयुज्यमानः परिसमाप्यमान उत्तरं मन्त्रं पर्युपस्थापयति स चोत्तरो
मन्त्रः पर्युपस्थाप्य उत्तरं पदार्थं पर्युपस्थापयन्नेव पर्युपतिष्ठते। तस्मात्तत्रा
लोचनान्तरापेक्षाभावान्नास्ति विप्रकर्षः। एतदुक्तं भवति। स्मारकक्रमेणैव
ह्यनुष्ठानक्रमः न च मंत्रे अनन्यार्थे सति ब्राह्मणस्य स्मारकत्वं। अप्रयुज्यमा
नत्वात्सामर्थ्याभावात्। नहि निर्वपामीति वान्निर्वपेदिति पदमुच्चारितम
नुष्ठानोपयिकमनुष्ठेयप्रकाशनं करोति। किंतु संबंधिमात्रं तत्प्रयोगबहि
र्भूतं सहनेन वाक्येनेदं विहितमतएतत्करोमीत्येवमालोचनेन न स्मारकं
भवति मंत्रस्तु प्रयुज्यमान एवाभिधानत एव स्मारक इति संनिकृष्टः विप्रकृष्टा ६८

68

च्च संनिकृष्टबलवदित्येवं प्राप्ते आह न समत्वात्। मंत्रपाठ एव बलवानिति य
दुक्तं तन्न। कुतः समत्वान्मंत्रपाठचोदनापाठयोः। कथमुभयोः समता। उच्यते
। मंत्रः कर्मणि करिष्यमाणस्य कर्मणः स्मरणार्थं प्रयुज्यते। चोदनानु कर्मणो
विधायिका। अत एव चोदनायाः प्रवृत्तिः पूर्वा। यतः पदार्थे विहिते सति
पश्चात्तत्स्मरणार्थं मंत्रः प्रयुज्यते। अतः सममेवेतदिति प्राप्ते सिद्धांतमा
ह गुणानां तु भूयस्त्वात्। तु शब्दः पूर्वपक्षनिरासार्थः। नैतदुभयं समं। किं तु मं
त्रपाठ एव बलवान्। कुतः। मंत्रेषु गुणानां भूयस्त्वात्। गुणानां बाहुल्यात्। य
तो चोदनापाठापेक्षया मंत्रेषु बहवो गुणा विद्यन्ते। तद्यथा कर्मकाले उच्चा
रणं पदार्थस्मारकं वचनो मंत्रार्थवादादि कर्तव्यव्यवधानरहितः क्रमेणाप
ठ्यं तेन नोत्तरमुत्तरं पदार्थं करोतीति स्मारयितुं शक्नुवंति। नैवं चोदनापाठः। वि
धेयार्थस्तावत् वाक्यसंदर्भाव्यवहितस्तेन मंत्रवत्स्मारयितुमशक्यत्वात्। न
च कर्मकाले तस्योच्चारणं विहितं मंत्रवत्। अतो निरपि मंत्राणां गुणाभूयस्त्व
रि माह तस्मादेतदृष्टिं गणाभ्यनूज्ञमित्यादिना। यो हि स्वप्रतिपादितस्यार्थस्य
प्रामाण्यार्थमन्यस्योक्तिं प्रदर्शयति स स्वात्मापेक्षया। उक्तं च स्वेवदर्शय

दै. प्र. श्री
६८

ति। ननु बृहस्पतिनगुणभूयस्त्वं मैत्रेष्वग्नीषोमीयपाव एवं बलवन्निति सि-
द्धं। पदार्थानां क्रमनियमे श्रुत्यादीनि प्रमाणानि। तानि तेषां विरोधे
बलाबलं चोक्तं। अथेदं चिंत्यते। यत्र बहूनि प्रधानानि सह क्रियंते। यथा द-
र्शपूर्णमासयोराग्नेयोपांशुयाजाग्नीषोमीयैंद्राग्नादीनि। यथा चानु-
र्मास्यपर्वसु वाजपेयेतिरात्रपशुषु श्राप्रिसमद् शसुप्राजापत्येषु च
। तत्रारादुपकारकाण्यंगानि सर्वेषां तंत्रेण क्रियंते इति वक्ष्यति कर्मणां यु-
गपन्न्यावृत्तं त्रमित्यत्र तेन न तेषु क्रमचिंता। संनिपत्योपकारकाणि

69

तु द्रव्यसंस्काररूपाणि प्रतिप्रधानं भेदेन कर्तव्यानि। तत्र चिंत्यते नाभि-
किं एकैकस्य सर्वाणि कृत्वा परस्य कर्तव्यानि। किं वा समानः एकैकः पदार्थः
भि सर्वेषां कर्तव्य इति। तत्रैकैकप्रधानं प्रत्यावृत्तिनामि स्वांगान्यपेक्षंते। तत्रां-
गानां प्रधानकालत्वात्स्य न्याय्यत्वाद्देशे वृत्तिस्मिन् गुणकांडमपवृद्धु पा-
त्। इतरथा हि पदार्थानुसमये सति स्वप्रधानस्याहि प्रच्युष्येरन्। यथैक-
स्यासादनं कृत्वा परस्य तद्देव क्रियमाणे तदापूर्वस्योत्यादिनां नैस्पयोव्यं जं
वायास्यात् सह वचनं ... दुपकारकस्या हि स्वमात्रेण ... प्यकपद्यते ६८

तस्मात्काण्डानुसमय एवेति प्राप्ते आह । तुल्यसमवाये सामान्यपूर्वमा
नुपूर्व्ययोगात् । तुल्यसमवाये तुल्यानां प्राधानानां सह प्रयोगे द्रव्यसंस्का
रस्य पाणिसंनिपत्योपकारका ये ऽंगानि सामान्यपूर्वं कर्तव्यानि । पूर्वः पू
र्वः पदार्थः सर्वेषां समानतन्त्राणां कर्तव्यः । तद्यथा बहुषु हविःषु प्रथमं स
र्वेषां विभस्मीकरणं । ततः सर्वेषां विभस्मीकरणं । ततः सर्वेषां पात्रीस्थाप
नं ततः सर्वेषां तत्रस्थाभिचारः । ततः सर्वेषां यात्रीपूपरनारः । ततः सर्वेषां
प्राणदानं । ततः सर्वेषां कपालंनामजनं । ततः सर्वेषां कपालोद्वासनं । ततः
सर्वेषां वेद्यामासादनं । ततः सर्वेषामालंभः । [illegible] इत्येवं पदार्थानुसमयः कर्त
व्यः । यद्येकैकस्मिन्नगुणकाण्डमपवृज्येत तथा सति समाप्यक्रमेण प्रयोग
वचनादवगतस्य साहित्यस्य बाधः स्यात् । न हि वचनेनाविशेषतः साहि
त्यमवगम्यमानं कात्स्न्यनिकेन प्रधानासत्तिमात्रेणारादुपकारकविषय
मात्रं कल्पयितुं शक्यं तेन तस्मात्पदार्थानुसमयः । नुतः आनुपूर्व्ययोगात्प
दार्थानां तत्संत्राणां वा एवं क्रियमाणे पदार्थ आनुपूर्व्येण अनुक्रमेणायु
ज्यंतेनन्यं त्राम्ना । अन्यप्रयोगान्तरपदार्थकरणानंतरं पूर्वेषु क्रियमाणेषु आनु

पूर्वयोगेन स्यात्। पौर्णमास्यां पौर्णमास्या यजेतेत्यनेन वाक्येन पौर्णमासी
शब्दबोधानां तत्संबन्धानां त्रयाणां यागानां सांगानामेककालप्रयोगो वगम्य
ते। अतो यस्मिन्नेव क्षणे एकस्याधिश्रयणं कर्तव्यमापन्नं तस्मिन्नेवाप
रस्याधिश्रयणं कर्तव्यं सहद्राववाक्येन पाकेवलं नाग्निःयेन। द्वितीयेन तु क्षणेन
कश्चिद्द्वितीयेन पुरोडाशान्तरं नाधिश्रीयेत। अतः प्रथमं पदार्थं सर्वेषां कृत्वा
ततो द्वितीयादिः पदार्थः सर्वेषां कर्तव्यः। एवं बहुषु प्रधानेषु सर्वत्र पदार्था
नुसमय एव न्याय्यो न कांडानुसमय इति स्थितं। यत्र तु प्रधानविरोधो भवति प
दार्थानुसमये क्रियमाणे तत्र कांडानुसमय एवेति वाचनिकेन साहित्येन प
दार्थानुसमयः प्राप्तोपि प्रधानविरोधात्त्यक्तव्यः। पुरोडाशांगेष्वधिश्रयणा
दयः। तेषु मंत्रक्रमः। पदार्थानुसमयस्य तदाश्रपणे च सुन्नसकपालसंयोग
पुरोडाशशोषप्रसंगः। न चांगानुरोधेन प्रधानबाधो युक्तः। तेनातिबहुषु
हविःष्वेकैकस्य पुरोडाशस्याधिश्रयणं प्रथममभिद्रभिमर्शनं वेत्यनेन कां
डानुसमयः कार्यः। यत्र तु नास्ति प्रधानबाधः द्वित्रिचतुरादिहविःषु २ तत्र भव
तु पदार्थानुसमयः दाहसंभवशंकायां तु उद्वासनमपि व्युत्क्रमेणकार्यं। यदुक्तं

पूर्वस्य पदार्थे कृते तस्मिन्नेव द्वितीयस्य क्रियमाणे पूर्वस्यैकावधानमिति त
न्सहत्वविधिबलात्परिह्रियते। एवं च सति यत्र बहूनि वाजपेये आग्नेयैन्द्रा
ग्नसारस्वतीवशाष्टाग्निसप्तदशप्राजापत्येषु द्वाविंशतिसंख्येषु पशुषु एकविं
शत्या पदार्थैः समानासमानजातीयैर्व्यवधानमिष्यते। न न्यूनाधिकैः अन्ये
तु समानजातीयैरेव अनेनैव मुख्यक्रमप्रवृत्तिक्रमानुक्तौ भवतः। तथा
हि। यत्र बहूनि प्रधानानि भवंति तत्र यो मुख्यानां प्रधानां क्रमस्तेनैव क्रमे
णांगानां क्रमो भवति। यथा पौर्णमास्यां प्रथमं आग्नेययागः। ततोग्नी मा
षोमीययागः। [illegible] अत आग्नेयस्य प्रथमं ग्रहणं। ततोग्नीषोमीयस्य
। एवं प्रोक्षणं द्वावपि। अयं मुख्यक्रमः। अनेन क्रमेण यद्यंगान्यनु
ष्ठीयंते तदंगानां नियता प्रधानप्रत्यासत्तिरनुगृहीता भवति। एवं सांगप्र
धानयोर्यावदनुष्ठानमेव न व्यवधानं भवति। इत्यर्थानुपपत्त्याभावितः। प्र
धानस्य प्रथममंगे क्रियमाणे प्रधानेनात्यंतं व्यवहितं स्यात्। अथ प्रवृ
त्तिक्रम उच्यते। यत्र बहूनि हवींषि भवंति समानदेवतानि यथा वाजपेये प
शवः तत्र चोपाकरणप्रोक्षणादयः संनिपातिनः प्रतिपश्वावर्तनीयाः। तेषां चा

पा

हानि नैकस्य पशोः कार्त्स्न्येन न कृत्वा परस्यापि तथैव क्रियन्ते इत्येवं किं न हि स
र्वेषामुपाकरणं यतः नु न स्विष्टस्य पशोरारभ्य कृत्वा ततः सर्वेषां नियोजनमित्य
कं। तत्र प्रथमे पदार्थे उपाकरणे न नियम एव यतः नु न स्विष्टस्य पशोरारभ्य क
र्तव्यः। द्वितीयस्य पदार्थो नियोजनरूपः। किं प्रथमो यत आरब्धस्तत्रैवा ध्य
रंभणीयः। उत तत्राप्यनियम एवेति तत्र क्रमनियमकारणानां अत्यर्थ
पावानाममभावादनियमे प्राप्ते उच्यते। प्रवृत्त्यैव नियमः। प्रथमपदार्थो येन
क्रमेण कृतः स एव क्रम उत्तरेष्वपि नियोजनादिषु नियम्यते। नु नः पदार्थैः
सह प्रधानं कर्तव्यमिति वचनात्सर्वे पदार्थाः प्रधानं कर्तव्यमिति वच
नात्सर्वे पदार्थाः प्रधानकालान्तविप्रकृष्टव्याः। कथं पदार्थैः सह प्रधानस्य
वचनं यावता दर्शपूर्णमासाभ्यां यजेत प्राजापत्ये श्वरं तीत्यादिषु प्रधान
मात्रं श्रूयते। उच्यते। समीहितं भावयेद्यागेनेष्टमिति हि यजेतेत्यस्यार्थः
तत्र यस्यामेव वेलायां स्वर्गो भवने कर्तृत्वं प्रतिपद्यते। तस्मिन्नेव क्षणे करणेतिक
र्तव्यतेऽपि क्वापि येते। अयमर्थः। नात्र प्रधानं कर्तव्यं श्रूयते किं तु प्रधा
नेन स्वर्गः कार्यः इति करणविभक्ति निर्दिष्टात् यागेनेष्टं कार्यमस्मिन्काले ७१

71

कुर्यादिति। तेन स्वकार्यं सेतिकर्तव्यताकेन कर्तुं शक्यते नान्यथा। तस्मात्त्रि
तयस्य फलकरणेतिकर्तव्यत्वस्य युगपद्यजेनेत्यनेन कर्तव्यतोव्यतेति। नतोऽ
न्यथा करणेऽङ्गतिकर्तव्यतात्वमेव न स्यात्। नहि पश्चाद्भाविकरणं भवति त
था भविष्यति भाष्ये वृत्ते च करणेऽप्यसावेव दोषः नहि विनष्टं करणं भवती
ति तथा करणेतिकर्तव्यतयोरविमिथो विप्रकर्षे ऽयमेव दोषः नहि विन
ष्टमनागतं वानुग्राहकं भवति। तेन शब्दवस्तुभ्यामेककालत्वे षां त्रयाणां त
तः प्रधाने सेतिकर्तव्यताके एकस्मिन्क्षणे सह कर्तव्ये प्राप्ते सत्येकः कर्ता बहू
नि प्रधानानि इतिकर्तव्यतां वाऽसमर्थः कर्तुं योगपद्येन भावी क्रियाणामपि
विप्रकर्षः ईदृशेनापि विप्रकर्षेण सहैव पदार्थाः कृता भवन्ति प्रयोगवचनो
हि यावतः पदार्थाननुष्ठापयति तावद्भिर्वर्जनीयतया यावान्कालो व्या
प्यते तावानेकः कालः। तावति च काले सर्वेषां कालो विधीयते। न त्वेकस्मि
न्क्षणे ऽशक्यार्थविधिप्रसंगात्तेन प्रत्यासत्तिरेतेषां साहित्यं नैकक्षणव
र्तित्वं। यद्येवं प्रयोगवचनेनैव क्रमस्यासिद्धत्वात्क्रत्वादिभिः किं क्रियते। अनि
यतक्रमेणानुष्ठानं प्राप्नोतीति क्रमनियमे तेषां व्यापारः। यस्मात्प्रयोगविधि

दे॰ प्रश्नो॰ ७२

क्षं

नैकक्षणवर्तित्वं विघटते किं तु प्रत्यासत्तिमात्रं तस्मात्प्रधानं चिकीर्षितं अ
नागतं भूतं वा तेषां प्रधानार्थानामनुष्ठानपर्यन्तं क्रियमाणेन भूतेन वा प्रधाने
न प्रत्यासत्तिमात्रमङ्गानां तस्मादिह सर्वं नैकक्षणवर्तित्वं । तत्राग्न्यन्वाधानादी
नां क्रियमाणं प्रधानं निमित्तं स्विष्टकृदादीडान्तं तु सर्वं तेनैवमनवश्यं भाविनि वि त
प्रकर्षे केचित्पदार्थाः क्षणव्यवहिताः प्रधानेनापेक्ष्यन्ते केचिद्द्वाभ्यां क्षणाभ्यां
व्यवहिताः केचिद्बहुभिरिति । एवं वाजपेयपशुष्वपि अग्न्यन्वाधानादि प्रागु
पाकरणात्साधारणं सर्वपशूनां सकृत्कृतं । उपाकरणादयोऽपि सन्निपत्योप
कारकास्तन्त्रेण विभवाद्धावर्तेयुस्तव्या अपि साहित्येनैव पशुभिरनुभवित
व्याः । यदैकस्योपाकरणं तदैवेतरेषामपि क्रियतः सह चोदितत्वात्पशूनां सांगा
नां । तत्रैवं सहानुभावितत्वे सति यस्य पशोः प्रथममुपाकरणं क्रियते तेनास्य
प्राकृतेन पाठेन पशुपि द्वितीयः पदार्थो नियोजनरूप उपपत्स्यते । तथा हि
।सहवचनादेव एकविंशति क्षणव्यवहितं द्वितीयं पदार्थमाकांक्षति द्वितीयप
शुः पशुः विंशत्योपाकरणक्षणैर्व्यवहितमेकेन प्रथमस्य पशोर्नियोजनक्ष
णेन च व्यवहितं स्वीयं द्वितीयं पदार्थमाकांक्षति । एवं तृतीयादयोऽपि पशवः ७२

72

विजातीय

सजातीयैर्व्यवहितानामस्मीयान्पदार्थानपेक्षन्ते। अन्त्यस्तु विजातीयैः
पूर्वोपाकृतानाम् एकविंशतेः पशूनां नियोजनक्षणैर्व्यवहितमेव द्विती
यं पदार्थमपेक्षते। तदेवं सन्निपत्योपकारकाणामालोकमदृष्टार्थ एकविंश
तिक्षणव्यवधानापेक्षा प्रधानानां भवन्ति। तत्र स्वयावभिर्नो व्यवहितः
शाकलः पदार्थः क्रतुनावभिर्व्यवधानमगत्याऽवश्यं कर्तव्यं अतोऽभ्यधि
केऽस्तु न व्यवधानव्यं यद्येकं पदार्थमेकस्य कृत्वा द्वितीयोऽपि पदार्थस्तस्यैव क्रि
येत ततः सह वचनं नोपपद्येत। एवं सर्वत्र तृतीयादिष्वपि पदार्थेषु योऽयं प्र
थमपदार्थक्रम एव द्वितीयादिष्वपि समाश्रयितव्यः। इतरथा केषांचनब
हून्यभ्यधिकैरपि क्षणैर्व्यवहितानि स्युः। न च तद्युक्तं। नन्वेवं केषांचिद
ल्पैर्व्यवधानगुणो न विप्यतीति वाच्यं। यथाधिके व्यवधानेऽश्रुतकर
णं। एवं न्यूनैरपि व्यवधाने अश्रुतकरणमेव। तस्माद्द्वाविंशतेः पशूनां साहि
त्यसंपत्त्यै ये प्रयोगविधिना यः क्रमः पदार्थानां मिथ एकविंशतिक्षणव्य
वधानात्मको पेक्षितः स न्यूनैरधिकैश्च व्यवधानैर्बाध्येत। अतः सर्वेषां तु
ल्यप्रत्यास[illegible]त्तिसिद्ध्ये प्रथमपदार्थक्रम एव द्वितीयादिषाश्रय इति सिद्धं।

द.प.श्री
७३

।अथांगानां मिथः क्रमस्यासक्तिर्नियमकारणं मुख्यक्रमे तु अंगानां प्रधानप्रत्या
सत्तिरिति विशेषः।मुख्यक्रमप्रवृत्तिक्रमयोर्विरोधे च मुख्यक्रमो बलीयान्
।तद्यथा।दर्शपूर्णमासयोः सांनाय्यधर्माः शाखाच्छेदनादयः पूर्वं प्रवर्त्त
ते।पश्चादाग्नेयधर्माः।प्रदानं त्वाग्नेयस्य प्रथमं।पश्चात्सांनाय्यस्य।ततः।
स्विष्टकृदवदानं प्रयाजशेषाभिधारणं प्राणदानं वेधामासादनादिकं च विधिं
73
प्रवृत्तिक्रमात्सांनाय्यस्य पूर्वं भवति तु न मुख्यक्रमादाग्नेयस्येति।संदेहाद
नियमे प्राप्ते मुख्यक्रमो बलीयानित्युच्यते।।अस्मिन्हि आम्नायमाणे अग्नी
षोमः।प्रथमपदार्थो।प्रधानाद्धि प्रवृत्यंते।अन्ये सर्वे तन्निवृत्ता भवंति।प्रवृ
त्तिक्रमे तु बहूनां विप्रकर्षः पूर्वं तु मुख्यप्रवृत्तिर्भूयां बलीयसा पाठक्रमेण मुख्य
क्रमो बाध्यते।प्राणदानादिषु तु पाठक्रमाभावात्प्रवृत्तिक्रमो मुख्यक्रमेण
बाध्यते।। अथ स्थानप्रमाणमुच्यते।साद्यस्के सह पशूनालंभनमिति श्रूय
ते।साहित्यं च सवनीयस्य स्थाने।तत्र किं उपाकरणादौ अनियमः अथवा
ग्नीषोमीयस्य प्रथममुपाकरणं।अथवा सवनीयस्येति।तत्र नियमकारणा
भावादनियमे प्राप्ते प्रवृत्तिवद्दाग्नीषोमीयस्य प्राथम्ये प्राप्ते उच्यते।सवनी ७३

पश्वेव प्रथममुपाकरणं। आग्नीषोमप्रणयनानन्तरं ह्यग्नीषोमीयस्य स्थानं
।स ते नोपस्थितो पि सहालम्भवचनेन तस्मात्स्थानाद्बलितत्वात् तदनुष्ठितो ऽनु
ने ते स्पर्धि चिद्दुपास्तु प्रक्रम [illegible] ति। सवनीयस्य तु स्थानादस्य बलिनः। सत्याश्व स्व
न ग्रहणादुपस्थितत्वात् तदानन्तरमुपाक्रियते। न तस्माद्धि स्ववचनादितरोपाका
रणं। अतः सवनीयस्यैव प्राथम्यं। इतरयोस्तु यथाक्रमः। अनियम एव तयो
रुपस्थाने विशेषाभावात्। अथवा मन्त्रानि दृष्टपौर्वापर्यमस्ति बाधेतु गृहीत
व्यमित्यग्नीषोमीयमुपाकृत्यानेबंध्योपाकरणमिति। तदेवं श्रुत्यर्थपठन
स्थानमुख्यप्रवृत्तिसंज्ञानि यप्रमाणानि क्रमनियमकारीणि उक्तानि तेषां परस्प
रविरोधे च पूर्वं पूर्वं बलवत् उत्तरमुत्तरं च दुर्बलमिति। तदुक्तं। श्रुत्यर्थपठनस्था
नमुख्यासत्तिप्रवृत्तिभिः। एकाख्यानगृहीतानां न नियतः कर्मणां क्रमः। विरोधे
परदौर्बल्यमेतेषां पूर्ववदिति। अथेदं विचार्यते। दर्शपूर्णमासयोराग्नेयाग्नीषो
मीयनिर्वापयोः पदार्थानुसमयेष्विति किमेकैकमुष्टिनानुसमयः उत चतुर्भि
मुष्टिभिरिति। तत्र पदार्थैकैको मुष्टिः पदार्थ एव पदार्थः। तत एकैकेनानुसम
यः। अथ चतुर्मुष्टिनिर्वापणे एकः पदार्थस्तत्र चतुर्भिर्मुष्टिभिरिति। एवं कपालोप

धाने किमेकैकेन कपालेनानुसमयः। उताहो मिरेका दशाभिश्चेति। तथा हि
एव युक्ति हिर्दक्षिणामनक्ति त्रिरुत्तरमिति। वपने च दक्षिणोत्तर गोदाने। पाव
ने च त्रिः पावयतीति किं धासे। एकैकमुष्टिनेति कुतः। एकमुष्टिनिर्वापो ह्यु
कापदानं गोदाने। पावने च त्रिः पावयतीति किं धासे। एकैकमुष्टिनेति कुतः
। एकमुष्टिनिर्वापो ह्युकापदार्थः न चतुर्मुष्टिनिर्वापः कथं। एकस्मिन्मुष्टौ
निरूप्ते प्रयत्नः पर्यवसितो भवतीति न त्वाकांक्षं वदितुं किं तत्र निरूप्तमिति न च
निरूप्ते निर्वापो न भूतः स्यात्। न च मुष्टिमात्रेण निरूप्तेन न प्रयोजनं। न ह्येक
स्मिन्न निरूप्ते चत्वारः संभवन्ति मुष्टिसमानाधिकरणे हि चतुः शब्दः। तस्मान्मु
ष्टिनानुसमयः कार्यः। एवं कपालान्युपदधातीति तत्राप्येकैककपाले
नानुसमयः कार्यः। एकैकेनावदानेन साकाङ्क्षमवनीयादौ। अस्मिं जने एकै
कवारं जनेनावपने अनेकयजमानके एकैकगोदानसंस्करणेन। धावनेषाने
कयजमानक एव एकैकवारपावनेनेति। तदुक्तं जैमिनिना। मुष्टिकपालावदा
भ्यंजनवपनपावनेषु चैकैकेनेति। एवं प्राप्ते आह नैककर्मणि संबन्धात्।
एककर्मणि एकस्मिन्निर्वापकपालोपधानादिरूपे कर्मणि पदार्थेन द्रव्यमचे ७४

74

नणैकैकमुष्टिनाणैकैककपालोपधानरूपेणानुसमयो न भवति। किंतु च
तुर्मुष्टिभिः। अष्टभिरेकादशभिश्च कपालैः न त्वेकैको मुष्टिः इत्यत्र पदा
र्थः पंक्तिः किं तर्हि चतुर्मुष्टिनिर्वापणकः पदार्थः। कुतः संबंधात्। चतुःश
ब्द मुष्टीनां च निर्वापसंबंधात्। एवं च सहकर्मणानेकगुणविधानन्यायं
इत्तर यावतुः संख्याया मुष्टिसंबंधे मुष्टीनां च निर्वापसंबंधे सति वैरूप्य
लक्षणो वाक्यभेदः प्रसज्येत। अन्निर्वापांगं च संख्यास्यात्। विरूपं चैवं। च
तुरो मुष्टीन् निर्वपतीत्यत्र निर्वापप्रति मुष्टीनामुपादेयत्वं विधेयत्वं अंगत्वं च
निमित्तिकं। संख्यां प्रति च तेषां उद्देश्यत्वं अनुवाद्यत्वं प्रधानत्वं चेति। अतस्त्व
रस्परविरुद्धं त्रिकद्वयं मुष्टीनामापद्यते तस्मात् संख्याया मुष्टीनां चोभयोर्नि
र्वापेन नैव संबंधः। ये चत्वारस्ते मुष्टयः। ये मुष्टयस्ते चत्वार इति परस्परमवच्छे
द्यावच्छेदकभावो रूपैककहायनीन्यायेन तद्वत्स्य गुणावच्छेदकत्वेन गुणस्य
च द्रव्यावच्छेदकत्वेनार्थाद्भवति। ननु वाक्याभेदेन वाक्यभेदो न भवति। तस्मा
च्चतुर्मुष्टिनिर्वापणकः पदार्थः। अंगपर्यायो हि पदार्थशब्दस्तेन ययोः प्रधा
नयोः सहानुष्ठानं। तयोर्यदंगं तदेकस्य कृत्वा परस्य कर्तव्यं। चतुरो मुष्टीन्निति

दे॰प्रश्नो
७५

र्वपतीति शास्त्रात्त्वर्तुमुष्टिनिर्वापो गौणः स च पदार्थः। न द्रव्यावयवश्चैको मुष्टिः
न पदार्थः। न चावयवेनानुसमयः। किं तु पदार्थेन। एवं कपालोपधानादि
ष्वपि। अष्टाकपालमेकादशकपालं निर्वपतीति निर्देशात्तावन्मात्रासु पधाने
मेकैकः पदार्थः। हिरण्यवद्यति त्रिरभ्यंके दक्षिणोत्तरगोदानवपने त्रिः पा
वयतीति च। एवं च संख्यादीनां क्रियागत्वं च भवति तस्मात्समुदायेनानु
समय इति सिद्धं। एवं सर्वत्र पदार्थानुसमये प्राप्ते क्वचिन्नदयवा दं का
डानुसमयमाह ग्रहणसादनावदानप्रदानेषु तु वचनात् सोमे ग्रहा
णां ग्रहणे एकैकस्य ग्रहस्य ग्रहणं सादनं न कर्तव्यं। अनेकहविष्षे
चावदानं प्रदानं न कर्तव्यं। वचनात्। वचनं च ऐंद्रवायवादीनां सादनांतं
पठित्वा अथातो गृह्णसे वायं वां मित्रावरुणेति अयमांध्यिनं गृह्णुतीसा
दिकं। ब्रूते छंदसि ह्यूदशाहे ग्रहव्यूहे तं गृहीत्वा न सादयतीत्यथ सादनन
प्रतिषेधश्चान्यत्र ग्रहणानंतरं तत्कालमेव सादनं बोधयति। वरुणप्र
घासादिषु चानेकहविष्षेषवदानस्य प्रदानं नानेनासर्वेषु प्रधानयागे
षु पंचयकपंचयवकपतेनु याष्टोऽपि विशेषार्थः। एवं सर्वत्रावदाने प्रदानांते

75

ध्यासे आह नद्रव्याभेदे गुणयोगादितिवा स्यः। वास्य अर पि रित्याह। द्र
व्याणां पुरोडाश चरुसान्नाय्य पश्वादीनां भेदे ऽप्य अर्थभावेनानात्वे बहुत्वे स
त्यपि देवताचेत्समाना भवति यामुद्दिश्यतानि स्युस्तेन तर्हि अवदानं प्र
दानं तंत्रेन भवति। किंतु सर्वाणि क्रमेणावदाय सहैव तेषां प्रदानं कार्यमि
त्यर्थः। कुतः। गुणयोगात्। द्रव्याणां यागं प्रति गुणत्वेन संयोगात्।। अंग
त्वेन संबंधात्। प्रधानं हि यागः। द्रव्याणि चांगभूतानि। तत्र यागस्यैकत्वा
येनसहैव सिद्धत्वात्तदायवदानं प्रदानं तंत्रं किं। यनेतर्हि गुणानुरोधेन प्र
धानाहतिः कृता भवति न चासाविष्यते। तस्मात्तत्रावदानं प्रदानं तंत्रेण न
कर्तव्यं। किंतु सर्वाण्यवदाय सह प्रदेयानि। तद्यथा द्वौ होमे दधिपयसो
र्यागः। सर्वत्राविशिष्टः। चूडायागे चानेकहविष्के सप्तदशसु प्राजापत्येषु च
। अथेदं विचार्यते। किं दर्शपूर्णमासचातुर्मास्यपश्वादिके प्रारब्धे अपरिस
त माप्तेव सति नियतस्य नियतस्य कालस्याग्निहोत्रपितृयज्ञादेः काले आग
ते सति किं तन्मध्य एव न कर्तव्यमिति। यद्यपि चात्र भिन्नप्रयोगयोः प्रारब्ध
कर्माग्निहोत्रयोर्न मिथः क्रमो ऽगांगं तथापि सायंकाले हृयोः संनिपतितयोरव

दे॰प्र
७६

श्यं भाविनि कर्मेऽपराह्णं समाप्य अग्निहोत्रे हूयमाने तस्य स्वकालातिप
त्तिप्रसंगे सति किं युक्तमिति चिंत्यते। तत्र हि पश्वादिकं च स्वकालादतिपन्न
मेवातस्योभयथापि न कश्चिद्विशेषः अग्निहोत्रस्य तु तस्मिन्काले त्रिस
माप्तस्य उद्धरणस्य न लोपः स्यादुत्कर्षेण काले लोपः। तत्र कस्यानुग्रहः
कस्य लोप इति चिंत्यते। तत्रोद्धरणानुग्रहे सांगप्रयोगावधारणान्तरकाल
प्राप्तेः कालस्य जघन्यत्वेन बाधः प्राप्नोति। किं च पूर्वस्य व्यवधानं चस्या
न्न ध्ये क्रियमाणे तस्मात्कालबाध इति प्राप्ते आह प्रवृत्ते ति यतं दोष

76

विशेषात्। प्रवृत्ते प्रारब्धे इष्टि पश्वादिके कर्मणि नियतस्य कालस्यागते
नियतं नियतकालीनमग्निहोत्रमपि त्रयोंकं तन्मध्य एव कर्तव्यं। कालस्यानु दि
पादेयत्वेन निमित्तत्वात्तस्मिन्प्राप्ते समाग्निहोत्रं उद्धरणमनादृत्यापि कर्तव्यं
। नुतः दोषविशेषात्। यतो नित्यस्याकरणे दोषो भवति। तु पूर्वप्रस्य क
र्मणो व्यवधाने पि दोषो स्त्येवास्त्यां। अत्र क्रियमाणे तु विशेषेण। यतो नित्य
कर्मणः प्रधानरूपस्याक्रियेति। क्रियमाणे पुनरंगभूतानां पदार्थानां व्यव
धानमात्रं। ननु कस्य च न लोपः। आत एवोक्तं दोषविशेषादिति। अपि वा सं ७६

वंधेन व्यवधानेपि न दोषः। तस्मान्नियतकालीनं कर्म मध्येपि कर्तव्यं
मथेदं विचार्यते। ज्योतिष्टोमे षोडशिनं प्रकृत्याम्नायते तं पराञ्चमुत्क्रो
म्योपविगृह्णाति। तस्येदमपरं श्रूयते। तं वै पुरास्तमयादुपाकरोत्यस्तमि
तेनुशंसति। सति ज्ञात्वांतरे च समापाध्यं षिते षोडशिनः स्तोत्रमुपाकरोति
। एवं सति यदि दैवादुच्छ्वासो नामुत्कर्षः स्यात्। तदा किं षोडशिनोप्युत्कृष्य
ऊ तेनुच्छ्वेय्युः पूर्वमपि प्रागस्तमयात् षोडशिनउपाकरणं कर्तव्यं।
मथवोत्कृष्टे सति षोडशिनः पकृष्यते उत्कृष्य विगृह्येय्युः परएव न
वर्तते। तत्र पूर्वाधिकरणोक्तन्यायेन नियतकालत्वादनुत्कर्षे प्रसक्ते
। तथा सति स्तोत्रस्य कालोनुगृहीतो भवति। यदि हि षोडशिग्रहस्यागाभ्यां
सउत्कृष्येत। ततः प्रधानकालत्वादंगानां ग्रहं गृहीत्वा मसंचोन्नीयस्तो
त्रमुपाकुर्यादिति वचनानर्थक्यमतः स्तोत्रमपकृष्येत। तत्र पुरास्तमया
दिति विहितः कालोबाध्येत। तन्त्वनुत्कर्षपक्षे प्रपरिभावो बाध्यते
बाध्यतां॥ क्रममात्रं हि तत्कालस्तबलीयानित्यतस्तस्मादनुत्कर्ष इति
प्राप्ते आह षोडशिनेत्वानुपूर्व्यमभयस्थानात्। अनुत्राषः पूर्वाधिकरणसि

२ भ्यासस्यावश्यंभावः उपरिभावोंगस्यानुष्ठीयमाणप्रधानांगसद्भावे तन्न चैतद्युक्तं अ...तोंगभूतस्तोत्रांग २

दे॰ प्र॰ श्री द्वं तः तोदे दे षोडशिनि तु अनुत्कर्षेण भवति। किं तूत्कर्ष एव। कुतः अनुप्र-
७७ पू योगभूयस्त्वात्। अनुत्कर्षस्य क्रमस्य भूयस्त्वात् मूलत्वात् बलवत्त्वादित्यर्थः
।कथं। तत्परा च मुख्ये भ्यइ इति वचनात् षोडशियागोत्स्यैव कालस्य बाध इ भ्या
त्युत्कर्ष एव षोडशिन इति सिद्धं। निःसंदिग्धं च स्तोत्रस्य संनिहितग्रह या
गांगत्वात्। तथा चोक्तं पंचमस्य प्रथमपादांत्याधिकरणे। तत्र स्तोत्रग्रहणक्रमा
77 नुग्रहार्थमुत्कर्षो विधीयते किं तर्हि यागक्रमानुग्रहार्थः। तस्य च स्तोत्रं
प्रतिप्राधान्यमविवादं। अत एतस्य यागाभ्यासस्य काले तांगस्य स्तोत्रका
लो बाध्यते इति युक्त एवोत्कर्ष इति। किं च। अनुत्कर्षे षोडशिनो वैगुण्यं
।उक्थ्यविग्रहणं च। उत्कर्षे हि कस्य षोडशिन इति। अतोपि उत्कर्ष एव
।इदानीमिदं चिंत्यते। अधीते स्वाध्यायविहिते पाठक्रमार्थवत्वाद्यागेषु स
मिद्धादिषु क्रमनियमः। तथा क्रत्वंतरेष्वपि। तद्वाक्यानामपि हि विवक्षित
क्रममेवाध्ययनं स्वाध्यायविधिना विधीयते। तस्य च प्रयोजनांतरं नास्त्यतः
क्रमानुष्ठानात्। तस्मात् क्रत्वंतराणामपीष्टिपशुसर्वसोमयागादीनां पाठ
क्रमेणानुष्ठानमिति पूर्वः पक्षः। सिद्धांतमाह॥ अनियमः फलसंयुक्तेषु फल ७७

युक्तेषु प्रधानकर्मसु इष्टिपशुसोमयागाद्यात्मकेषु अनुष्ठाने अनियमः
क्रमनियमो न भवतीत्यर्थः । तत्र काम्येषु तावत् न क्रमनियमः । अनियमो
ना हि कामा उत्पद्यन्ते तेषां च नास्ति क्रमः । न हि ते वाक्यक्रमेणैयं तु शाक्यते नि ३
वर्त्तुं स्वभावस्य निरंकुशत्वात् । अतो नियतक्रमाः कामाः कर्मणामप्यनि
यमं प्रतिपादयन्तीति तद्बलेन पाठक्रमस्य बाधः । अपि चाक्रतूनामनंगता
देकप्रयोगवचनाभावान्नास्ति क्रमः । यदि च क्रतवः परस्परसांगं भवेयुः
ए यदि वा सर्वतेन्यस्य कस्यचित्स्यमिदाह्रिवदंगं स्युः । यदि वा सत्यप्यंगत्वे आ
ग्नेयादिवदेकप्र[illegible]योगवचनपरिगृहीतास्युः ततः सर्वेषां सहानुष्ठानं बो
धयन्प्रयोगविधिः क्रमनियममपेक्षमाणः पाठं नियामकत्वेन गृ
ह्णीयात् । न त्वेतदस्ति न च पाठः स्वयमेव क्रमस्य विधायकः अविधाय
कत्वात्स्वाध्यायविधिरपि यत्नेन शक्यते कर्तुं तत्क्रमेव नियुंक्ते । पाठक्र ४
मश्च प्रयोगवचनाकांक्षितक्रमनियममात्रशक्तो नि कर्तुं न क्रमे विधातुं
तस्माद्भिन्नप्रयोगवचपरिगृहीतानां न पाठतः क्रमनियम इति सिद्धं
। न हि पाठक्रमः किमर्थस्तत्राह क्रमो विध्यर्थः कर्मण्यसंभवात् । क्रमो

दे॰ प्र
७८

78

द्वि ध्यर्थः कर्तृत्वसंभवात्। क्रमो विध्यर्थः॥ विधानार्थो जपप्राणाय
णाध्यायनादिषु नैव क्रमेण पठनार्थः। नानुष्ठानार्थः। कुतः सर्वस्वा
रास्य रेककर्मणि असंभवात्। पाठक्रमेणानुष्ठानासंभवात्। यतः सर्वस्वा
रो मरणकामस्य विहितः। यदि पाठक्रमेणानुष्ठीयंते तर्हि सर्वस्वारेण
मरणे सिद्धे सति कथं तत ऊर्ध्वं कर्मणि कर्तुं शक्यते। तस्मात् क्रमस्त्वनुष्ठाने
क्रमनियमो न भवतीति सिद्धं। इदानीमिदं विचार्यते। किमवत्तस्याहुत
स्यद्यवदानस्य मात्रस्य नाशे हविरंतरमुत्पाद्यते॥ उत तस्मादेव हविःशे
षात्पुनरवदेयमिति। तत्र नैणेव प्रथमं सिद्धांतमाह ५ अवत्तनाशेन्य
द्धुणानुग्रहात्। अवत्तस्य पुरोडाशचर्वादेः सकाशात्स्य यद्धृतं तस्यावदान
य
यमात्रस्य
द्रव्यनाशे अन्यद्धविरुत्पादनीयं यागार्थं। कुतः गुणानुग्रहात्। एवं चेत्तेमध्य
पूर्वार्द्धावदानरूपेण गुणेनांगेन साधनद्रव्येण यागोनुगृहीतो भवति
। यदि पूर्वहविःशेषादेव पुनरवदाय यागः क्रियते तदा तस्य मध्यपूर्वा
र्द्धविकलत्वाद्धि गुण एव यागो न भवेत्। कथं ह्यवदानस्यैव यागार्थत्वपक्षे त
स्य विनष्टत्वादवशिष्टस्य यागार्थत्वात्। समस्तपुरोडाशस्य यागार्थत्वे ७८

पि हृद्यावदाननाशेन न तस्य विकलत्वात् । न चासौ यागो विगुण इष्यते । तन
स्माद्धृद्विरंतरमेवोत्पाद्यं न हृद्यावदाननाश इति प्राप्ते आह न पूर्वशे
षात् । मद्धृतमवदाननाशेन्यद्धृत्वा हवनीयमिति नन्वोन्ता । किं तु पूर्वशेषादे
पूर्वस्यैवावशिष्टस्य हविषः शेषात्तु न पुनरवदेयं । कुतः । विनष्टेपि हृद्यावदा
ने पुनर्मध्यमपूर्वार्द्धसंभवात् तावन्मात्रस्य च शास्त्रार्थत्वात् । पुरो
डाशस्य योर्मध्यपूर्वार्द्धावयवौ न द्व्यावदानकं न द्व्यवयवभूतमवदानमाग
साध्यं न नष्टेन च मध्यपूर्वार्द्धावयवविनिर्वृत्तसकलस्य पुरोडाशयोर्मध्याव
यवः पूर्वार्द्धावयवश्चावदानापादानभूतः । स एवावदानापेक्षया तु यववा । त
स्मिन्नवदानोद्धरणेन विनष्टेपि मध्यं तरस्य पूर्वार्द्धान्तरस्य चावदानहृ
योपलक्षणत्वेन विद्यमानत्वात् तत एव पुनरवदेयं । ननु तत्कस्य मध्यपूर्वा
ल र्द्धं चावदेयं न विकल्पस्येति चेन्न । तन्न तु नो शास्त्रार्थत्वात् मध्यादवयवनाशे नावदे
यमश्रूयते । ननु सकलस्यासकलस्य पुरोडाशस्य मध्यादिति तस्मात्पूर्वशेषा
देवावदेयं । अचोदितत्वात् । किंच । अवतद्यावदानमात्रनाशे अन्यद्धृवि
ष्ट्या हवनीयमित्येवमचोदितत्वात् कुत्रापि विहितत्वात्पूर्व[illegible] शेषादेवावदेयं

स्विष्टकृत्तु दानुपूर्व्ययोगात्। अपि च शेषादवदीयमानेनद्धविः स्विष्टकृद्भ-
वति। स्विष्टकृद्दस्यारातीति स्विष्टकृद्भूत। अन्यस्मिन् हविष्युत्पादितेन तु
द्रव्यं पूर्वं हविः स्विष्टकृद्भूतमभवतीन हि तद्दानतः स्विष्टकृदर्थमप्यवदानं गृ-
ह्यते। किं तु न ततो त्पादितादेव कुतः आनुपूर्व्ययोगात्। यतः स्विष्टकृदवदा-

नस्यानुपूर्व्ययोगात्क्रमयोगोस्ति। प्रधानावदानानंतरं हि ततः स्विष्टकृदर्थम-
वदानं भवति। यदि च प्रधानावदानमेव पूर्वस्मान्नगृह्यते स्विष्टकृदर्थमपि
ततो न गृह्यते। ततः पूर्वस्य हविष उत्पत्तिर्व्यर्थैव स्यात्। शेषात्तु प्रधानार्थे
वदीयमाने स्विष्टकृदर्थमपि कृतो वदीयते। एवं तिपूर्वं हविः स्विष्टकृद्भ-
वतीति पूर्वपक्षे गुणः। अयोक्तमेव सिद्धांते दृष्टार्थतिगुणहानो तु शेषभा-
वात्। तु शब्दः पक्षव्यावृत्तौ। गुणहानावितिगुणस्य यागं प्रति गुणभूतस्य
यागसाधनभूतस्य द्व्यवदानस्य हानिर्गुणहानिः। तस्य हानो सत्यां नाशेति सं-
हे विषोमध्यापूर्वं भागस्य यागं प्रति गुणभूतस्य यागसाधनभूतं पूर्वं शे-
षादवदेयं। तु तः शेषभावात्। शेषत्वादेव तस्यावशिष्टस्य। शेषकार्यार्थ-
त्वादित्यर्थः। कृत्स्नस्य पुरोडाशस्य यो मध्यदेशस्तदुपादानको यतस्तस्योप ७८

रितरत्नो गुणपर्वमात्रो व्ययपव्यः सोवदातव्यः। अन्यस्त्ववद्देवस्यापादान
भूतः। नत्वसाववदातव्यः। सत्विडादिशेषकार्यार्थो न प्रधानकार्यार्थः
। अतो नासो हविः। यत्तु हविसत्त्विनष्टान्तर्हि नाशे चरुहविरन्तरमेवोत्पाद्यं
तदोषद्यावदानस्यैव यागार्थत्वात् तत्र तर्हि नाशे शेषस्य कार्यार्थत्वाभावा
त द्रव्यान्तरं यागार्थमुत्पाद्यं। यदापि समस्त पुरोडाशस्याध्यायागस्तदा
पि द्व्यवदाननाशे तस्य विकल्पत्वात् विकल्पं हविरन्तरमुत्पाद्यं तस्मात्सा
धूक्तमवत्तनाशेऽन्यवितिन्दुक्तं। संस्काराणां पुरोडाशे द्व्यवदानं प्रयोजकं
नहि नाशाखनस्वास्तेनावद्देयम तत्रत्तनः। गृहीतो मध्यपूर्वार्धेतो चेन्नष्टा
वुभावपि। अतः शेषस्य शेषत्वात्प्रधानत्वं न युज्यत इति। अथेदं विंत्य
ते इदं दाग्निसोमादिदेवतानामाहवनीयादीनामग्नीनां मन्त्राणामिषेत्वेत्या
दीनां क्रियाणामदृष्टार्थानां प्रयाजप्रोक्षणादीनां अस्मरणादिना अपचा
रे किं देवतान्तरमग्न्यन्तरं शास्त्रान्तरं क्रियान्तरं च प्रतिनिधेयमुत नेति पूर्वेण
येन प्रतिनिधेयमिति आह नदेवताग्निशब्दक्रियाः परार्थत्वात् दे
वता अग्न्यादिका। अग्नय आहवनीयादयः। शब्दामन्त्राः। क्रियाप्रोक्षणप्रयाजा

दे॰ प्र॰ श्री ८०

दिका अदृष्टार्थः। दृष्टार्थेषु त्ववघातादिषु सत्येव प्रतिनिधिः। न खलु नि-
५ तादिभिरर्पितत्वात्कार्यसिद्धेः। तदेतेषां देवतादीनां स्मरणादिनापचारे
प्रतिनिधिर्न भवति पुनः परार्थत्वात्। अदृष्टार्थत्वाद्धि त्वर्थः। प्रतिनिय
तानि ह्युपात्तदृष्टानि। तथा हि यत्र प्रतिनिधीयमानं मुख्यस्य कार्यं साधय
ति तत्र प्रतिनिधिः। न त्विह तथा संभवति। देवता तावद्विधिलक्षणा। न त्वन्या
श्रानीयमाना देवता भवति। न चादेवतायै संकल्प्यमाने यागो भवति अतो
न देवताकार्यमन्यतः संभवति। अतो ग्न्यादिके विधिशब्दे विस्मृते तदर्थवा दे
चकं ज्ञात्वा शब्दांतरमर्थांतरवाचकं वा न प्रतिनिधातव्यं। एवं च [illegible]गस्याभावाद्याग
स्यापि लोपः। न हि त्यागमात्रं यागः। किं तु देवतोद्देशेन त्यागः। तेनासत्यां देव
तायां प्रधानस्यैव तस्यैव यज्ञस्यार्थस्यासंभवाल्लोपः। किं च सदृशं प्रतिनिधात
व्यं। देवतायाश्चाभावश्च शब्दनाशे। शब्दद्वारेण च देवतात्वं। अतो मुख्यदेव
ताशब्दं स्मृत्वोत्तरकालं तत्सदृशशब्दांतरस्यस्यादुपादानं। न ह्यस्मृते मुख्येन
सदृशो बुद्ध्यावारोपयितुं शक्यः। न चास्मृतस्य मुख्यस्य परित्यागो युक्तः
। तस्माद्देवतायां न प्रतिनिधिरिति। तथाग्निरथाहवनीयादिरदृष्टार्थो ८०

गर

विनाप्याधारणाप्रक्षेपसंभवात् न चाहवनीयप्रक्षेपे कृते यददृष्टं तद
न्येन सिध्यतीति प्रमाणमस्ति। तस्मादग्नीनां न प्रतिनिधिः। नीवारादि
नां तु पुरोडाशनिष्पत्तिः प्रत्यक्षत एव दृश्यते। मंत्रस्य तु यद्यपि पदार्थ
प्रकाशनार्थत्वादृष्टार्थः। तथापि तस्य स्थानादिनापि सिद्धेर्न मंत्रांतरं
प्रतिनिधेयं। अन्यत्रार्थेन स्मृतेन प्रयोजनमस्ति। न मुख्येन मंत्रेण नापि
तत्सदृशेन शब्दांतरेण। अवश्यं हि मंत्रार्थप्रतिपादकं शब्दांतरं प्रतिनि
दधता येन केनचिदुपायेनार्थः प्रथमं स्मर्तव्यः। तदभावे तत्प्रतिपादक
शब्दांतरोपादानासंभवात्। तत्र प्रसिद्धे स्मरणे न प्रतिनिधिनाकार्यं स्म
रणार्थमेव हि प्रतिनिधीयते नान्यार्थमिति। यदि तु सिद्धेऽपि स्मरणे शब्द
साधनकस्मरणसिध्यर्थं शब्दांतरमुपादेयमित्युच्यते तत्र आह। नच
शब्देन स्मरणं कर्तव्यमिति वचनमस्ति। किं तर्हि मंत्रविशेषाम्नानसामर्थ्या
द् प्रदृष्टाद्युपायनिवृत्तिः। असति च मंत्रे उपदृष्टादिके न बाध्यते। अतो ना
स्ति शब्दांतरं प्रतिनिधिः। येषु मंत्रनियमकृतं दृष्टं न तदन्येन सिध्यतीत्यप्र य
प्रतिनिधिमाहुः तेषां मीमांसाद्युपचारेऽपि तत्कृतनियमादृष्टस्यान्यथाऽ

दे॰ प्रश्नो ८१

सिद्धे द्रव्यांतरं प्रतिनिधिर्न हि हेतोत्। क्रियाया अपि प्रतिनिधिर्न भवति। य
अयाज्ञादिभिरदृष्टं क्रियते। तदन्या क्रियाकारणमानिनास्ति प्रमाणं। दृ
ष्टादीनां तु दृष्टार्थत्वात् द्रव्यवदृष्टत्वेव प्रतिनिधिः। क्रियाग्रहणं त्वदृष्टार्थ
क्रियाभिप्रायमिति ॥ कामं देवतां योग्निश इष्टक्रियाः प्रतिनियते सकामं
स्वेच्छया देवतामपि प्रतिनिदध्यात्। अकामानुमनो काममित्यमरः। अग्नि
श इष्टक्रियाणामप्रतिनिधेयत्वस्य दृष्टांकरणार्थमिदं सत्रं। पत्नीदेवतायाः
प्रतिनिधिः सर्वथा न संभवति। न हि टेदेह विष्णुर्निदैवतां भवति। न हि
जात्याकाश्विदैवता निवेदिके कर्मणि। यायत्र विधीयते सा तत्र देवता। ने
नान्यत्रान्या देवतेपन भवति। अविहितत्वात् प्रतिषिद्धं प्रत्यवायात् नाने
स्त्वनुवर्तते। यदृच्छं कोद्रवमाषवरटादि प्रतिषिद्धं न तत् प्रतिनिधेयं। कुतः
प्रत्यवायात्। यतः प्रतिषेधातिक्रमे प्रत्यवायो भवति। तथाहि अयज्ञिया
वै कोद्रवा अयज्ञिया वरटकाः अय[illegible]याश्च माषा इति प्रतिषि[illegible] यज्ञसाधन द्रु
भावाभावादयः। मौद्गैश्चरो मुद्गानामभावे माषाद्दृश्यान्माषाः। मा भुवन्निति इत्या
माकचरी चकोद्रववरटकाद्याः इति। अत्र माषा धान्य प्रतिनिधित्वेन गात्रधा ८१

त्रि

नवेति संदेहः। तत्र यज्ञांगत्वं माषादीनां प्रतिषिध्यते प्रतिनिधित्वेन तु न माष
स्य यज्ञांगत्वं। किं तु न ह्नतस्य मुख्यांशस्य। अतः प्रतिनिधितया माषादय
इति चेन्न। मैवं। अयज्ञिया इत्यनेन यज्ञार्हतामात्रं प्रतिषिध्यते। प्रतिनिधि
त्वे चावर्जनीयं साधनत्वं। अतो न माषादीनां प्रतिनिधित्वं। तदुक्तं व्रीहिय
वौ वा श्यामाकनीवारौ वा हविर्भवेत्। वेणुयवा मसूरं वा श्यामाकं मूलं फलं ज
लं सस्यं वा हविरेतेषु। यथासंभवमाचरेत्। प्रतिनिध्यंतरस्व-सत्त्वविज्ञेयं
हविरत्यये। प्रधानदेवतोद्देशात्संप्रजे त्सत्यमात्मनः। अतोन्यदपि वा
ग्नात्यं सदृशं धान्यमात्रकं। नग्नात्यं सर्वं यायावरकोद्दारकोद्रवं। यद्वा
व्रीहियवाभावे नुपतं हृल्ल्योगिनीः। उं ष धीः प्रतिग हाया दणुकोद्रवव
र्जितः। ग्राम्याणां वाभवे न्नाम्यमारण्यानामरण्यजं। यवाभावे नु गोधूमा
स्ततो वेणुयवादय इति। अथ यद्विचार्यते। प्रोषिते कार्यांतरे व्याहृते मृते
वा यजमाने तत्स्थाने किं याजमानपदार्थकरणाय पुरुषांतरं प्रतिनिधे
यमुतनेति। न तत्रौ ह्या घ पचारद्रव प्रतिनिधौ प्राप्ते आह स्वामी फलयो
गात्। नेसत्तु वर्जने। स्वामी यजमानो न प्रतिनिधेयः मृते तावत्कः पुरुषांतरं

दे·प्रश्नी
८२

प्रतिनिदध्यान् कोवाध्वर्य्वादीन् प्रवर्तयेत्। स्वयं प्रवर्तमानेषु चैतेषु न
मतस्याकर्तुः फलं सिद्ध्यति। यद्यपि हि तु प्रतिनिहितो द। क्षिणादानं ह्यस्या
गं च करोति तदानस्य सम्यक्फलं संबन्धात् मुख्य एव स्वामी स्यात् न प्रतिनिधिः
। पत्नीत्वस्वतंत्रा अत्र नाग्निश्च मतेपत्नी पुरुषांतरं प्रतिनिधाय प्रयोक्ष्यती
त्यनाशंकनीयमेवाप्रोषिते अन्यत्र व्याहृतेवा यजमाने सतावत्क्रत्वर्था
आऽध्याधेऽस्यगाद यःतेषु यथासमाम्नम ध्वर्यादय एव कर्तारो विद्यंत
इति न प्रतिनिधिनाकार्यं। पुरुषसंस्काराणां च ऋत्विग्वरणादीनां क्रत्वर्थ
त्वात् विनापि यजमानेन नास्ति वैगुण्यं। पत्न्या अपि तदनुष्ठानसंभवात्
। यानि च ब्रह्मचर्यादीनि फलं प्रतियोग्यतायाः कारणानि तानि बहिरवस्थि
तेनापि यजमानेनानुष्ठियमाणानि कर्तोरुपकारकाण्येव तस्माद्देहबं
ध्याऽऽधाने क्षणादावध्वर्यादेर्विद्यमानत्वादितरत्र ब्रह्मचर्यादावसंभ
वात्प्रतिनिधेरनुपपन्नो यजमानस्य प्रतिनिधिः तुनः फलयोगात् न
हि पुरुषांतरेणानुष्ठियमाणानि ब्रह्मचर्यादीनि यजमानस्य फलयोग्यतां
संपादयंतीत्यसंभवः प्रतिनिधेः ॥ तस्मात्प्रवासादिना प्रचरिते स्वामिनि ८२

82

तत्स्थाने स्वाम्यंतरं प्रतिनिधेयमिति। अनुपपत्त्यां मन्तायां किमस्ति प्रतिनि
धिकृतमेति नायमस्याधिकरणस्य विषयः। तत्रापि हि यदा तावत्स्वा
मीये पूर्वमारिप्सेपदत्वाग्न्याधानं स्वकर्मणा। त्ययं पक्षः। समाश्रीयते न दाम्प
भावादेवानधिकारः सिद्धः यदा तु नाययः पत्नीदत्तास्तदायाचारप्रामा
ण्यात्सपत्नीकस्य दर्शपूर्णमासाद्यनुष्ठानं। अग्निहोत्रमात्रं तु वचना
दनुष्ठीयते। तदाप्यपत्नीकोप्यग्निमाहरेदिति वचनोन्नास्ति पत्न्याः प्रति
निधिरिति। नन्वरत्ने गुणेषु प्रतिनिधिः परार्थत्वात्। गुणेषु कृत्वर्थेषु गु
णपदार्थेषु पात्रासादनाग्न्याधानवेदवंधनादिषु स्वामिनोपि प्रति
निधिर्भवति यथासमाख्येमध्वर्युरेव तत्करणीत्यर्थः। उक्तः पदार्थ
त्वात्। पात्रासादनादीनां कृत्वर्थत्वात् कृत्वर्थाग्निहोत्रमादीनि तन्वयनादि
वद्यजमानसंस्कारार्थानि। अतः परार्थत्वादेवमादिषु कृत्वर्थेषु स्वामिनो
पि प्रतिनिधिर्भवति अथेदं विचार्यते। सप्तदश सावराण्यतुर्विंशति परमाः स
त्त्रमासीरन्निति। तत्र सप्तदशाप्रभृतिषु सत्त्रगणयागाद्यर्थं प्रवृत्तेषु यदा
कश्चिन्मृयेत तदा तत्स्थाने अन्यः प्रतिनिधेय उत नेति। तत्र पूर्वाधिकारण

न्वी

द्वे·प्रप्रा ८३ न्यायेन स्वामिनः प्रतिनिधिर्न भवतीति प्राप्ते आह सत्रे त्वनुस्यातेः शु
शब्दः पूर्वाधिकरणसिद्धांतमदे हमाह। सत्रे तु स्वाम्यपि प्रतिनिधीयते
। यजमानस्यापि प्रतिनिधिर्भवति। कुतः स्यातेः। अर्थे यदि संदीक्षितानां
प्रमीयेत तस्य योनेदिष्टीस्यात्तमुपदीक्ष्यं तेनेन सहयजेरन्निति श्रवणात्
। कात्यपमपियन्मारब्धं तदवनं पूर्वसमापनीयमित्युक्तं। आवश्यक
त्वाचायथाशक्तिप्रयोक्तव्यं। अतो यद्यपि ये यजमानास्ते ऋत्विज इति य
जमानशब्दस्य स्वामिमात्रकर्तृवचनत्वात्। एकशब्दोपात्तयोश्च स्वामिकर्तृ
त्वयोरार्त्विज्योद्देशेन विधिसंभवात् स्वामिभिरेवार्त्विज्यं कर्तव्यं स्वामिगतं
हि सप्तदशादिसंख्यो नत्रांगतया विनाचैवे गुण्यं। अतस्तत्संपादनाय
पुरुषान्तरं प्रतिनिधेयं। ननु स्वामिगतासप्तदशादिसंख्या नवानीता स्वा
मीकथं यो स्यारब्धसमापयति तस्य सकलकर्तुः फलं भवति सचस्वा
मी स्यादते। अयं पुनर्मध्ये प्रविष्ट एकदेशकर्तानफलं प्राप्तुमर्हतीति नचा
सौ विधिवशात्स्यादृतो येन विधिवशात्प्रामाण्यात्फलं लभेतान हि यः प्रति
निधीयते तस्य कर्तव्यता मा कर्मविहितं यदस्मि न्फलेन मयु ज्येत। इतरे हि ८३

८३

हस्वामिभिः प्रारब्धमवश्यं समापनीयमित्याचार्येणानुमितं न विधिवशेना
सोमादिभिः संख्यासंपत्त्यर्थमृत्विक्स्थानीनस्तस्मात्तस्य स्वामित्वं। तेना
शावप्येवस्वामिगतासमदृशासंख्योपपादयितुमिति। उच्यते। स्वामिगतात
स्थानीनस्य न भविष्यति। नहि साद्गुण्यकाङ्क्षा। नु। इदं तु वक्तुं शक्यं। ये संस्थि
तां पदार्थास्तत्र इह समदृशावरैः कर्तव्याः इति। एतावत्त्वोपपादितं भवति
अन्तो यद्यथानीयमानः स्वामिगतां संख्यां न पूरयति। तथापि तु यो ऽनि
यते तस्य यः पदार्थः कर्तव्यस्तस्मिन् कर्तृत्वं बाध्यत इति प्रतिपत्तुं। न हि स्वा
मिसमदृश्यं न भवतीत्येतावता सं भवेदपि कर्तृशेषसमदृश्यं हानकं भवति
अतस्वामित्वमात्रस्य त्याककर्तृशेषसावर्ण्यं संपादयितुं सत्रेमनस्यदीक्षि
तस्य स्थाने पुरुषान्तरं प्रतिनिधेयं मनस्य च फलं श्रूयते। योदीक्षितानां प्रमी
येतापि तस्य फलमिति। तदुक्तं जैमिनिना। तस्मिंश्च फलदर्शनादिति त
स्मिन्मृते ऽपि तस्य फलमिति मनस्य फलं दर्शयन् प्रतिनिहितेनास्ति फ
लमिति दर्शयति न चेदं फलपरं। किं तर्हि फलसरूपो ऽयमर्थवादः पर्णमय्या
धिकरणन्यायात्। अयमभिप्रायः मनस्य फलपरं। सत्रमासीरन्निति तु वि

द्वे॰ प्रश्नो
८५

धितः प्रह तस्यापि किमिति फलं न भवतीति चेत्। न सत्यपि फले मृतस्य
स प्राप्त्यभावात्। अपि शब्दस्यायमर्थः। तुष्टिकामाः सत्रमासीरन्निति तु
विधिप्रमितं फलं। तत्तावदेकस्मिन्मृते सर्वेषां विपन्नमेव। स्वामिसंख्या
हान्या विगुणत्वात्सम्यक्फलानुत्पत्तेः। प्रारब्धं समापयेदिति तु विध्यंतर
प्रमितफले छयावशिष्टाः सत्रिणः प्रवर्तंते। न च मृतस्य तत्र प्रसंगोऽस्ती
ति। अथ सत्रविधितः प्रतीतमेव फलं विगुणादपि निष्पद्यते तथापि न
२ मृतस्य फलप्राप्तिः सकलानुष्ठाने नहि प्रारंभमात्रात्फलं भवति इतर
स्य च प्रतिनिहितस्य न केवलं सकलाननुष्ठानात्। अकर्मकरत्वादपि विधि
वशेन परप्रेरितस्यर्त्विग्वर्तमानत्वादपि नास्ति फलसंबंधः। इति तंत्र
रत्ने। अन्ये तु वचनात्मृतस्य लेपमेतदित्याहुः। नहि न्यायो वचनं बाधितु
मिष्टे। नास्ति च वचनस्य किंचिद्दुष्करमिति। अथेदानीं सत्रे यो यं प्रति
निहितस्तस्य फलयोग्यताहेतवो वपनाभ्यंजनाञ्जनादयो यजमानध
र्मा न भवंति। उत भवंतीति। तत्र स्वामिधर्माणां फलप्रतिग्रहणयोग्यत्वा
पादकत्वात्। प्रतिनिधेश्च फलं प्रतिग्रहाभावात्स्वामिधर्मा न भवंतीति प्रा ८५

84

सेत्याह सत्तं धर्मा कर्मयोगात्। स सत्त्रे प्रतिनिहितो नैदिक्षित धर्मा स्वामि-
धर्मा भवन्ति। स्वामिनो धर्माः संस्कारावपनादयस्तस्य भवन्तीत्यर्थः। कु-
तः कर्मयोगात्। स्वामिकर्मणो हि स्वागादिना सम्बुध्यते। अतस्तत्संस्कारसं-
स्कृतेनैव तत्कर्मानुष्ठानं युक्तं यद्यप्यस्य फलाभावात् फलिनः संस्कारान्
प्राप्नुवन्ति। तथाप्यस्मिन् संस्कृते सत्स्वन्येषां यत्सादृश्यं तत्संस्कृतेषु स-
सदृशसुस्थितं भवति। ततः स सदृशावर्णाः सत्त्रमासीरन्नित्येतत् [illegible]स्त्रमनुग्र क्षुा
हीतं भवति। अन्यथा संस्कृताः षोडशैवेति शास्त्रं बाध्येत। यदि बहूनां य-
जमानानामलाभाद्बराऽऽत्मसंख्या यजमानास्स्युस्तदापि ससदृशापेक्षि-
ताः। ननु ततोप्यात्मसंख्या इत्यर्थः। अत इतरेषां फलप्राप्तेर्यथोपक्रान्तक-
र्मानुष्ठानुसाध्यत्वात्सदृशाः कर्तृकस्यप्रसञ्चयोदे स्वकार्यसाधनत्वा-
त्तस्मिन्नर्थे प्रतिनिहितोपि प्रसञ्चयवपनादि स्वामिधर्मान्न कुर्यात्। इत-
रथा कर्तृसंख्यालोपादितरेषां प्रसञ्चयोदेः स्वकार्येन सिद्ध्येत्। तस्मा-
त्स्वामिधर्मा न दिष्टा। इति सिद्धं। अथेदं विचार्यते। सत्त्रेषु किं त्रयाणां व-
र्णानामधिकारः उत ब्राह्मणानामेवेति। तत्र ह्यर्थं च किं ये यजमानास्ते ऋत्विज इ

त्यनेन आर्त्विज्यं यजमानसंस्कारत्वेन विधीयते ऽतो यजमानानामा
र्त्विज्यांगत्वेन नत्वत्र ऋत्विक्कामादिवाक्येषु विशेषाश्रवणात् ऋत्विग्वरणे
षु प्राप्तेषु यत्कुद्देनतानुद्दिश्यते यासंस्कारार्थं आर्त्विज्यं उच्यते। ये यजमा
नाः ऋत्विज इति अत्र यजमानऋत्विक्शब्दयोः पृथगर्थत्वेन सिद्धयेः सा
मानाधिकरण्यानुपपत्त्यैकेन लक्षणार्थेन भा। विनव्यांजनत्वमुख्यत्वाद्यज
य मानशब्दः अमितिव्रतः जयं सत्वादृत्विक्शब्दो लक्षणार्थः। यो हि परार्थमतो
यजेत्स्वध्वर्यादयस्तद्वाचकमृत्विक्पदमस्मिन् वाक्ये। तस्य च स्वामित्व
नेन यजमानपदेन मुख्यसामानाधिकरण्यासंभवात् कार्यलक्षणा भ
वति। ये परिक्रीतत्वकर्तृत्वेन प्रवृत्तितः प्रासाप हार्थास्ते तु यजमानाः कर्तारः
स्फ रिति। नचैवम् ऋत्विक्कर्तृकत्वं शंकनीयं। यजमानमेव कर्तृणां मुख्य
र्त्विक्त्वोपपत्तेः। नहि वरणभरणाऽन्यमदृष्टमृत्विक्त्वं। आनमनार्थत्वाद्व
रणभरणयोः। अदृष्टार्थत्वेतु सन्यन्तु याज्यावरणवतः सत्रेपि वरणभ
रणे कर्तव्ये स्यातां। तस्मान्न वरणभरणे निमित्तमृत्विक्त्वे किंतु ऋतुयजन
निमित्तं। अतः सत्रेपि संत्यृत्विजस्त्वाहि शोपाध्वाध्वर्य्वादयाः सत्त्येत। तेतुय ८५

85

जमानात एवनान्वोवच नेनहि परकर्तृकत्वेन प्राप्तानां पदार्थानां यज
मानकर्तृकत्वमनेन विधीयते। यच्छब्दतच्छब्दोपयाश्च तमुद्देशप्रति
निर्देशकौ इति स्थिते तेको वाक्यार्थ इति। चिंत्यते। तत्र सर्ववर्णानां यजमा
नामुद्दिष्टप्रतिनिर्दिष्टानां। आर्त्विज्यं संस्कारत्वेन विधीयते प्रधानं त्वध्द्दे
श्यं भवति। यच्छब्दायुक्तात्र्य यजमानानुद्देश्या इति तेषामेव प्राधान्यं। तेन
यथा ब्राह्मणानां यजमानानामेव सतां वचनमामाएया दार्त्विज्यं एवमिन
रयोः। प्रधानभूते रेव यजमानेः क्रियमाणमार्त्विज्यं न गुणभूतत्वाद्वर्तनपे
क्षते गुणो कर्तृपरिच्छेदेन प्राप्तमप्रेमार्त्विज्यांगं। तदभावेन दपि ह्याराभावा
न्न सत्रे प्राप्नोति। तस्मात्त्रयाणामधिकार इति पूर्वपक्षः। सिद्धांतमाह स
त्राणि ब्राह्मणानां ऋत्विक्‌प्रते: सत्राणि द्वादशाहादीनि ब्राह्मणानामेव
भवंति। न क्षत्रियवैश्ययोः। कुतः। इत्विक्‌प्रते यजमानानां ऋत्विक्
त्व इति श्रवणात्। यद्यप्यत्र सर्वेव र्णा उद्दिष्टप्रतिनिर्दिष्टाः। विशेषाश्र
वणात्। तथाप्यत्रार्त्विज्यं यजमानानां संस्कारत्वेन विधीयते। तथा सत्या
र्त्विज्यस्याप्राप्तत्वात्कार्यप्रसंगात्। तेन यच्छब्दयोगेप्यत्र न यजमानानुदि

दे. प्रश्री
८६
86

श्यते। किं तु ऋत्विक्पदेन तत्कर्तृकान्पदार्थानुद्दिश्य यजमानाः कर्तृत्वेन वि
धीयन्ते। प्रत्याम्नानाच्च ऋत्विजो निवर्तन्ते। आर्त्विज्यं ह्यत्र प्रधानं। तस्य चात्
द्वौ धर्मौ अंगत्वेन प्रवृत्तितः। प्राप्तो अन्यकर्तृकतात्मैककर्तृकता च। त
त्रान्यकर्तृकता ये यजमानास्ते ऋत्विजः इत्यनेन बाधिता। आत्मैककर्तृक
तायास्तु न किं चिद्बाधकमिति। अत्र द्विकामादिशब्दानां आत्मैकविरोधात्।
तस्मात्प्रवृत्तितः प्राप्तं आत्मैककर्तृकत्वं वाचनिकं च यजमानकर्तृकत्वमु
भयं संपादयितुं आत्मैकानामेव सत्राणि भवन्ति सिद्धं। अथ यदम परं विंस्यते
। प्रयाजे पुरुषभेदेनानुष्ठाने विशेषोऽस्ति। राजन्यवसिष्ठादीनां नराशंसो द्विती
यः प्रयाजस्तनूनपादन्येषां। तत्र वसिष्ठात्रिवध्र्यश्वशुनककण्वकश्यपसंकृ
तिगोत्रोत्पन्नानां स्ववर्गं तो वा नराशंसप्रयाजवन्तः। इतरेस्तनूनपात्प्रया
जवन्तः। एते भिन्नकल्पा अपि मिलित्वा ससदृशा वराः संहत्य सत्रेऽधिकारि
णो भवन्ति। उत समानकल्पा एवेति। तदर्थमिदं विचार्यते। किं वसिष्ठादयो
नाराशंसाद्यंगत्वेन कर्त्तारो विधीयन्ते। उत वसिष्ठादीनुद्दिश्य नाराशंसादि
नादर्थेन विधीयन्त इति। तत्र वसिष्ठाद्यर्थत्वेन विधाने फलकल्पनात्प्रकरण ८६

बाधाद्वसिष्ठादय एव नाराशंसांगत्वेन विधीयंते। षष्ठी च संबंधवाचिनी
। सत्रेषु च सत्रिणां प्रत्येकार्षेयवक्तृत्वमिति स्थितं। अतस्तत्र वसिष्ठा वशि
ष्ठैः क्रियमाणो नाराशंसो वसिष्ठेनापि नावक्रियत एवैतस्य विगुणस्तथा न
नूनपाद्यन्यैः। अतो यं कंचित्कल्पमाश्रित्य भिन्नकल्पा अप्यधिक्रियेर
न्निसेवं प्राप्ते आह एककल्पानामवैगुण्यात्। एकः समानस्तुल्यः कल्पः
पक्षो येषां ते एककल्पाः तेषामेव सत्राणि भवंति। न भिन्नकल्पानां। कुतः
अवैगुण्यात्। यदि सर्वेपि नराशंसप्रयाजवंतः अथवा सर्वेपि तनून
पात्प्रयाजवंतः। तर्हि वा वैगुण्यं भवति अवैगुण्याच्च फलसिद्धिर्भवति। इ
तरथा भिन्नकल्पेषु सह निविष्टेषु अन्यतरप्रयाजाश्रयणोसत्यन्येषां वैगु
ण्यात्फलं न सिद्ध्येत्। न च वचनबलेन बाधः। वचनस्य समानकल्पेषु चरि
तार्थत्वेन बाधकत्वासंभवात्। अत्र वसिष्ठादीनां स्वामित्वेनोद्दिश्य षष्ठ्येन न
राशंसादि विधीयते। तादर्थ्ये चतुर्थ्युपकारहूरेणाप्रपन्नमिति वृ
न भिन्नफलकल्पनापत्तिः। वसिष्ठानामिति षष्ठ्याः स्वामिलक्षणा। अतो ये
षां स्वं नाराशंसः। तेषामेव कर्मसिद्धिं करोति नेतरेषां। अयमर्थः वसिष्ठा

नां न राशां सम्पत्तां गेनयग्रू त एव क्रतुः फलसिद्धेः पर्यासो भवतीति। एवं नन्नू
नपाश्चत्रः ऐतरेयां। अन्तत एव कल्पानामेव सहाधिकारो न भिन्नकल्पानामि
ति सिद्धं। अत्र सत्रयजिरिकाम्यप्यनेककर्तृणि कर्माणि यज्ञगण यज्ञादी दू
न्युदाहरणं भवंस्तेषामनुल्यन्यायत्वात् प्रदर्शनार्थं तु सत्रग्रहणमनुवृत्तिः
प्रदर्शिता। अत्र विशेषः वसिष्ठो ब्रह्मेति वचनात् ब्रह्मत्वं वासिष्ठेन कर्त
व्यं वैश्वामित्रो होतेति वचनात् होत्रं तु वैश्वामित्रेण। तयोश्च भिन्नकल्प
त्वान्न सहाधिकारः संभवः। तस्माद्दूरं गत्वा भावाद्वासिष्ठे ब्रह्मत्वेन माध्यस्थ
हौत्रस्य वैश्वामित्रकर्तृकत्वं बाधित्वा वासिष्ठेन तत्समानकल्पेन वान्येन
वित् कर्तव्यं। वैश्वामित्रे वा हौत्रमंगीकृत्य ब्रह्मत्वमप्यवासिष्ठकर्तृत्व
बाधेन वैश्वामित्रेण तत्समानकल्पेन वान्येन वित् कर्तव्यं। अथवा ब्राह्म
णमात्रस्याधिकार इति। तत्राविशेषात् सर्वेषामधिकारस्यात्। अथवा वा
सिष्ठो ब्रह्मेति प्रकृतो वचनात् ब्रह्मत्वस्य वैगुण्यापादवरूपं वासिष्ठेन भवि
तव्यं अनेन तत्समानकल्पानामेधिकारः सिद्धं तत्सिद्धा य एवं कुक्षिस्तोम
भागानधीते स वासिष्ठ इति वचनात् स्तोमभागाध्ययनवतो ऽवासिष्ठस्या ॰८७

87

पिप्रश्नस्तस्यानुज्ञानादध्यासिद्धेनाधिपत्निः प्रमाणं त्वस्य त्वं विगुणं न भवतीति वै
श्वामित्रो होतेति वचनानुहोत्रं वैश्वामित्रेणाविना विगुणं स्यान्नातस्माद्वै
श्वामित्रेण समानाकस्यानामेव सत्रेऽधिकारो नान्येषामिति सिद्धं । अनेनैव
न्याये न तुल्यप्रमाणानामेव सत्राधिप्राप्तं वेति न भिन्नप्रमाणानां दीर्घह
स्वानां । ननु तारांबहि पत्नी यजमानेन संमितौदुंबरी कार्येति यजमानेनोर्द्धं
बाहुप्रपद्दोच्छ्रितेन सममहितेन न बाहुपुरुषाद्धं रज्जुं मितेति न त्वयेनं यजमानेन य:
संमितौदुंबरीम नक्तिपत्नी । अग्निहोत्रसाधनार्थो रज्जुर्यथा येन संमितान
क्तिपत्नीतस्य वैगुण्यं भविष्यतीत्येवमाशंक्याह नपरार्थत्वात् तुल्यप्र
माणानामेव सत्रेऽधिकारो भविष्यतीति पदाशंकितं । तत्र तु तः परार्थत्वात्
। परार्थो ह्यत्र यजमानः उदुंबर्यादिमानार्थो गुणभूतः अतो येन केन वि
द्यजमानेन संमितास्तीयजमानप्रमाणाभवत्येवेति भिन्नप्रमाणानाम
प्यधिकार इति सिद्धं । अतः शालाग्निखरेष्टकायूपादि प्रमाणानियस्यक
स्यचिद्यजमानस्यारत्न्यादिना कार्याणि । नन्वेवमग्नीनामपि परार्थत्वाद्य
स्यकस्यचिदग्निषु साधितं कर्म सर्वेषां फलसाधकं भविष्यतीत्यनाहिताग्नी

दे· श्री श्री ८८ नाम ह्यधिकारः सत्रेषु भविष्यतीति प्राप्ते उच्यते । दर्शपूर्णमासाभ्यामि
ष्ट्वा सोमेन यजेतेत्यस्य प्रवृत्तिनः । प्राप्तेऽपि एतेनानिष्ट्वेति वचनाद्वृत्तद
र्शपूर्णमासस्यैव सोमः । अनाहिताग्नीनां नास्ति सत्रेष्वधिकारः । त
था आग्नेयोष्टाधानगतानां आत्मनेपदाद्धि नाधातॄणां न कार्यसिद्धेः पर्या
88 प्तत्वेनानाहिताग्नीनामनधिकारः । आदधीतेत्यात्म[illegible]नेपदाद्धि आ
धातुरेवाधानफलेन भवितव्यं । कर्मयोग्यता चाग्नीनां तत्फलं अतोऽन्ये
नाहिताग्न्यस्य कर्मणा सार्थयन्ति । यजमानेन संमितौदुम्बरी कार्येति तु
शास्त्रार्थे येन केनचिदपि प्रयोगगतेन यजमानं संपादयति इति वैषम्यं । न
नु नहि जुह्वादिपात्रेषु कथं तानि कस्यचिद्यजमानस्य संबन्धीनि सत्रे
उपादेयानि । अथवा साधारणान्यन्यान्येवेति । तत्राग्निवदात्मनेपदश्रुत
विशेषविरोधाभावात्प्रमाणेव यस्य कस्यापि पात्राण्युपादेयानीति प्राप्ते
उच्यते । सत्यमग्नौ विरोधो नास्ति । तथापि आहिताग्निमग्निभिर्वहन्तीति यज्ञपा
त्रैश्चेति तत्र यादक्षिणहस्ते जुहूं सादयतीत्यादिवचनैः पात्राणां देहे करण
भावः । सादनप्रतिपत्तिश्च विधीयते । तत्र यदि कस्यचिद्यजमानस्य पात्रैः स ८८

त्रेः मारभ्यते तद्यामरणोस्याग्निपतनकालत्वात् कदाचित्सयोगमध्येएव
तस्ययजमानस्यमरणंस्यात् तत्र तस्यसंस्कारः पात्राणांच प्रतिपत्ति
र्हीयेत ।यद्यपि तु नेदंहि तेन मन्त्रांतः प्रयोगो विगुणः स्यात् ।तस्मात्साधार
णानिपात्राणि एकस्या यस्तत्रं कार्यं इत्यनी मिदं चिंत्यते ।आर्त्विज्यविरोधेन
क्षत्रियवैश्ययोः सत्रेऽनधिकारउक्तः सत्राणि ब्राह्मणानामृत्विक्
त्वेनेति ।तर्हि आर्त्विज्येन तयोरधिकारो मास्तु ।गार्हपत्येधिकारो भवि
ष्यति तत्रार्त्विज्यविरोधाभावादित्याशंक्याह वैश्यराजन्ययोर्गार्हपत्ये
नेत्यनुवर्तते ।वैश्यराजन्ययोर्गार्हपत्येपि गृहपतित्वेपि अधिकारो न भव
ति ।कुतः ।तयोर्ब्रह्मसामपक्षभेदेन भिन्नकल्पत्वात् ननु नामान्नांर शंसया
जिवत्तान तथाहि बार्हद्गिरं ब्राह्मणस्य ब्रह्मसाम कुर्यात् ।पार्थुरश्मं राज
न्यस्य रायोवाजीयं वैश्यस्येति ।तेन पार्थुरश्मरायोवाजीये चाक्रियमाणे
ब्राह्मणानां वैगुण्यं भवति ।बार्हद्गिरेतु क्रियमाणे क्षत्रियवैश्ययोः ।त
स्माद्वैश्यक्षत्रिययोर्गृहपतित्वेपि नाधिकारः ।इदं श्रूयते ।पंचपंचाशतः
स्त्रिवृतः संवत्सराः पंचपंचाशतः पंचदशाः पंचपंचाशतः सप्तदशाः पं

चपंचाशतनएकविंशतिविश्वसृजांसहस्रसंवत्सरमिति। अत्रायं संदेहः
।किमयं सहस्रसंवत्सरशब्दो मुख्य उत गौणः। यदापि मुख्यस्तदापि किम
नुष्यव्यतिरिक्तानां स्वतः सहस्रायुषां गंधर्वादीनामधिकारः उत मनुष्या
णामेव रसायनमित्रविंदादिसंपादितसहस्रायुषां। अथवा तुल्यकल्पः
।अथवा सामस्त्यानं। अथवा विश्वसृजामयनं नुवेतां सहस्रायुष्टं अथ
वा हर्तनीयशतानां पञ्चमानानामधिकारः। यदापि गौणत्वं तदापि किं मा
सेषु संवत्सरशब्द उत द्वादशरात्रिषूत दिवसेष्विति पक्षाः। तत्र प्रथमं पक्षं
।तावदाह। सहस्रसंवत्सरममनुष्याणामसंभवात्। सहस्रसंवत्सरं सत्रं
अमनुष्याणां मनुष्यव्यतिरिक्तानां स्वभावात् सहस्रायुषां गंधर्वादीनां भव
ति। कुतः असंभवात्। मनुष्याणां सहस्रायुषः स्यासंभवात् न हि सहस्रायु
षो मनुष्याः संति। अतः शक्तिबलाद् मनुष्याणां गंधर्वादीनामधिकारः॥
स्यादेहानि रूपत्वात्। अमनुष्याणामनधिकारस्य प्रागुक्तत्वात् संनेत्रास्यणो
ग्नीनादधीते स्यादि विधानात् मनुष्याणामेवाहवनीयाद्यग्नयः संति नान्ये
षामिति। न कथमपि गंधर्वादीनामधिकारः संभवति। अतो मनुष्याणामे ८९

मेव सहस्रसंवत्सरं सत्त्वं स्यात्। कास्स्मेनयथोदितं विधिमुपसंहर्तुं ने
ष्टामेवशक्यत्वात्। ननु मनुष्याणां सहस्रसंवत्सरपरिमाणमायुः कथं
संभवति। उच्यते आयुरपि नावत्परिमाणं मनुष्याणां स्यात्। कुतः दे
हानित्यत्वात्। देहस्यायुषोऽनित्यत्वात् अनियतकालत्वात्। नहि निय
तकालं मनुष्यदेहावस्थानं। कश्चिच्छतं वर्षाणि जीवति। कश्चिदधिकत
रमिति अतोऽपरिमितायुषो मनुष्या इति। तस्मान्मनुष्याणामेवाधिक
रः। ननु मनुष्यदेहस्यानित्यत्वेपि सहस्रायुष्ट्वं तेषां कथं संभवतीत्याशं
क्याह तस्य च कार्यत्वात्। तस्य चायुषः कार्यत्वात् रसायनमित्रविंदादि
नाकर्तुं शक्यत्वात्। श्रूयते हि। मित्रविंदया आयुःकामो यजेतेति॥ अ
तो रसायनैर्मित्रविंदादिभिरायुःप्रापकैः कर्मभिश्च मनुष्या अपि दीर्घमा
युः प्राप्स्यंतीत्याशंक्याह नासंभवात् रसायनैरपि एतावत्परिमाणमा
युर्न संभवति। न च मित्रविंदादिकर्मभिरपि। न त्वेतावदायुषो रसायनादी
नां च संबंधो दृष्टपूर्वः। नहि रसायनानामेतावत्साम र्थ्यं दृष्टं यतः तैः सह
स्रं वर्षाणि मनुष्याज्जीवेयुः। एतानि त्वेतेर्वर्द्धनानि वलीपलितनाशनानि

दे॰ प्रा॰ श्री ९० स्तरवर्स्सप्रसाधकानि मे । वषजनन नानिच । नेतावत्सरिमाणस्यायुषोद्दा
त्कृणि दृश्यंते । न च मनुष्याणामेतावदायुः कल्पयितुं शक्यते । शतायुर्वै
पुरुष इत्यर्थवादात् । ननु शतान्यायुषि श्रूयते इति विग्रहः करिष्यते । मैवं
। नहि द्विवचनबहुवचनांतानां शब्दानां समास इष्यते । प्रमाणाभा
९० वश्च अभिधानासामर्थ्याच्च । न त्वेवमेकत्वेपि प्रमाणाभावात्तेन कथं
विग्रहः स्यात् । एकत्वं जात्यपेक्षं । प्रातिपदिकाभिहिता जातिरेकेति ।
यद्वा जातिराश्रयं भेदेनानुपपद्यमाना एकत्वावद्वाश्रयमाक्षिपतीसे
श्री॰ कत्वसिद्धिः । तस्मान्मनुष्याणां रसायनैर्मित्रविंदादिभिश्च सहस्रसंवत्स
रायुषस्य करणासंभवात् कथं मनुष्याणामधिकार इत्याशंक्याह शा
स्त्रसंभवादिति भारद्वाजः । भारद्वाजो मुनिरित्याह । एवं ब्रवीति । मनु
ष्याणामपि सहस्रायुष्यं संभवति । कुतः शास्त्रसंभवात् । शास्त्रसंभ
वः शास्त्रसंभवः तस्मात् मित्रविंदायाः आयुष्कामो यजेतेति हि शा
स्त्रं मित्रविंदया आयुर्भावयेदिति बोधयति । न च सहस्रसंवत्सरसत्र २
मासीस्तत्रायुषः परिमाणं श्रूयते । तेन वेदि... म्प्राप्ते न सहस्रायुषो ९०

पिभविष्यंतीति। रसायनान्यप्यस्याः स्थिरसंभावाकारकाणि दृश्यंते।
।एवमभ्यस्यमानानि वीर्यवन्ति मानि च स्थिरशरीरत्वमुत्पादयिष्यंतीति। श
तायुर्वै पुरुष इत्यस्मिन्मन्त्रस्याप्यधिकजीवनं मनुष्यस्य श्रेणानुभूयत
एवेति नायमेकान्तः। तस्मान्मनुष्याणामपि रसायनेन मित्रविंदादिश्रौत स्या
हस्रसंवत्सरविधायकशास्त्रात्सहस्रायुष्यस्य संभवो भविष्यतीति प्रा
प्ते आह नादर्शनात्। शास्त्रसंभवादि तियदुक्तं तन्न। नहि मित्रविंदया
सहस्रसंवत्सरपरिमाणमायुर्भवतीति विश्रूयते नाप्यभ्यासेन तावत्कर्तुं
शक्यते। नापि रसायनेन। कुतः। अदर्शनात्। तावदायुष्काणां मनुष्याणा
मदर्शनात्। यद्येभिरुपायैरेतावदायुर्भवेत्तन्नहि आयुषः सर्वैरपीष्य
माणत्वादेतदुपायसंपादितेनतावदायुषो मनुष्या दृश्येरन्। नच दृश्यन्ते
व। अत्र नलौगम्यते। एभिरप्युपायैरेतावदायुर्न भवतीति। नन्वेतावदायुः क व
स्यचिदपि संभवति। तत्र रसस्य तावदारोग्यपुष्ट्यादिजनकत्वमेवानत्वा
युहेतुत्वं। आयुः प्रापके च मित्रविंदादिभिरप्यपमृत्युनिरासएव क्रि
यते। न विधानसहस्रादधिकमायुः। तथा च मित्रविंदां प्रकृत्य वाक्यशेषः

दे·प्र·श्रौ
८१

91

।विंदते मित्रस्य राष्ट्रमस्य भवत्यप पुनर्मृत्युं जयति सर्वमायुरेति ।। तेन चा
पमृत्युर्नास्तीति वाच्यं। आथर्वणे हि पठ्यते एकशतमपमृत्यूनामिति। ते
नैको महामृत्युः स तु दुस्तरं घनेनैनाद्युपायेन कर्तुं न शक्यते। तथा मत्स्यः
पितरः पुरा ह्यपुत्रो म्रियते यस्य तस्यौघाधन्तेदति परमायुषः पूर्वमप्यपमृत्युना
मरणं दर्शयति। तथा मनुरप्यमुमर्थं ब्रवीति। अनभ्यासेन वेदानामा
चारस्य च लंघनात्। आलस्यादन्नदोषाच्च मृत्युर्विप्राञ्जिघांसतीति।
अतो मनुष्याणां कथमपि सहस्रायुषस्यासंभवादेकस्मिन् कुले समुत्प
न्नानां पितृपुत्रपौत्रप्रपौत्रादीनां बहूनां साधारणस्य सहस्रायुषस्य
संभवात् कुलाधिकार इति वृत्तौ यत्पक्षोल्लिखितस्याह कुलत्रमिति कार्ष्णा
।जिनिः। कार्ष्णाजिनिर्मुनिरित्याह एवं कस्यचित्तियजनकुलसत्रमेकसह
स्रसंवत्सरं भवति कुलस्य पितृपुत्रपौत्रप्रपौत्रादिरूपस्य वंशस्यैतन्नद् पौत्र
वर्तिनस्त्वेकस्य कस्यचिदसंभवात्। मनुष्याधिकारत्वेन तत्प्रारब्धं यावच्छक्यं
समापनीयं। न चैकाशक्तोऽतिसमापयितुमिति यथा शक्यते तथा समाप
नीयमिति गम्यमाने न बहवस्ते शक्नुवन्तीति तेन सान्तकुलीनाः क्रमेण के ८१

श्चिद्द्वारभ्यं केश्चिन्मध्ये नुष्ठितं केचित्समापयिष्यंतीत्येवं कुलसत्त्रं कार्ष्णा
जिनिर्मन्यते स्म। नैतद्युक्तं। यतः शास्त्रफलं प्रयोक्तरीति न्यायात्समग्रानुष्ठा
तृणामेव फलं भवति नैकदेशानुष्ठातृणां। न च पित्रादिषु कोपि तत्सत्त्रं क
रोति। तस्मान्नास्त्येवैकस्यापि फलमिति। अतो न कुलसत्त्रमेतत्। न हि सास्तु
ष्ठानमस्तीति चतुर्थः पक्षोऽनुपपन्नः स्यात्। साम्युत्थानमिति लौगाक्षिः। सामि
शब्दोऽर्द्धशब्दस्यार्थो। अर्द्धसमाप्ते सत्त्रे उत्थानं परित्यागः साम्युत्थानं। सामि
त्वर्द्धे जुगुप्सिते इत्यमरः। असमाप्तमेव द्वादशसत्त्रं त्याज्यमित्यर्थः। लौगाक्षिरे
वं मन्यते स्म। कार्ष्णाजिन्यभिमतान्कुलसत्त्रपक्षात्साम्युत्थानं च रम्यमिति। तन्मते
हि बहूनां वृथा प्रयासः। अस्मन्मते त्वारंभकर्तॄणामेवेति। अस्य पक्षस्य त
द्वेषयोग्यत्वात्तु न त्वयमपि पक्षोऽनुपपन्न एव। असमाप्तस्य कर्मणः
फलानुत्पत्तेः। न हि सत्त्रविधायवचनं बंधकृत्वसत्रिणां दीर्घायुर्भविष्या स्त
तीति पंचमः पक्षोऽनुपमेवं। न त्वस्य वचनस्यासौ अर्थः संभवति न ह्याचक्षुष्का
भावान्नान्वयस्यापि तु शक्यते। संभावितायुष्मतामपि सत्त्रान्तरे बहु
तानां देवान्म्रियमाणानां तत्सत्त्रविधिकलादायुर्दीर्घदर्शनान्। नहि पंच

मी॰ प्रा॰ पंचाशत्तु स्यस्य पुरुषपरत्वमंगानुत्पत्त्या हि द्विशतानां पुरुषाणामधिका
८२ रे विहिते संवत्सरचतुष्टये न सहस्रसंवत्सरत्वं संपद्यते यएन एकोपित्रि ह
त्तो भवत्यागयुक्तः संवत्सरांपंचपंचाशत्संख्यैर्यजमानैः प्रत्येकं कृते भूतैः
संबध्यमानस्तत्संख्यो भवति। न यथा पंचदशाहयोः पौर्णमासेन चतुः संवत्सरमि
92 ष्टं सत्रमर्हन्ति तैर्यजमानत्वात्। त्रियमाणं सहस्रसंवत्सरं भवतीति पक्षः प स
सोऽनुसोप्यनुपपन्नः। चतुर्विंशतिपरमा सत्रमासीरन्निति वचनादधि
कानां तत्राधिकाराभावात्। तस्मात्संख्याशब्दः संवत्सरशब्दयोर्मध्ये अन्य
तरस्य गौणत्वमाश्रित्य मनुष्याधिकार आश्रयणीयः। तत्रापि संख्याशब्द
स्य मुख्यत्वादेकार्थनिश्चयसामर्थ्याच्च न स्वार्थत्यागः संवत्सरपदं तु जघन्य
त्वात् सावनसौरचांद्रनक्षत्राद्यनेकार्थसाधारणत्वेनार्थानिश्चयासामर्थ्या
त् गौणं भवति। तर्हि यो मासः स संवत्सर इति वचनात् संवत्सरशब्दस्य मासप
रत्वे सति सहस्रमासं एव सत्रमित्येष समः पक्षोऽनुसोपि नोपपद्यते। यतः अ
ष्टमे वर्षे उपनीतो द्वादशवर्षाणि वेदमधीत्याष्टविंशतिवर्षको विवाहं कृत्वा
जातः पुत्रोऽग्नीनादधीत तस्मादाधानादूर्ध्वं ज्योतिष्टोमानुष्ठानोत्तरकालम ८२

ष्यासुषिनमभवन्ति सहस्रमासाः। नहि संवत्सरप्रतिमा वै द्वादशरात्रय
इति प्रयोगात् द्वादशरात्रस्त्रिषु संवत्सरशब्दः। प्रतिमाविशेषणात्संवत्सर
शब्दः। न तस्य द्वादशरात्रस्य त्रिषु प्रयोगः। तस्माद्द्वमः पक्षोऽप्ययुक्तः। अ
थ नवमपक्षं सिद्धान्तमाह ञ्याहाद्वा शावयत्वात्। वाशब्दोऽवधारणे। अ
ह्नामेवैतत्सहस्रसंख्येतव्यं। नवैषां तन्मासा नानाविद्वादशरात्रीणा
मिति युक्तः। अशक्यत्वात्। न ह्यन्यथैतत्सत्रं मनुष्यैः कर्तुं शक्यते। अ
थवा शक्यत्वात्। अग्न्येः संवत्सरशब्देन मतिपादेन मनुष्यैरपि कर्तुं शक्यत्वा
त्। मुख्यार्थसंभवे च गौणी वृत्तिरन्याय्या एव। अन्याय्यानर्थवत्तापत्तेः। न
चात्र मुख्योऽर्थः संभवतीति मायुक्तं। अतो व्यपं भावितिगौणपरत्वे द्विवत्स
परत्वं युक्तं। त्रिवृदादिशब्दानुगुण्यात्। न त्रिवृत्स्वं वदशः सप्तदशाद्य इत्येते श
ब्दाः स्तोमवाचकाः सन्तः स्तोमयुक्त एकैकस्मिन्नहनि यागे हपेलक्षणया व
र्तन्ते। सत्रेनु तथा विधिप्रयोगबाहुल्यान्नात्र तु बहुः संघेषु कश्चित् त्रिवृदादिश
ब्दाः प्रयुक्ताः। ते च शब्दैः समानाधिकरण्यात् संवत्सरशब्दः स्वावयवमते
ह निलक्षणया वर्तते। त्रिवृतं संवत्सरा इत्युक्ते त्रिवृत्स्तोमकयागयुक्तान्य

दे॰ ममी हानीत्युक्तं भवति। ननु संवत्सरशब्दस्याह्निवृत्तौ किं प्रमाणमित्यत आह
९३ श्रुतिसामर्थ्यात्। अहन्यपि संवत्सरशब्दस्यार्थवादोदितं प्रवृत्तिनिमित्तमस्त्ये
वा श्रूयते हि आदित्यस्त्वेव सर्वे ऋतवो यदैवोदेत्यथ वसन्तो यदा सङ्गवोऽथ ग्री
ष्मो यदा मध्यन्दिनोऽथ वर्षा यदापराह्णोऽथ शरद्यदैवास्तमेत्यथ हेमन्त इति क
93 सर्वर्तुसमवायाच्च कात्स्न्येन दिवसः संवत्सरशब्देनाभिधातुं। अहर्वै संवत्सर इ
त्यपि क्वचित् श्रूयते। अतः श्रुतिसामर्थ्यादि नक्तिबलात् संवत्सरशब्दोऽत्राप्य
हरभिधायकत्वार्थः। तस्मादह्नां सहस्रमेतदवसेयं किं च प्रकृत्यनुग्रहा
च्चाप्येतदृतेर्गवामयनं ह्यादशाहादेरेवमनुग्रहः कृतो भवति। प्रकृतौ हि अ
हान्येव संख्येयानि। इहापि यद्यहान्येव तथा भवन्ति तत्र हि प्रकृतिरनुगृहीता
भवति नान्यथा तस्मात्सहस्रदिनात्मकमेतद्धि श्वसृजामयनसंज्ञकं सत्रम
नुष्ठानमेव भवतीति सिद्धान्तः। अथेदं विचार्यते एकप्रयोगवचनचोदिता
नामेकफलानां सहत्वैकाधिकारं प्रति पाद्यते। यदि त्वाग्नेयादयः षडपि परस्प
रानपेक्षाः स्वर्गं साधयेयुः ततस्तेषां कामिनः कर्तव्यत्वेन युगपदुपस्था
नाभावान्नाह एकप्रयोगवचनांगयुक्ताः कर्तव्या इति तन्त्रलंबनसिद्धौ नातस्मा ९३

कारित्वं बहूनां कर्मणां सहत्वं सांगभाजामंगानुष्ठानां किं तन्त्रेण भवति उत पृथक् पृथक् इति तत्र तदर्थं
प्रथमं सहत्व

–संहत्यकारित्वं प्रतिपाद्यते। ननु दर्शपूर्णमासादिष्वनेकप्रधानं सन्नि-
पाते संदेहो भवति। किमाग्नेयादयः षट् पृथक् पृथक् स्वर्गसाधनमुत संहत्येति। न
त्राग्नेयादीनि प्रधानानि परस्परानपेक्षाणि भिन्नचोदनाभिः षट् पृथग्भूतान्यतस्ता-
नि षट् पृथगेव फलमाकांक्षन्ति। नन्वत्र संनिधौ स्वर्गादिफलं श्रूयमाणं भेदेना-
कांक्षितत्वाद्भेदेनैव संबध्यताम् अस्मात्सन्निप्रधानं फलभेदे प्राप्ते उच्यते। पृथ-
क्भूतानामप्येतेषामेकमेव फलम्। कुतः। यतो दर्शपूर्णमासाभ्यां स्वर्गकामो
यजेतेत्यनेन वाक्येन सर्वाण्येकेन दर्शपूर्णमासशब्देनोपादीयन्ते षां फलसं-
बंधः कृतः। अतः समुदितेभ्यः फलं गम्यते। न भेदेन। अपि यागानामेकरूपत्वयो-
ग्यानामेकेन डागस्त्वपद इति नाम शब्देन समुदायवचनेन संयुज्य विधीयमा-
नः कूपः समुदितैः पुरुषैरेकः सम्पाद्यते न प्रतिपुरुषं कूपभेदः एवमिहापि ना-
नायागसमुदितस्य फलं विधीयते स्वर्गेण यागं कुर्यादित्येवं हि न हि फलसमुदि-
तरूपयागो विधीयते स्वर्गं यागेन कुर्यादिति। तस्मात्फलोद्देशेन विधीयमाना-
नां विवक्षितं साहित्यमिति सिद्धं संहत्यकारित्वम्। एवं सिद्धे संहत्यकारित्वे प्र-
संगतो विचारः। किमेषां षट् पृथक् यागानुष्ठानमुत तन्त्रेणेति। तत्र प्रतिप्रधानं प्र

पृथक्पृथगनुष्ठानं प्राप्नोति यतः प्रधानानि बहूनि अंगवन्ति च प्रत्येकं
संपाद्यानि च पृथक्पृथगंगानुष्ठानेन विना प्रत्येकमंगवत्ता संपद्यते। यतः प्रा
भा प्याग्नेयादिभावनाः साध्यसाधनांशयुक्ता उत्पत्तिप्रयोगवाक्याभ्यामवग
ताः परस्परानपेक्षा एवैकयमिति तत्कं भावं मेदेने वापेक्षंते न तु शास्त्रसंनिधि
94 समाम्नातान्यंगानि प्रत्येकमेव तानुविनिमुञ्चते। विनियोगानुसारेण चानु
ष्ठानं तस्मादेकैकं सांगं कृत्वैकं नेष्टमित्येकं सांगं कृत्वाऽपरमपि तथैव
कर्तव्यं तस्मात्सन्निधानेऽपृथगेवांगानुष्ठानं कार्यमिति प्राप्ते आह ६ कर्मणां
युगपद्भाववत्त्वं तत्र यत्र प्रधानकर्मणां युगपद्भावः सह प्रयोगः। तत्रारादुपका
रकाणामंगानां तंत्रेण सकृदनुष्ठानं भवति न प्रतिप्रधानं पृथक्पृथक्। यद्धि स
कृत्कृतं बहूनामुपकरोति तत्तंत्रमित्युच्यते। यथा बहूनां मध्ये तत्र प्रदीपः
ऊनस्तंत्रमिति हेत्वाकांक्षायां त्रीहि तत्राह शक्यपुरुषार्थकृत्त्वैकार्थसमवा
यश्च्युतिभ्यः। प्रधानकर्मणां सह प्रयोगे सति परंगानां सकृदनुष्ठानमुक्तं। न त्वु
नः। शक्यत्वात्। सकृदप्यनुष्ठितेनारादुपकारकेणांगेन बहूनामपि प्रधानानामु
पकारस्य कर्तुं शक्यत्वात्। शक्तं चेत्तथारादुपकारकाणि बहूनामुपकर्तुं स्म

ग्र. त्यमाणो विशेषत्वात्प्रदीपवत्। यथा एक एव प्रदीपो बहूनां मध्ये
वृत्तः सन् सर्वेषामुपकरोति। एवमेतान्यपि। तत्र प्रयाजांगानां प्रत्येकमेव वि
नियोगस्तथापि विधानवदनुष्ठाने सकृदेवोपकारकं न भवति यथैव हि ष
२ सुभावनासु भेदेनैव कथंभावमपेक्षमाणास्वपि सकृदाम्नातान्येवांगवि ए
षयः प्रणामपि प्रत्येकमंगानि समर्थयंति। सत्स्वपि चवैर्विस्पधानोत् स्प
त्तिविधिसंनिधौ प्रकरणावशेन संनिधिर्बाध्यते। तथैव संहतानां प्रधाना
नां फलसाधनत्वात्तदंगानां कालैक्याद्युगपत्सर्वेष्वनुष्ठानं प्रारब्धेषु सकृ
ष्टा तेष्वेवांगं सर्वं विकार्यं यावृत्तत्वात्संतमपि केन विरोधं निधिबाधित्वात्प्रकर
णावशेन सर्वार्थं भवति। किंच पौर्णमास्यां पौर्णमास्यां यजेतेति त्रयाणां
युगपदनुष्ठानमवगतं तेन यथ कृत्वांगेष्वनुष्ठीयमानेषु बाध्येत। त
स्मात्सकृदेवांगानामनुष्ठाने। तथा पुरुषार्थवृत्तत्वात्प्रयत्नः सकृदनुष्ठि
तैरप्यंगैः पुरुषार्थः कृत एव भवति। पुरुषार्थः पुरुषस्याभीष्टं फलं न हि
आग्नेयादिभिरंगोपचृतैः ष्क्रियते। आरादुपकारकेष्वौ। एषांगानाम
नेकघटादिप्रकाशकप्रदीपवत्सर्वेषां सहैवोपकुर्वंति सकृत्कृतैरपि कु

दे॰ प्रश्नो
९५

पार्थः चूनरणं भवति। तथा। एकार्थसमवाये ऽनेकांगानां तंत्रं भवति
। एकोर्थो यस्यासावेकार्थः एकफलो यः प्रधानानां समवायः समूहः स
एकार्थः समवायः। तत्र एकार्थसमवाये एकफले प्रधानसमूहे अंगानां
तंत्रमिष्यते॥ अंगानां सकृदनुष्ठानं अभिधीयते यतः। तथाहि। ता एकविंश
तिराहुतयो द्वावाघारौ पंच प्रयाजा द्वावाज्यभागावाग्नेयः पुरोडाशस्त
द्वदग्नीषोमीयउपांशुयाजोग्नीषोमीयः पुरोडाशोग्निः स्विष्टकृदि
डा त्रयोनुयाजाः सूक्तवाकः शंयोर्वाकश्चाप्ययदेवाहेः पत्नीसंयाजेषु
संप्रगृह्यन्ति समिष्टयजुश्चेति तत्राग्नेयोपांशुयाजाग्नीषोमीयलक्षणे ए
कफले प्रधानसमवाये ऽप्याहुतीनामेकविंशतिसंख्याभ्युपयते। सा चांगानां
सकृत्करणपक्षे एवोपपद्यते। न प्रतिप्रधानं पृथगनुष्ठानपक्षे। तस्मात्प्र
धानानां सह प्रयोगे सकृदेवारादुपकारकाणां क्रिया। संनिपत्योपकार
णांका प्रति प्रधानं आवृत्तिरिति तु प्रागुक्तमेव। अप्रधानानां सह प्रयो
गेकारणान्याह फलकर्मदेशकालद्रव्यदेवतागुणसामान्यं। यत्रैकेन वा
क्येन बहूनि प्रधानकर्माणि एकफलसाधनत्वेन विधीयन्ते। तत्रैव ९५

भिन्नेरेनरसापेक्षाणांसाधनत्वेनविधानात्सहप्रयोगः।तद्यथामित्र
विंदाग्न्याद्यभिन्नायुःकामस्येतिवैश्वदेवेनप्रजाकामंयाजयेदिति
अत्रमित्रविंदाशब्देनसमुदायवचनेनदशानांहविषांसहप्रयोगः।वै
श्वदेवशब्देनचसमुदायवचनेनाष्टानांहविषांसूत्रार्थस्तुसामान्यशब्दः
प्रत्येकंसंबध्यते।फलसामान्यंकर्मसामान्यंदेशसामान्यंकालसामान्यं
द्रव्यसामान्यंदेवतागुणयोःसामान्यंचेति।एकवाक्येनैकफलसाधनत्वे
नविधानेपिफलादिसामान्यस्यैवप्रधानानांसहप्रयोगोभवति।फलंस्व
र्गादि।कर्मपंचप्रयाजनानुयाजेत्यादि।देशःसमप्राचीनप्रवणादिः
।कालःपूर्वाह्णमध्याह्नापराह्णादिः।द्रव्यंदक्षिणाद्रव्यंनतुहविर्द्रव्यं
भिन्नेष्वेषुप्रधानकर्मसुतद्भेदस्यावश्यंभावात्।देवताप्रजापत्यादिः
तन्नगुणरूपांशुत्वाश्राव्यत्वादिः।तस्मिन्सतिप्रदानमपिसहैवभवति
नपृथक्।तद्भेदेभेदः।तेषांफलादीनांभेदस्तद्भेदः।तद्भेदेतेषांफलादीनां
सहप्रयोगकारणानांभेदेसतिप्रधानानांप्रयोगभेदोभवति।तत्रप्रयोगव
चनभेदान्मित्रविंदाप्रतिकामाग्न्येययोर्नसहप्रयोगः।फलभेदाच्चश्याका

द्वे. प्रश्नो ९६

96

मराहृकाममित्रकामासुः कामभित्रविंदानां पृथक्प्रयोगः भेदो भवति। न
यथा कस्यचित्त्वं च प्रयाजतां कस्यचिन्न प्रयाजत्ता। यथाग्नैडिनीयामहा
हविषोः। तत्र न सह त्वे रनरेतरस्य विगुणत्वं भवति हेतुभेदेपि पितं न भेदो भ
वति। यथा वरुणप्रघासे षुमारुत्याः। अग्नेःडिनीमहाहविषोश्च अग्नेःडिन्याः स
मोदेशः। महाहविषस्तु प्राचीनप्रवणः कालभेदेपि सह प्रयोगो न भवति। य
था दर्शपौर्णमासस्य च। पौर्णमास्यां पौर्णमास्यां यजेतामावास्यायामावास्य
याय जेतेति वचनेन कालभेदेन न यौर्विधानात्। यथा वा आग्नीकवती सांत
पनीय यो पूर्वाह्णमध्याह्नपकालभेदात्तं न भेदः दक्षिणाद्रव्यभेदे सति सह प्र
योगो राजसूये त्रयाणां त्रिषंयुक्तानां। येषां मे न च त्रिषंयुक्तानां त्रयाणां मध्ये
कस्मिन्नेवाहन्यनुष्ठानं तेषां दक्षिणाद्रव्यभेदे न त्रयाणां त्रयाणां पृथग
नुष्ठानं न सर्वेषां सह प्रयोगः। दक्षिणाभेदश्च त्रयाणां वामनः त्रयाणां त्रया
मान्त्रयाणां ब्रह्मु[illegible]रिति विधानदेशकालकर्मभेदेत्स्यापि दक्षिणाभेदान्तं त्रे
भेदः। देवतायाः देवतागुणस्य च सामान्येस्पति उद्धारणमपि तस्माद्देवतत्र द
क्षिणामवस्थागनमानाबाध्येन। तस्मान्न निदक्षिणांनभेदः। अत्र एव ९६
वे

वाक्येनैकफलार्थमेवतन्त्रहसिद्धणामेष्टादानतिभेदः नत्वदेहाचकृतस्य
रूपस्यभेदः वामनचहेतनैहिंपूर्वकर्तव्या। इत्यामाननैरुत्तरं। तत्रत्वेतन्त्रा
मात्तानुतनमयकुर्युः नाया आवाहनस्यागाद्गतंत्रेणभवतियथासप्त
दशप्रजापत्येष्टुवाजपेये प्रजापतेर्देवतायाः समानत्वात्तद्गुणस्योपां
शुत्वस्य च समानत्वादनुवाचनादौ तन्त्रेणोच्चारणंभवति। यागेपितन्त्रे
णैवभवति। तथाच प्रजापत्यान्नत्वभ्यपतएकानुवाक्याभवत्येकाया
ज्यैकदेवत्याहि प्राजापत्याः स्तपा०सूक्ताच्छागानाम् हविषोनुब्रूही
ति अत्रानुवाक्यायकत्वे एकदेवत्यत्वहेतुरुक्तं एकदेवताकानांसि
द्धंतन्त्रोच्चारणंदर्शयति। दर्शपूर्णमासयोरेवद्व्यमेदेप्यदध्नः पयसश्च
देवताया इन्द्रस्य तद्गुणस्य चाश्राव्यत्वस्य समानत्वात्तन्त्रेणैवयागोच्चा
रणंभवतिदेवतायांसमानायामपिदेवतागुणस्योपांशुत्वादेर्भेदेसति
सहोच्चारणंभवति। यथाप्रकृतावेवोपांशुयाजाग्नीषोमयोः पुरोडाशो
ग्नीषोमयोश्च। इहदेवतातद्गुणयोः समान्येयागस्यतन्त्रेणानुष्ठानमु
च्यते। अत्रसिद्धमेवदेवतातद्गुणसामान्येतन्त्रेणयागानुष्ठानमुपजीव्य

दे·प्र·श्री
९७

द्रव्यभेदे यागस्य भेदेनानुष्ठानं पूर्ववन्निविष्टं न द्रव्यभेदे गुणो योगादिति
वाच्यमिति न पुनरुक्तिदोषः ॥ देशकालकर्तृत्वप्रधानानां सह प्रयो
गः उक्तः ॥ अथ न हे वदेशकालकर्तृ विचिन्त्यन्ते दर्शपूर्णमासयोराग्नेयादी
नि प्रधानानि ८ तत्र देशकालौ श्रूयेते । समे दर्शपूर्णमासाभ्यां यजेत
पौर्णमास्यां पूर्णमास्या यजेतामावास्यायाममावास्यया यजेतेति । त
था चातुर्मास्येषु प्राचीनप्रवणे वैश्वदेवेन यजेत वसन्ते वैश्वदेवेन यजे
तेति तेषु मनो देशकालौ तन्त्रमुत भेदेनेति । यस्मिन्नेव समये यस्यामेव च
पौर्णमास्यामाग्नेयस्तस्मिन्नेव समये तस्यामेव पौर्णमास्यामग्नीषोमी
यइति उत समान्तरे पौर्णमास्यान्तरे इति । तत्र पूर्वपक्षमाह देशकालौवि
रोधेन तौ देशकालावङ्गत्वाद्व्यदैवतवद्बहुत्वमिति विधिविशेषोऽसन्नोऽप्रतिप्र
धानं भिद्येते । अन तन्त्रमस्य अङ्गानां सकृदनुष्ठानस्य विरोधे चेत्तेन विरो
धकाविरस्यर्थः ॥ तथा गुणं शानां भावनैव संबन्धो न परस्पराङ्गानो देशा
दिविधीनां फलवाक्यस्य च न मिथः संबन्धः किन्तु फलवाक्यं देशादिवाक्या
नि च सर्वाणि भावनोत्पत्तिवाक्येन संबध्यन्ते । उत्पत्तिवाक्ये तु चाग्नेयाद

योन्योन्यनिरपेक्षाण्येवागतानीति न यावत्। तैः संबध्यमानौ देशकालाव
पि निरपेक्षावेव भवतः। तस्माद्यथापड्शाप शुनेत्यस्मिन्वाक्ये
तं त्राभिहिताभिरपीष्टिभिः प्रत्येकमेव कालः संबध्यत इति नैकस्या
मेव पौर्णमास्यां सर्वाः क्रियन्ते। तथाग्नेयादिभिः प्रत्येकमेव काला
दीनां संबन्धादेकस्यामेव पौर्णमास्यामाग्नेयं कृत्वा परस्यामग्नीषोमीय
मित्येवं बहुपर्वसु षड्यागाः कर्तव्याः। न चैवं फलबाधावगतसाहि
त्याबाधः। तत्र षोडशावदवदं गतं। एकमेव फलं सर्वैः साध्यते। न प्रत्येकं
फलस्य पृथग्वृद्धिः प्यतिरिति न कालभेदाद्बाधः। यथा पौर्णमासीत्रिके
अमावास्यात्रिके च बहुयोः पर्वणोनिः कृष्यमाणेऽपि न फलं प्रति साहित्ये
बाध्यते तथा षण्णामपि निःकर्षे द्रष्टव्यं। यदा येव मुत्पत्तिवाक्ये शेष
त्वं कालादीनां न दोत्पत्तिवाक्ये प्रधानभीमाणां निर्गुणानां विधानात
न्मात्राणामेवाम देशकालो नां गानां प्रधानदेशकालत्वं। तानि तु कामंका
लानगणेदिध पिकर्न[illegible]मीनि प्रासंगि हन्यमाह न च नेनोपदेशानावा
दुतं देशकालानुत्पत्तिविधिशेषत्वाद्युपदेशवत्यानि प्रधानं भि येनै

दै॰ मश्री
९८
98

इति यत्रोक्तं प्रधानमात्रगोचरं न गौणे देशातिदिविधानं। नांगानामिति
तन्नानुमतः कृत्स्नोपदेशात्। कृत्स्नानां प्रधानानां सांगानां तस्मिन्देशेन
स्मिन्कालेचोपदेशात् प्रयोगविधिनाविधानात्। तथा हि। दर्शपूर्णमा
साभ्यां स्वर्गकामो यजेतेत्येकेन शास्त्रेणाग्नेयादीनां षण्णां सत्रानाम
पिपरस्परसहितानामेव फलसाधनत्वेन विधानात् एकः प्रयोगो गम्य
ते नमे वैकप्रयोगात्वादेकं एक दर्शपूर्णमासशास्त्रमुपजीव्य देशकाल
विधानान्नावपि प्रयोगशेषाव भवनोत्पत्ति शेषो यद्यपि भावनये वांगानां
संबंधो न तु न परस्परं न याधिनोत्पत्ति वेलायामंगसंबंधः सा हि प्रथमं
भाव्यमपेक्षते नान्यान्नाम भव फलवाक्ये तेन फलवाक्यावरुद्धानामुत्पत्ति
वाक्यानां संगसंबंधः फलवाक्ये च फलं प्रति विवक्षितं सा हि स्यानां वि
नियोगात्फलार्थिनां युगपत्सर्वेषु कर्तव्यतावगतिः यस्यां हि बुद्धावा
गतेयः कर्तव्यतमापद्यते इत्येतत्स्यामेवाग्नीषोमीयादयोपि प्रयोगविधे
कवाक्यत्वात्तेन न सर्वेषु कर्तव्यतयोरुपस्थितेन बुचिकीर्षितेच पौर्णमा
सीकालो विहितः इतियेके च पौर्णमास्य पात्ता सेवा गतः घमागो विनियोप ९८

त्वात्सर्वथा भवति। तथा हि शेषोपि। न समानतन्त्रदेशकालसौर्यादीनां पुनः
पृथक्कृतस्वफले विनियुक्तानां प्रयोगैकत्वं तन्त्रता वागमो नानाविधिवि
धेयत्वात्तेन तैरन्योन्यानपेक्षैरेव पदार्थैस्त्वेवमादिना कालः संबध्यते इ
ति नास्ति तन्त्रत्वं यद्वा चैवं प्रयोगवाक्यशेषत्वं कालादीनां तदंगानामपि त
त्कालत्वं सिद्ध्यति तथा हि साध्यसाधनांशयुक्तावगता भावना कथमि
तीच्छं भावना कथमितीच्छं भावनागतत्र्यरूपविशेषश्छं भावनः। प्रधा
नरूपा च भावना कालादीनपेक्षते। तेन प्रकारापेक्षया भावनायां तत्प्रका
रत्वेन प्रयाजादिष्ववगतेषु सामर्थ्यरूपेण भावनाकालो व्यापारे प्रयोगाप
रपर्याये वगते तच्छेषत्वेन कालादयो विधीयंत इत्यंगानामपि तदेवदे
शादयो भवंति। द्रव्यदेवतं पुनर्न समस्तप्रयोगसंबंधित्वेन विधीयते अ
नपेक्षितत्वादयोग्यत्वाच्चानन्यगम्यत्वाधानवद्धि स्तरणेन घनुरकस्य प्रयोगस्य
द्रव्यदेवतापेक्षा नापि तन्त्रप्यतो द्रव्यदेवतं समर्थं किं तु फलभावना
अवयवयागरूपनिष्पादने न द्रव्यदेवतमपेक्षितत्वादौंगत्वात्तत्र संबं
ध्यते। तस्मात्तत्प्रधानसंबंधिद्रव्यदेवतमंगानां भवति। कालादयस्त्वा

दे.प्र.प्रा
९९

नित्यादिकर्णिकयाफलसाधनया समग्ररूपया संबध्यमानानां तदङ्गा

नानामङ्गानामपि भवंति विशेषः। अतः सा घूर्के कर्मोपदेशात् इति

।एवं वैश्वदेवादिष्वपि प्रधानानामङ्गानां च देशे काले च तन्त्रोपदेशोऽङ्गे

षः। केचित्तु एवं व्याचक्ष्यते देशकालौ विरोधे कर्मादीनां सह स्वकारणो

नां परस्परं विरोधे सति देशकालौ बलवन्तौ। नान्यानि तु नः सह प्रयो

99

गस्य शक्यत्वादवगतत्वात्। कर्मसामान्याद्देशकालादि निजानथाहि एका

हिकचातुर्मास्यपुपर्वणोः कर्मभेदे दक्षिणोद्व्यभेदेऽपि देशकालैक्या

त्सहप्रयोगः। यथा च फलभेदे न कर्मभेदेऽपि समानतन्त्रे आग्नेयेनासरी तेषु

येऽपि सौर्यस्य दक्षिणाभेदेऽपि देशकालैक्याद् एवं सहप्रयोगः। तस्माद्विरो

धे देशकालावेव बलवंतौ। नो चेत् समानौ। न हि कर्मादिषु समानेष्वपि त

त्रैक्यं भवत्येवेति। अस्मिन्व्याख्याने न तु कर्मोपदेशाद्विरुद्धेन सूत्र पूर्व

वत्सूत्रं पूर्वपक्षमुपाध्याय पूर्वं देवं व्याख्येयं अथेदं चिंत्यते आग्रचूर्णोऽग्नी

तिषोमे सोमक्रयानन्तरकाले आतिथ्यानंतर उपसदंते च सुब्रह्मण्याह्वा

नं श्रूयते। तत्र चैवं निगदो भवति। इति हे सुत्यामागच्छ मघवन्निति नृपादि ९९

ति। इति करणेन च संख्योच्यते। अहे सुत्यामागच्छ द्वा। हे सुत्यामागच्छेते
त्येव ब्रूयादित्यर्थः। तदिदमप्रधानकालत्वाद्द्वादशाहे तंत्रं भवति। अप्रधा
नकालः। ८ समूहसंनिपातादिति वक्ष्यमाणन्यायात्। न हीदं प्रधानकालं उप
सत्कालेनु समूहनुसमूहनुष्ठितमेव सर्वेषामुपकरोती। तितंत्रमेव भवति।
सुत्याकालीनं तु प्रधानकालत्वात्प्रतिसुत्यमावर्तते। नन्वौपदातिथ्याक
यकालीने तंत्रेण क्रियमाणे सुब्रह्मण्याह्वाने संदेहः। किं सर्वेषामह्नां ग्र
ग्रकृदुपलक्षणं। द्वादशाहे त्रयोदशाहे इत्येवं। उत तंत्रेण द्वादशाह इत्ये
वं। तत्र पूर्वपक्षमाह अहर्गणे सुब्रह्मण्यायाः सर्वोपलक्षणं प्रकृतिवत्
अहर्गणे द्वादशाहादौ उपसत्कालीनायाः सुब्रह्मण्याया निगदे सर्वेषां सौ
त्यानामह्नामुपलक्षणं कर्तव्यं प्रकृतिवत्। यथा प्रकृतौ अहे सुत्यामित्य
तं। इह तु उपसदह्नां द्वादशसंख्यया विद्धद्वा द्वादश। इति वक्तव्यं। न तत्र प्र
कृतावेकं सौत्यमहः स तदुपलक्षितं। हे इंद्रालं अहे ततत्सुत्यां प्रत्यागच्छेति। इह
तु द्वादश सौत्यान्यहानि। तेनेहापि प्रकृतिवदेव तानि सर्वाण्युपलक्षणीया
नि। नवाहः। शब्देनागच्छमाणविशेषत्वात्सर्वोपलक्षणं सिद्ध्यतीति वाच्यं।

।संख्याशब्देन विशेषग्रहणान्न द्वादशाहे ऽभ्यागच्छेत्। न प्रथमस्यैव सोऽस्य
स्याङ्कुरुपलक्षणेन हि तृतीयादेः। तस्माद्द्वितीयसो ऽस्यस्यार्थे त्रयोदशाह इ
त्येवं प्रयोऽज्यन्तृतीयस्यार्थे चतुर्दशाह इत्येवं द्वादशार्थे त्रयोविंशाहे। सुत्या
मिति लिङ्गं सर्वेषां सोऽस्यानामुपलक्षणं प्राशस्त्यं न माह तत्र कालकर्मप्र
त्यहमविधानात्। तत्र स्याविभक्तिकोनिर्देशः। तत्र गौणस्यार्थे कालसंयुक्तं क
र्म कालकर्म। ततद्वादशाहे सुत्यामागच्छेत्येवं तत्र गौणत्वं सुत्याशब्दो द्वा
रगोणे नैव कर्त्तव्यं ननु प्रतिसुत्यं त्रयोदशाह इत्यादि नाहयत्सु सुत्याशब्दो
द्वारगोणे नाकुतः प्रत्यहमविधानात्। न ह्येवं विधानमस्ति यत्प्रत्यहं प्रति
सुत्यमुद्धारणे कार्यमिति। ननु प्रवृत्तिवद्धि कृतिः कर्त्तव्येति चोदकेन वि
धानं भविष्यति। प्रवृत्तावेवं सोऽस्य महत्तस्योपलक्षणत्वं वृत्तं चाह सुत्यामाग
च्छेदिति। अतः प्रवृत्तिवदेव विवृत्तावपि सर्वाणि सोऽस्यान्यहान्युपलक्षणी
यानीति। अत्रोच्यते। न हि प्रवृत्तौ सुत्योपलक्षणं किंचित्प्रयोजनं। न हि तयो
पलक्षितया किंचिद्दृष्टं प्रयोजनमस्ति। अतो दृष्टमेव वक्तव्यं। अतस्तु सु
त्यामागच्छमपवत्रिस्येवं सुत्यासंबंधिदेवतेन्द्रस्य स्मरणारूपसंस्कारमात्रं वि १००

वक्षितं। संख्याता होह शब्दश्चार्थसिद्धत्वाद्विवक्षितनिर्देशमात्रं। त
त्स्मरणमुपसत्कालो नाम द्रूमुच्चारणाद्या रेणानेनाहर्गणो येन केन
चिदाह्न व्यूतं स्मरणमिति नाहरन्तरप्रकाशनेनार्थः तच्चाप्रधानकाले
क्रियमाणे मनस्त्वमाणविज्ञापनात् सर्वार्थं भवति। तत्र च मुख्यत्वात्प्र
थमेनाह्नोपलक्षणमुचितं। तत्रापि यत्नाविशेषितम् दूंगणेन सकर्मका
लत्वाच्चागमाह्नामाणविशेषं सर्वेषामुपकरोति। तस्माद्दाद्यं तक्रयणीये
हनि द्वादशाहे सुत्यामागच्छेति वक्तव्यो। द्वितीये तु एकादशाह इति तृतीये
तु दशाह इत्येवं सर्वेषु हेमघवन्तेहइ इच्छावचना हन्तीति सत्ति सुत्यां प्रतिम
वतागन्तव्यमिति। एवमेतदिदं द्रष्टव्य सुत्यां प्रत्यामन्त्रणं। ननु चास्मिन्नमिप
क्षेऽहृद्दमेवमप्रयोजनं। दृष्टस्याभावात्। यतनइंद्र श्रामंत्रणं न शृणोति न
च श्रुत्वा सुत्यां प्रत्यागच्छति। देवतानां विग्रहवत्त्वस्य मीमांसकैरनंगीका
रात्। इंद्र शब्दस्यैवात्र देवतात्वात् न च शब्दस्यामंत्रणश्रवणमागमनं वा घट
ते। सत्यं। अनेन प्रकारेण यागएवस्तूयते। येन तत्साधनानि चेतनान्यपि
चेतनवत्संस्तूयंते। यथा श्रोतारो ग्रावाणः इति। न हि ग्रावाणः शृण्वंति।

तथा स्तुत्यर्थमेव मुक्तं तेन यथा तथाग्रणीर्नु देवः सविता हवं मे इति च।
एवमन्तागच्छन्तर्पी दृष्ट आगच्छन्तीव। अत एवेन्द्राग्निभ्यां विनाग्रणीर्नीवे
ति। ननु यागस्तु स्यात् किं प्रयोजनं तु च्यते। इष्टमेव यजमानस्यो ऽस्माहोत्रा
दनं स्तुत्योपलक्षणे पुनर्हूयस्य लेशोऽपि नास्तीति देवतास्मरणपक्षए
वश्रेयान्। अथैतद्विचार्यते। अग्नस्य दृष्ट्रेहेतिमैत्रावरुणदण्डे न समन्तेत्तिः प
र्युपत्ति। स्फ्येन प्रहृतैः परिलिखतीत्यस्येत्थम् खेतिस्त्रिरग्निं संमार्ष्टि इति
तत्र क्रियाहृतो सत्यां किं प्रतिक्रियं मन्त्रावृत्तिः उत न सकृदेव शर्वावृत्तिरिति। त
त्र क्रियायाः प्रधानत्वान्मन्त्रस्य तदङ्गत्वात्प्रधानभूतायाः क्रियाया आ
वृत्तौ सत्यां मन्त्रस्याप्यावृत्तिप्राप्तौ सिद्धान्तमाह एकद्रव्ये कर्मावृत्तौ सकृन्मं
त्रवचनं कृतत्वात्। एकस्मिन् द्रव्ये यावत्पदार्थन्यायादेकैककर्मावृत्तेः
क्रियाया आवृत्तावभ्यासेन सकृदेकवारमेवादौ मन्त्रवचनं मन्त्रपठ
नं कार्यं। न प्रतिक्रियं। कुतः कृतत्वात्। मन्त्रेण प्रकृतकर्मव्यंपदार्थस्मार
णं तस्य कृतत्वात्। अपि च यत्स्तुतस्त्वत्र क्रियाभेद एव नास्ति। किं तर्हि साभ्या
स एवैकैव क्रिया। तस्मादादौ च मन्त्रवचनमुक्तं। तेन सर्वावृत्तीनामा १०१

दर्विवत्कर्तव्यं। अथ येदं चिंत्यते दर्शपूर्णमासयोः आयने। चतुरो मुष्टीन्निर्व
पतीति। अमुष्टोमुष्टीं नाति। त्रिर्धानुपंच धामनुवाके दिस ण्गोति चतुर्जुहुया दि
माज्यं गृह्णातीति च। तत्र च मंत्राः देवस्य त्वेति बर्हिर्देवसदनं संदामीति
ऊर्णम्रदसं त्वा स्तृणामीति। धामनामासीत्येति चानेकस्य सूक्तयोः त्ववाः उ
तनिर्वापे लवने च प्रतिमुष्टि स्तरणे प्रति धानु। आज्यग्रहणे प्रति स्रुवं मेदे
नेति संज्ञाये ससंख्यानामेककर्मत्वात्पूर्वाधिकरणन्याये च तदारं मे
मंत्राणां सकृत्प्रयोगे प्राप्ते सिद्धांतमाह नग्रहणे लवणे स्तरणे ज्यग्रह
णे तु शब्दाववधारणे। हविर्ग्रहणे। हविर्ग्रहणे बर्हिषो लवने बर्हिस्त
रणे आज्यग्रहणे चैवमेव सकृन्मंत्रवचनं। किंतु हविर्ग्रहणे। बर्हिषो लवने
च प्रतिमुष्टि मंत्रप्रयोगः पृथक् कार्यः। बर्हिषः स्तरणे च प्रति धानु। आ
ज्यग्रहणे च प्रतिस्रुवमिति यत्कारणं मंत्रकृतत्वं नास्ति ग्रहणादिषु।
ग्रहणे तावदन्य एव ग्राहयः प्रतिमुष्टि निरूप्यंते। लवनेऽवाप्यस्य एव दर्भाः
प्रतिमुष्टि लूयंते। बर्हिस्तरणे च प्रति धानु अन्यदेव स्तीर्यते। आज्यग्रहे
च प्रतिस्रुवमन्यदेवाज्यं गृह्यते इति तेन यत्रैव मंत्रः प्रयुक्तस्तत्रैव कृतसं

दे॰ पश्री
१०२

स्कारलोमो जातः। अतः सर्वेषांतत्संस्कारना माय मुष्याद्विषु मेदेनैव मंत्र
प्रयोगोनमच्चादितियद्युच्येतः यदा यौनिर्वापादि : न याषि प्रसभ्यासे स्का स
रभेदो विद्यते। मन्त्रवना निर्वापेणैव द्रव्यसंस्क नेष्वां। स्नतो यस्मिन्नेवमु होमं त्मु
अतेन त स्येव मंत्र चूतेन संस्कारेणे होनं स्यात। कार्य प्रयुक्तो हि संस्कारेण न
क्रियाचे स्रू प युक्तः कार्यं चान्नभिन्नं नस्मा। अतिमुष्मिं ग्राह्य ति रिति। एवं च
व नसत्तरणेऽस्मग्रहणे षष्पिद्वेषं वचनात्‌दृ। स्रो। ग्राज्येइत्या ज्यग्रहणे हि नी
यादिग्रहणेषु चतुर्थी हि ग्रहणेषु वचनं मंत्र निहानिर्भवति। सर्णेनयु
जुषा सच्चनु ह्वांग ह्वानिस्त्र स्मीमेने नेव यजुषा सच्चद पग्नि ग ह्वानि
सच्चतुसत्र होमेते नेव यजुषा सन्त्रुद्भवा याग ह्वातित्र स्मामित्येवं
पक्षमभिधाय पक्षांरम ग्याहतदाहुस्त्रि स्त्रिरे वयजुषा ग ह्वीयास्त्रि ह्वि
यज्ञ इति पुनरपि प्रथमं पक्ष मुपसंहरति मदृसहनसचुसदेवा स्नत्रो तो
वत्रिर्ग हीत ६ संपद्यतइति मुष्टौ चो त्तमोह वि ग्रहणे ऽत्र मे चतुर्थे मुष्टोच
कारणं त्वना देव मंत्र निहतिः स्रूपनेहि शाखांतरे चतुर्थे स्मीमिति। ङ्मो स्त
ति होमे स्वसा ये मंत्रः स्नतेल ९ सुजाग ह्वीति। नयानदीनरणे। उदकं चैत्र १०२

रेतद्दृष्टिमंत्रयेनोद्दनीर्बलं घनेनितथा च वर्षणे त्सुप्तमेवोद्दितीशितिमं
त्रो वद्दष्ट्रस्त्रेत्स्फुरत्वात् । अमेध्यदर्शने स्वप्ने पद्धानमंत्रः । अवद्दूं मनइ
तिति यथा दीक्षितस्य वनीवाहने प्रयाणमंत्रः प्रेदग्ने ज्योतिष्मानिति । तत्र संश
यः यदा दीक्षितः प्रबुद्धः पुनः स्वपिति । अनेकशो न संवानदीनरनिसंततम
भिदृश्यते युगपच्चानेकानि अमेध्यानि पश्यति पुनः पुनः विश्रम्य प्रपा
ति चा तदा किमेषां मंत्राणामावृत्तिः उत सकृत्स्य योग इति तत्र निद्राम ध्ये
प्रबोधेरत्ये व्यवधीयते तदा षष्ठ्यस्वाने पुनः स्वापैः द्विप्रविच्छेदैः ।
अमेध्यानिर्विच्छेदैः । प्रयाणं विश्रामैः । तदा एतेरंतराये निमित्तेषु विद्य
मानेषु विशेषग्रहणात् नैमित्तिका मंत्रा आवर्तनीया इति प्राप्ते सिद्धांत
माह स्वप्ननदीतरणाववर्षणामेध्यदर्शनप्रयाणेषु नु सकृत्कालद्वयै
कार्थत्वात् अत्र च योहेनवः कालैकत्वात् द्रव्यैकत्वात् अर्थैकत्वादिति
तत्र यथासंभवं विभागात् तत्र पुनः स्वप्ने एकार्थत्वात् सर्वरात्रिगतानां कृ
त्स्नां निद्रामुद्दिश्य मंत्राभिधानादेकमेव निमित्तं अतः सकृदेव मंत्रप्रयो
गः । केचिद्दीक्षितो मनोज्ञं ह्रु स्वप्नं दृष्ट्वा जपेदिति स्वप्ने तदुदाहरंति । तत्र युगप

दे॰प्रश्नो
२०३

103

दनेकस्य प्रदर्शने कालैकत्वात्सकृन्मंत्रवचनमिति व्याचक्षते चान तथा
नद्यांहि स्थिंच चतुर्णामेवाभिसंधायमंत्रं प्रयुंक्ते। न चावांतरनिद्रां नाप्येकं तो
नः। नाप्येकां वर्षधारां। तस्मात्सकृत्प्रयोगः। तत्र नदीसंतरणे स्नानसांभेदे
पि नदीद्रव्यस्यैकत्वात्सकृन्मंत्रः। अववर्षणेऽवर्षणे कालैकत्वात्। अमे
ध्यदर्शनेपि कालैकत्वाद्देवप्रयाणे प्यासमीहितप्रासरेकं प्रयाणमिति त
दर्थस्य मंत्रस्य सकृदेव प्रयोगः। एकार्थत्वात्। अथ यत्र कालभेदेन पुन
स्तदेव निमित्तमापतति। तत्रापि सकृन्मंत्रवचनमुत भेदेनेति। अभिहि
तमेव तद्दिति कृत्वा सकृन्मंत्रवचने प्राप्ते आह नैमित्तभेदात्। कालांतरे
पुनरेषु निमित्तेषु जातेषु पुनर्मंत्रवचनं कर्तव्यं। न पूर्वाभिहितेन मंत्रेण
कार्यसिद्धिः। भिद्यते ह्यत्र निमित्तं ननु भेदाच्च नैमित्तिकस्यावृत्तिर्भवत्येव
अप्रधानकाल इ॰ सकृदसंनिपातात् वसंते ब्राह्मणोऽग्नीनादधीत स्वना
रम्भाधीनमथाधानं अग्निहोत्रादीनामंगमिति कृत्वा चिंत्यते। किमंगस
हाधानं प्रतिकर्म प्रतिप्रयोगं च भेदेन कर्तव्यमुत सर्वप्रयोगाणां साधा
रणं सकृदिति तत्र कर्माङ्गत्वे प्रयाजाज्यावागवत्प्रतिकर्म भेदेन कर्तव्यं। २०३

त्वेन च बहिः कालत्वेनागत्यमाणविशेषणाय ग्रहणानंतरं क्रियते तत्त
दर्थमित्यानंतर्येण विशेषणग्रहणात्। तस्मात्स्मृति कर्मभेदेनाधानमा
त्मविदमुच्यते। अप्रधानकालं यदंगं आधानं सदर्शनं तत्स्मृदेवकर्त
व्यं। न भेदेन कर्मणः कर्मणः प्राधान्यतः अवसंनिपातात्। न चैतत्त्वस्याचित्क
र्मणः प्रकृतमेव कर्म मध्ये वा संनिपतितं येन विशेषणग्रहणं स्यात्। किंतु प्र
देववित् विदग्निकार्यं निमित्तवशात्कामवशाद्वा प्रयाकामं प्राप्तं तदर्थ
माधास्याग्नीनिति। न तु कंचिद्देवकर्मविशेषमभिसंधायाधानं। एवमन
भिसंहितकर्मविशेषणसर्वोद्देशेनाधाने कृते यद्यपि कारणवशात् किंचि
त्कर्म प्रथममापतति तत्रापि न तादर्थ्यमेव भवति। प्रथमावस्थाया
मेव सर्वार्थत्वावधारणात्। तस्मादप्रधानकालीनत्वात् स्मृत्येव कार्यं
पूर्वः अप्रधानकालं सकृदित्यनुवर्तते। ज्योतिष्टोमे अग्निष्टोमभियोपूर्प बो
उपदिष्टः। सवनीयानुबंध्ययोस्त्वतिदिष्टः। स किं त्रयाणामपि यूपानां
तंत्रेण उत प्रतियूपभेदेन यूपस्तुत्यादनीय इति। तत्र मुख्यत्वादग्नीषो
मीयार्थस्यैव यूपस्यापकर्षो दीक्षासु प्रतिपत्तिः नतीतानेतरयोः। तानत्वयोः

दे॰ प्रश्रा
१०४
र॰५
104/105

स्वकाले भेदेनोत्पादनीयो यूप इति प्राप्ते सिद्धान्तस्तु च्यते। यूपो ह्यग्न्याधे
यवत्प्रधानकालत्वान्नीयमानां पशूनां साधारणः स्व॰ चूडेवोत्स्यादेक एक
स्मिन्नेन प्रतिपशुभेदेन न हि मुख्यत्वमात्रेण श्रुतेः संकोचोऽन्तोऽविशेषात्स
र्वयूपापकर्षे सत्प्रधानकालत्वाद्गृह्यमाणे विशेषोपस्थापनाणां एक
एक एव साधारणो भवति। अग्नीषोमीयपशुके क्रियमाण आपिप्रोक्षणा
द्यः संस्कारा यूपस्तूरस्वात्तस्य च साधारणत्वात्ते पितृत्रेणैव भवन्तितः प्रति
पश्वावर्तते स्वरुश्चसर्वॄ॰ स्त्वावचनात्। यूपस्य स्वरुं करोतीति स्वरुः किमे
कयूपानां पशूनां तंत्रेणोत प्रतिपशुभिद्यत इति संदेहे अंजनकाले स्व
स्योपादानात्तदपवर्गेऽस्यापवर्गात्तदंजनानन्तरे व्यशकले पादानाद्यः प्रथमः
शकलः स स्वरुरिति एकस्मिन्प्रहरणे यः प्रथम इति शास्त्रार्थः। तेनैक
स्मिंश्च यूपे प्रहरणानां बहुत्वात्संभवंति बहवः प्रथमाः शकलाः। तेन
भेदं प्राप्तोसिद्धान्तस्तु च्यते। स्वरुरपि तन्त्रपाणां पशूनामग्नीषोमीयसवनी
यानुबंध्यानां साधारण एव न प्रतिपशु भिद्यते। कुतः सर्वॄ॰ स्त्वावचना
त् संख्यावचनं न हि भवति स्वरुहोमेन यूपः संनिष्ठत इत्यादि च प्रथममे १०४

यू

व[illegible]पे न यूप एव साधारणो न भवेत् नन्विष्टे तेश्वात्तस्मादेव यूपात्स्वरो
र्निर्हृते श्वनिष्वते श्वात्तस्य यः प्रथमः शकलः पातयते सः स्वरुः कार्य इ
ति। अतोपि साधारणोऽवात्तत्प्रहरणस्यानुपात्तत्वाच्छकलशेषोपात्तो
नां सर्वेषां शकलानां यः प्रथमः स उपादेयः। तेनैकस्मिन्यूप एक एव प्रथम
शकल इति सोपि एकयूपानां सर्वेषां पशूनां यूपवत्साधारण एव स्यात्
। अपि च केदृक्तत्काल एव मामोह इति ह्यस्य येनत्वात्त्रणाय हारपरिहाराय वावस्य
मुपात्तापरक्षितत्वः। शकल इत्य प्रत्यघमाणे विशेषत्वादपि साधारण एव
। अथ यद्दर्शपूर्णमासादिषु फलदक्षिणावसुकर्मसु चिंत्यते। किं यजमाने
नैव सर्वं कर्तव्यं उत तद्द्रव्योत्सर्गदक्षिणादानादिके यजमाननियमोन्यत्रा
नियमो यजमानो वान्यो वा। अथ यद्योत्सर्ग एव यजमानोन्यत्रान्य एवेति।
किं प्राप्तं। सर्वं यजमानेनैव कर्तव्यमिति। कुतः प्रयोगवचनात्स्वं ह्यात्मनेप
दं सांगमां भावनायां फलार्थिनं कर्तृत्वेन विनियुंक्ते सा यत्रैव कर्ता न स्यात्त
त्र तमेवोपकारं न प्राप्नुयात्। तस्मात्सांगं स्वयं कुर्यादिति। फलस्य चोत्सय
माने सोक्ष्याद्दापि च तेन प्रयोक्ता यजमान एवोच्यते। होत्रादिसमाख्याश्च

दे. प्रश्री ... वतस्यैव तत्तत्कुर्वाणस्यैकस्य वा कर्मभेदादित्यनेन न्यायेन संभविष्यं
१०६ तीति। तस्मात्सर्वं यजमानेनैव कर्तव्यं इति प्राप्ते आह कर्मणि पुरुषाणां दर्शपूर्णमासा
दिकर्मणि पुरुषाणां होत्रध्वर्य्वादीनां कर्तृत्वं भवति न त्वयं यजमानस्यानुतः
परिक्रयाम्नानात्। श्रूयते हि परिक्रयः। दर्शपूर्णमासयोर्हौत्रे वेषाह दक्षिणा
यदन्वाहार्यमिति ज्योतिष्टोमे च तत्र १२ शतेनैव दिक्षयतीति। स्वभावतश्च
106 परिक्रयः परत्र क्रियते। नात्मनि। विरोधात्। न च स्वात्मैवात्मानं परिक्रीणी
ते। न च यदि स्वयमेव यजमानं कुर्यात् ततः परिक्रयासंभवेन परिक्रयो न
क्रियेत तत्रास्य नित्यवदाम्नानं विरुध्येत। यत्रार्थिनः सांगकर्तृत्वं न तु प्रयो
जकत्वे नापि संभवति। न चास्ति परं प्रमाणे साक्षादेव कर्तृत्वं स्यात्। अ
स्ति तु प्रमाणं परिक्रयवचनं। न च कर्तृत्वसम्भाव एव दृष्टार्थं भवति नान्य
था। तस्मात्प्रयोजकत्वे नापि कर्तृत्वं संभवेत्तत्र परिक्रयस्य नित्यवदाम्नात
स्य पाक्षिकत्वायोगात् नित्यमुपसंहर्तुमन्येषां पुरुषाणामेव कर्मणि कर्तृ
त्वं सिद्धं। एवं सर्वत्रापि पुरुषाणामेव कर्तृत्वे प्राप्ते आह प्रधानं स्वामी फ
लयोगात्। यस्य प्रधानं द्रव्योत्सर्गरूपं हविस्त्यागदक्षिणादानात्मकं त १०६

स्वामी यजमानः करोति अन्यानि चाङ्गानि पुरुषाः कुर्वन्ति। ननु एतत्
फलयोगात्। प्रधानानुष्ठात्रिणो हि फलयोगो भवति। प्रधानफलं च
यजमानो ऽनुभुङ्क्ते नाङ्गफलं तस्य कर्तृत्वात्। तेन प्रधानमात्र एवाविनोधा-
तोः परेण प्रत्ययेन तन्मात्रस्यैव फलार्थिकर्तृत्वं नियम्यते शेषस्यानिर्दि-
ष्टिमात्रं प्रतीयते नानकर्तृविशेषः। ननु च प्रधानसमकर्तृकत्वादङ्गानाम-
पि सति कर्तृत्वे स्यादिति नन्तत्प्रयोजनकत्वेनापि कर्तृत्वानुग्रहात्। प्रत्यो-
त्सर्गे ह्युत्क्रियमाणे न किञ्चिद्यजमानेन कृतं स्यादिति तं करोति। तत्यास-
नेपदेन तत्फलार्थिकर्तृत्वं गम्यते। किं तर्हि भावनाक्षिप्तं सकर्तृत्वस्य सत्त्व फल-
संबन्धित्वं। अतश्च फले न कर्तुरन्यत्र नगत्वं। ननु फलार्थिनोऽन्येन व्या-
पारकरणं विरुध्यते। तावता च सिद्धो गेष्ठ नियम इति। अतोऽङ्गेष्वन्यक-
र्तृत्वं प्रधानमात्रे च स्वामिकर्तृत्वमिति। अन्येष्वपि कर्मसु कुर्वत्सु यजमानेन
फलेन च कृताकृतमपत्यवेक्षणं कर्तव्यमेव। अन्यथार्त्विजः कर्मकरत्वा-
त्प्रमादेन सर्वकर्म सावधानतया यथाश्रुतं न कुर्वन्ति। वैगुण्ये पतितेषां
स्वार्थविनाशाभावात्। तदुक्तं महाचार्यैः यद्येवाध्वर्युणा पदार्थाः कर्तव्यास्तथैव

x यजमानेनाप्रमाणार्थं प्रसवेक्षितव्या x २

दे॰ प्रश्नौ २ इति किमेतावद्देवस्यानीकरोतीति स्वाह — पुरुषयोगिमंत्रसंस्कारयोगस्या
१०७ गेसाम्यर्थ्यात्। पुरुषयोगियो मंत्रः तन्नेपाश्मगे स्थितत्वं मे पाहीत्यादिकः
प्रत्यगाशीर्युक्तः संस्कारश्च पावनशुद्धनाधः शयनपयोप्रमादिरूपः। तयोः
पुरुषयोगिमंत्रसंस्कारयोरन्यागेलक्षणयास्याम कर्तरि यजमानेधिकारः
इहाधिकरणमन्त्राः प्रयागाशिषो मन्त्रउदाहरणं। निचयमाख्यया अध्वर्योः
प्राप्नुवंतिनत्वात्। कर्मफलमनाशास्यनर्त्विक्फलं। अतः कर्तृत्वप्रसं
गात्। यजमानस्य फलं दक्षिणालाभासंकं प्रार्थनीयं नांगे। कर्मफलं च यज
मानगामितत्वात् प्रत्यगात्मविषयत्वे न प्रार्थनत्वं इति लिंगात्समाख्यां बाधि
त्वा यजमान एव प्रयुजीत यतः स एवाशिषः प्रार्थनेकर्तुं समर्थो नान्यः संस्का
रश्च केवलं प्रधानार्थो नो ऋत्विक्त्वांशपातिनश्चानत्वं गप्रधानार्थाः कर्तृत्वां
शपातिनोवा। तेनुनादशं संस्कारं यजमाने कुर्वन्ति। येन यजमानेन प्रधा
नेस्वं फलं जनयितुं समर्थो भवति। तेन क्षेत्रसंस्काराणां यथा बीजवपनार्थ
ना त्वां एवं प्रधार्थत्वं संस्काराणां। नांगार्थत्वां प्रधानफलं हि यजमानो भुंक्ते
नांगफलं तस्य कर्तृत्वात्। अतो नो कृत्वांशस्ताः संतो यस्येव फलं भुंक्ते १०७

तस्यैवोपकारकाङ्गमिति प्रधानार्थता। प्रयोजनमग्नीषोमीयपविकारस्वना
म्यंजनादि यजमानसंस्कारणं अप्रवृत्तिः ब्रह्मचर्यं ब्रह्मस्नाह्ननेरूवस्पत
प सोपि दुःखात्मकत्वान्न दुःखफलं कार्यविरोधिनमधर्मं क्षपयितुं योग्य
तास्तीति नतु प्रतिबंधकपापक्षपणेनैवास्यक्रत्वर्थत्वं लिङ्गप्रकरणा
भ्यामवगम्यते। यजमाने च फले तो स्नातव्यं अनेनोस्यापि फलि संस्कारत्वा
द्याजमानत्वं वचनादन्यत्र वचनाच्चान्यदुक्तव्यतिरिक्तमपि यजमान
स्य भवति प्रधानयोगि मंत्रसंस्कारेभ्योऽन्यदर्पसर्यः। तद्यथा यजमानो वे
दं करोति यजमान आज्यमपेक्षते यजमान उखां करोतीत्यादिव
चनादृत्विजामपि संस्कारणं भवंति हिरण्यमालिनो वाजपेये न चरंतीति
लोहितोष्णीषाः प्रचरंतीति। शेषमितरे यथास्वं। यावद्यजमानस्योक्तं नैव
मुक्तं प्रधानं स्वामी स्यादिनावचनादन्यदित्यंतेन। ततः शेषं अवशिष्टं
कर्म इतरेभ्योपि व्यतिरिक्ता होत्राध्वर्य्वादयो यथास्वं नुर्वंति। आख्या स
अनतिक्रम्य पावत्य आख्याः तावतीनामनतिक्रमो यथास्वं। तद्यथा हो
ता होत्रं उद्गातोद्गात्रं। अध्वर्युराध्वर्यवं ब्रह्मा ब्रह्मत्वमिति समाख्ययैव

दे मप्रश्री
१०८

108

तेषां विनियोगः । तत्र मायाकृतपंचवित्तांवकर्मणि पुरुषाणां मितत्वमेतेनान्येषां
पुरुषाणां कर्तृत्वे सिद्धे विकृतितेन्म इति संशयेत्सजितिविशेषणमायाद्दृनिय
मः प्राप्नोतिसर्वेयापरिक्रयसिद्धेः । अथ यथात्मनेपदात्सृज्यमाने स्वेव सर्वत्र
कर्तृलेप्राप्ते परिक्रयवशाद्न्योपादानेस चेकेनापि सिद्धान्तो स्वेक एवात्म
: स्यात् । अत्रव्यधिदिं संज्ञानुकर्मनिमित्तादेकस्यापिपाचकत्वावकवस्
विषयंतीति अनेन नसत्त्वेणपथाख्येयावसंज्ञंकर्तृभेदहेतु अतः कर्मनिमित्ता
एताः संज्ञाः सत्वास्यः पदिप्रवृत्तिसमयेनदुत्तरकाले वाएता अपेरना । वर
णांव प्रवृत्ताप्यर्थेन । तत्रेताः श्रूयंते ब्रह्माणं ब्रह्मणो तेउद्गातारं ब्रह्मणो ने होता
रं ब्रह्मणीते अध्वर्युं ब्रह्मणाने एवमुन्नेतारं वृणीतइत्यत्र । नचतदाकर्मनि
मित्तत्वं संभवति । निवरणानिमित्तत्वं । भिन्नानि च वरणानि नचैकस्मिन्नेकृ व
निवरणानि युज्यंते दृष्टार्थत्वात्तान्नहि ह्यत्तस्य वरणं दृष्टार्थे तेन वरणानां तन्नि
मित्तसंज्ञानां वासीकोणविषयत्वात्प्रावृत्तरणां पायन्संज्ञं च कर्तृभेदः कर्मा
गं । अतो यस्मिन्कर्मणि यावत्यः संज्ञाः तावन्तः संख्येः कर्तृभिस्तत्कर्मकर्तव्यं
। अत्र तत्र चातुर्मास्ये दर्शपूर्णमासेः । षड्भिः पशुबंधः पंचभिः श्चातुर्मास्यानि १०८

बोऽद्गुभिद्योनिर्होमइति यथाख्येमित्यनेन सिद्धं।तेन न पुनरुक्तता
।न तु किमिदं वरणं।ऽउक्तं अत्राप्यवृत्तस्य प्रार्थनमिति।तत्रैवमहर्त्विज्यं होतृ
काणां च मन्त्रेणाभ्यग्निर्मे होता त्वं मानुषस्त्वा॰दिना।लौकिकया वाचा च॰अ
ध्वर्युर्मे भवानस्त्वित्यादिकया।किमनेनावृता होत्रादित्वं भवति।को दोषः
।नह्यावृताः संज्ञा प्राग्वरणं तावरणोत्तरकाले च य एवं वृतः स्वयं चैवमैसानी न
ति मनसा संकल्पयति न त्व होत्रादिसंज्ञाः प्रसिद्धवद्दे याज्ञिकप्रयोगे व्यव
ह्रियमाणा दृश्यन्ते।तस्माद्य एवं वृत एवं च संकल्पयति स एव होत्रादिसमा
ख्यां लभते।सत्रेषु वरणार्थस्याहरणस्याप्यलोपान्नित्ययतिः तदभावे चाध्व
र्युर्गृहपतिं दीक्षयित्वेत्यादिव्यवहारदर्शनात् संकल्पादेव होत्रादित्वसि
द्धिः।प्रकृतावपि संकल्पो निमित्तमेव यो हि द्रियमाणो नेच्छति न स होतेत्यु
च्यते।तस्मात् प्रकृतौ वरणाभिधानात्तन्निमित्ताः संकल्पो निमित्तं।सत्रेषु तु सं
कल्पमात्रं प्रयोगदर्शनान्नैवं वैरूप्याद् शोभनं मन्येम न प्रमाणबलाद्
दृश्यते वशोभनत्वात्।न हि सत्रे होत्रादिशब्दानां गौणत्वे किं चित्प्रमाणम
स्ति।अथाप्यस्तं तन्नमेकरूपेणकार्यं न ततः संकल्प एव निमित्तं।स एव क्रतु

दे॰प्रभ्री १०९ 109

प्रक्रमेमेन दैपपिकं होत्राग्निभावमात्मानः संकल्प्य यनिमत्वहोत्राग्नि
त्राग्नेरुच्यते। अथावर्त्तते सर्वस्याहवनमन्त्रावर्त्त इति। अयत्नोऽसर्ववेदिमुपा
वर्त्तते। अहम् अहरणप्रतिगरहोमेषु चतुष्वपि समेवमादौपत्राह्नि: आव
र्त्तनं आवमणं स्मर्यते। तत्राहुनो प्रदक्षिणमावर्त्तनं कर्त्तव्यं। यानि च परिस्तर
णपर्युक्षणाचिस्त्वरिषेकपदपरिलेखपिंडपरिलेखनानि समंततः सर्वतः
सर्वेषु पूर्वदक्षिणपश्चिमोत्तरपार्श्वे विधीयंते तेतानि सामंतशब्देनाग्नेर्यं
तेन तेषु सामंतेषु च प्रदक्षिणं तत्परिस्तरणादिकं भवति पूर्वेन अग्नेर्भ्यो द
क्षिणं तन्त्रानतदेवपुरश्चरणं यएषजपतिसएतस्यैवाहवनाचरणं हंगृही
त्वेन स्यैवाहवनमन्त्रावर्त्ते तेतिनया। अयावर्त्तते सर्वस्याहवनमन्त्रावर्त्त इति
तदेतां गतिमेतां प्रतिष्ठां गत्वेतस्यैवाहवनमन्त्रावर्त्त इति स्यैवमादौ सर्वत्र स
र्यावर्त्तनवत्प्रदक्षिणावर्त्तनमवगणन। अथप्रदक्षिणान्वाहूनन्यावर्त्तत इ
ति चा विपर्यस्यपि अपि तु सत्सु दक्षिणाचाऽउशब्दोऽनेदे। पूर्वे प्रतिपादिता
न्देदमाह पित्र्ये पि त्रदेवत्ये पि तृयज्ञादिकर्मसु विपर्यस्य पूर्वोक्तविप
र्यासेन सर्वं भवति। यज्ञोपवीतिनः कर्मनुपूरिस्फजेपि ग्यं नु प्राचीनावी १०९

तितः स्नातापसव्याः संतः कुर्वंति दक्षिणास्कंधं धृतयज्ञोपवीतिना
इत्यर्थः। तथाचोक्तं प्राचीनावीतं पित्र्याणीति। पश्चपरिस्तरणार्थेनेना
दिप्रदक्षिणमुक्तं तत्पित्र्ये अप्रदक्षिणं भवति। यद्देवेभ्यस्स्वरूपं क्रिय
ते परिसमूहनोपलेपनोल्लेखनोद्धरणाभ्युक्षणादिकं तद्दक्षिणसंस्थं क
र्तव्यं भवति। यच्च दैवे दिग्द्वयमुक्तं प्राच्युदग्वेति तत्र विपर्यासेन दक्षिणा
प्रतीची चेति द्वयं प्राप्नोति तत्राह दक्षिणा त्वेति। पित्र्ये कर्मणि दिगेकैव
दक्षिणेति। तेन सर्वे पिंडदानावनेजनोल्लेखनाकरणपात्रासादनादिकं
दक्षिणासंस्थं दक्षिणाभिमुखेन च कर्तव्यं। एषा वेदिकिच न्दणमिति या
दक्षिणा दिक् सा पितृणामिति निश्चितः। प्रधानद्रव्यव्यापत्तौ सांगावृ
त्तिस्तद्देशात्। प्रधानं यागं तत्साधनभूतं द्रव्यं पुरोडाशं चरुधानापयो
दधिपश्वादि तस्य व्यापत्तौ विनाशे सांगावृत्तिः। उक्तं प्रधानद्रव्यव्या
पत्तौ सांगस्य संनिपत्योपकारकांगैः सहितस्यावृत्तिः पुनः करणं भवति
। कुतः तद्देशात्। तस्य द्रव्यस्य संस्करणार्थमेव निष्पादनार्थमेव तेषां
मंगानां प्रादेशात् तु उपदेशात्। पुरोडाशादिनिष्पत्त्यर्थमेव हि निर्वपणो

दे॰ मश्री
२२०

110

प्रोक्षणावघातपेषणसंपवनश्रपणादीन्यादृष्टानि विहितानि। ननु
क्रमापसंबेनायज्ञप्रचृद्देवं नेह विप्राप द्येतान्यद्धविः संस्कारस्यापच्छेदे
वतायाइति। इदं श्रूयते। व्रीहिभिर्यजेतेति। तत्र सर्वोपसंहारप्रयोगवच
नानुग्रहायाष्टदोषदुष्टविकल्पपरिहाराय चोभाभ्यां व्रीहियवाभ्यांस
मुच्चयेन यागः कर्तव्यः। संभवति च सोमयागस्येव प्रधानस्यापि या
गस्याभ्यासमाश्रित्य समुच्चयमित्येवंविक्रियतेति। उतविकल्पव्रीहिभि
र्वा यवैर्वेति। तत्र पूर्वपक्षमाह ७ गुणानामेकार्थानां॰ सर्वारंभः श्रो
दितत्वात्। एकोऽर्थः प्रयोजनं कार्यं येषां ते एकार्थाः। एकपुरोडाशनिष्प
त्त्यर्था व्रीहियवादयः तेषामेकार्थानां गुणानां पुरोडाशद्रव्याणां व्रीहि
यवानां सर्वारंभः कर्तव्यः। सर्वैर्व्रीहियवादिभिस्तत्कार्यं पुरोडाशादि
कं निष्पाद्य यागः साधनीय इति। नु एतत्। चोदितत्वात्। यजेतेत्येवमु
भयोर्यागसाधनत्वेन चोदितत्वात्। यागसाधनत्वं च यागसाधनभूतपु
रोडाशप्रकृतिद्रव्यत्वेन। अत उभयोर्यागसाधनत्वेन चोदितत्वादेकयो
गेन क्रियतेति तेषां विधानं व्यर्थमेव स्यात्। तस्माद्व्रीहिर्यवैश्च पुरोडा २२०

भि

श्रोतनिष्पादनीय इत्येवं प्राप्ते ऽऽह न चूर्णत्वात्। एतदुक्तं सर्वारंभः स
वैतत्कर्मानुष्ठेयं इति तन्नानुतः चूर्णेनैकेनैव पुरोडाशस्य कार्यस्य
चूर्णत्वात् द्वितीयोपादानं व्यर्थमेव स्यात्। सर्वारंभो हि मिश्राभ्याम
मिश्राभ्यां वा यागाहृत्स्यान्नतावन्मिश्राभ्यां मिश्रेण हि द्रव्यांतरापत्त्यो
क्त्याप्यपि साधनत्वाभावात् न च यागाहृतिर्यागस्य चूर्णत्वात्। अना
रभ्यत्वात्। अस्यार्थस्यानारभ्यत्वात् नैवारंभणीयो यमययद्गुणभू
तस्य द्रव्यस्यानुरोधेन प्रधानभूतस्य यागस्याहतिः तस्माद्द्विकस्यैव
नमुसद्भयः दर्शनाच्च। व्रीहियवयोर्विकल्पो भवतीत्ययमर्थः श्रुतौ द
श्यते चाह। शिरःहृयनं मचूर्णस्य श्रूयते। वर्षेह्वैतुप्ताह्योवैतै यदि व्रीहयो य
दि यवा इति। ज्योतिष्टोमे हि द्रव्यदेवतासंयोगानामष्टानाम पर्यायवि
धानात्प्रकरणे न पुनः पठनेह गणात्सर्वे संपादनाय पुत्कं यदभ्यस्यते न व्रीहिय
वो हु द्वाभ्यां वा कृताभ्यामन्यान्यनिरपेक्षौ यागद्रव्यपुरोडाशप्रकृतित्वावि
धीयमानौ न द्वारेण प्रयोगवचनो गृह्णन्त्यपर्यायेणोवगत्य हृत्वा नित न पुनः। येन गप
बालात्मधानाभ्यासः स्यात्। ज्योतिष्टोमवत्। मिश्रत्वमपि निरपेक्ष

दे·पा·श्री
१११

विधानादप्युक्तमेवासमुच्चितस्य यजेतापि वाक्याददृष्टमपि बाधितं स्या
त्। दृष्टाभ्यामपि वाक्याभ्यां दृष्टयोरपि निरपेक्षयोः प्रवृत्तित्वेन विधानात्त
दुल्लेनदृष्टान्तरनिवृत्तिप्रतीतेः। तस्माद्विकल्पः। ततो व्रीहिप्रयोगेनैरे
वकार्यसिद्धेर्न यवानामुपादानं। प्रथायां पुनरङ्गैः कार्यसिद्धेः पौरोडाशि
कानां मन्त्राणामानर्थक्यमिति चेत्। न। नु व्रीहियवयोर्विकल्पे सत्यन्यतरस्मि
न्नानर्थक्यं भविष्यतीति चेदत्र पयसि। तत्रोत्तरमाह कालान्तरेऽर्थवत्त्व
ं स्यात्। कालान्तरे हि नीयमाना अपि मन्त्रेरर्थवत्त्वं सार्थकत्वं भवति। अ
तो व्यवस्थितविकल्पोऽयं। तथा च शाखान्तरे पठ्यते। व्रीहिभिरिष्ट्वा व्रीहि
भिर्यजेत यवेभ्यो यवैरिष्ट्वा यवैर्यजेत व्रीहिभ्यो दर्शपूर्णमासाविति।
अतो व्रीह्याग्रयणानन्तरं प्राग्यवाग्रयणाद्व्रीहिभिरेव दर्शपूर्णमासया
गः। यवाग्रयणानन्तरं च प्राग्व्रीह्याग्रयणाद्यवैरिति। अत्र दर्शपूर्ण
मासाविति नेनदर्शपूर्णमासयोरेवायं द्रव्यनियम उक्तः। तेनान्यासु विकृ
तिषु नायं द्रव्यनियम इति ध्रुवस्वामिनः। आघारो प्रकृत्यै पठ्यते। ऋजु
माघारयति संततमाघारयति प्राञ्चमाघारयति दीर्घमाघारयतीति। १११

।एतेषामपि ऋत्वादिधर्माणामेकार्थत्वाद्व्रीहियववत्कल्पे प्राप्ते आह
धर्ममात्रेषु समुच्चयोऽविरोधे ये गुणरूपधर्ममात्रा आरादुपकारकास्तेषु समुच्च
यो भवति न विकल्पः। यत्र तेऽविरोधे वर्तन्ते। कथं न हि ऋजुं प्रांचं संतत
दीर्घं वा विरुणद्धि न च संततं। ऋज्वादीन्। अदृष्टार्था अपि तेषां भिन्नान्ये
व। तस्मात्परस्पराविरोधित्वादृज्वादीनां समुच्चयः। यदुक्तमेककार्यत्वा
त्समुच्चय इति अत्रोच्यते सत्यं परमेककार्यं आवान्तरकार्याणि तु भि
न्नानि। यदृजुनाक्रियते न तत्संततेन। यत्संततेन न तदृजुना। यद्दीर्घेण
न तत्प्रांचा। यत्प्राञ्चा न तद्दीर्घेणेति। अथेदं विचार्यते। अग्निप्रणयना
ग्निमंथनादिषु क्रियमाणास्वनुवाचिनो होतुर्मन्त्राः सन्ति प्रदेवं देव्या धिया अ
भित्वा देव सवितः इत्यादयः। तथा अग्न्याधानमन्त्रा भूर्भुवः स्वरिति आदि
त्यानां त्वेत्यादयः। किं तेषां विकल्पः उत समुच्चय इति मन्त्राणां स्मारकत्वेन
दृष्टार्थत्वात् करणत्वादेकार्थत्वाद् व्रीहियववद्विकल्पे प्राप्ते आह होत्राधान
योः समुच्चयोऽविरोधे इत्यनुवर्तते। होतुरिमे होत्राः होतृमन्त्राणामाधा
नमन्त्राणां च समुच्चयो भवति न विकल्पः। अविरोधादेव होत्राधानशब्दे

नान्त्रानां संबद्धमेत्रा लक्ष्यंते। करणमंत्रा हि कर्मानुष्ठानकरणभूताः
स्मृतिपूर्वकमेव क्रियंते नोनुवंति। न वैकेनाभिष्टावितरेण कार्यमतो नियु
क्तस्तत्र विकल्पः। क्रियमाणानुवादिनस्तु क्रियमाणस्य कर्मणः
स्मृत्यविच्छेदार्थाः अविच्छेदश्चांतादयोऽपीति सर्वेषां समुच्चयः समुच
च्चयश्च दृश्यते श्रुतौ त्रिः प्रथमामन्वाह त्रिरुत्तमामिति। आग्नेयारन्वा
ह एककादशान्वाह नवाहदशान्वाहेत्यादि अनेकसंनिपाते चैतद्भवति
प्रथमानुत्तमेति च संख्योपबंधश्च तस्मात्समुच्चयः। आधानमंत्राणां
वचनात्समुच्चयः त्रिभिरक्षरैर्गार्हपत्यमुपदधाति पंचभिराहवनीय
मिति। एवं सर्वत्र होममंत्राणां समुच्चये प्राप्ते आह तद्याज्यानुवाक्यासु
विरोधात् एकस्मिन्नेवारंभे चित्तं बहुयाज्यानुवाक्यासु एकदेवत्याः
पठिताः संति। तासु वचनसमुच्चयः। किं तु विकल्प एव। कुतः। विरोधात् यतः
पुरोनुवाक्यैर्दैवतास्मरणार्था याज्या च हविःप्रदानार्था यजति वा अनुवा
क्यया प्रयच्छति याज्ययेति। तत्र च दृष्टार्थत्वाद्विकल्पः दर्शनाच्च। अस्ता
ष्येवं हि स्पष्टं यदेकदेवत्ये एकैव याज्या पुरोनुवाक्या च भवति नासमुच्चयः ११२

यतो वाजपेये प्राजापत्यान्यभून्नाचृत्य श्रूयते। एकानुवाक्या भवत्येकाया
ज्यैकदेवत्या हीति देवतैकत्वं हेतुरुक्तः न एकदेवत्ये याज्यापुरोनुवाक्ययो
रेकत्वं दर्शयतीति। अनया महापितृयज्ञे पुरोनुवाक्याप्रस्तावे श्रूयते। सिद्धं पुरोनु
वाक्ये अन्वाहेकयावेहेवान्प्रच्या चतुर्पं निह्वाभ्यां पितृन्निति अत्र पुरोनु
वाक्या द्वित्वविधिपरे वाक्ये अन्यत्र तस्य एकत्वं सिद्धं दर्शयतीति तस्मा
न्न याज्यानुवाक्यासमुच्चयः। किं तु विकल्प एव। प्रायश्चित्ते पुरोडाशनाशा
त्। यज्ञांगाय याज्ञ्यायामभिहितानि प्रायश्चित्तानि यथा यद्धनो य
ज्ञ आर्तिमियाद्भूः स्वाहेति गार्हपत्ये जुहुयात्। आर्तिमियाद्विनाशमि
यादित्यर्थः। विहितस्याक्रियाप्रतिषिद्धकरणे चात्र विनाशः। योमावास्यां
पौर्णमासीं वातिपातयेदग्नये पथिकृतेऽष्टाकपालं पुरोडाशं निर्वपेत्। यथा
योमावास्यां पौर्णमासीं वातिपादयेद्वैश्वानरं द्वादशकपालं निर्वपेदित्या
दीनि तानि तत्समाधित्सया विहितानि तत्समाधानार्थानि भवंति समाधाने
चादृष्टं एकेन तत्र निमित्तेन शक्यं वक्तुं तेन प्रयाजादिवदेषां समुच्चये प्राप्ते
उच्यते। प्रायश्चित्तेषु न समुच्चयः। कुतः। दोषनाशनात्। यत्नशक्तानि दोष

द प्र श्री
११३
113

नाशार्थे विधीयंते। कथं पुनरेतत्तज्ज्ञायते दोषनाशार्थान्येतानि। वाक्या
देवं वयस्था निमित्तमियादिदं कुर्यादिति। कर्मस्वयथाकरणादिना दोषविना
शे सनितानि विधीयंते। यदि तेषु च्युते व्यपनहि न स्पमेवकोर्थस्तेन च्युते
न अन्तो दोषनिर्घातन एव तेषां प्रयोजनं। तत्रैवेकं नानिर्द्ध्ते दोषेहुतीयस्य
न प्रयोजनमस्ति। प्रयाजादिषु नु पुनः समुच्चयः भिन्नकार्यत्वात्। नहि
समभिधायत्रियतेन तन्न पातेति प्रमाणमस्ति। ननु सर्वैककरणानुग्रहा
र्थाः। सत्यं सर्वेषां युगपदेकेन प्रमाणेन साधनत्वमवगम्यते तेन पर्यायेण
प्रधानविधिना हि तेषां विधानं। तत्र द्वारेकथा कामानु युगपदेव सर्वे संवं
ध्यंते। तत्र द्वारेण च सर्वजन्यावांतरकार्यैः करणानुग्रहः सिद्धो नातिकस्य
ते। प्रायश्चित्तानि तु वैगुण्य प्रमेवं निमित्तोच्चुतत्त्ववाक्येन निरपेक्षेण विधी
यमानानि प्रत्येकमेव तत्समाधानार्थानि विज्ञायंते। न तत्रयान्यैकस्मिन्वै
गुण्ये विधीयंते पयि च्युतेद्रव्यान्तरादीनि तेषां विकल्पसमुच्चयमविंतायामद
ष्टार्थत्वात् समुच्चयप्रसक्तौ वैकैकेन वाक्येन वैगुण्यसमाधानाय निरपेक्ष
विधानाद्वारे कथाहीहियववद्विकल्प एव न समुच्चयः। न तु कंजेमिनिनामा ११३

यस्मिंस्तेषु वैकार्थ्यान्निष्पन्नेनाभिसंयोगस्तस्मात्सर्वस्य निर्घातः॥ इति
।अस्यार्थः। यत्र यस्मिंस्तेषु विकल्पः स्यात्। कुतः। ऐकार्थ्यात्। कथमेकार्थ्यं। य
त एकेनापि निष्पन्नेन तद्दोषेण केवलस्य तस्याभिसंयोगो यथा पृषुजोपत्र आ
र्त्तिमियाद्भूः स्वाहेति गार्हपत्ये जुहुयादिति। तस्मात्सर्वस्य दोषस्यैकेन
निर्घातः। एकेन चेन्निर्हृतो दोषस्तर्हि द्वितीयादीनि प्रयोगान्तराण्यनिमि
त्तानि। एवं स्मार्त्तेष्वपि द्रष्टव्यं। न त्वाहुतीयं सूत्रं। समुच्चयपरत्वं दोषार्थेषु
यानि तु न दोषनिर्घातार्थानि तेषु समुच्चयः। कानि पुनस्तानि। यानि तस्या इ
ष्टायाः क्रियायां प्रतिषिद्धसेवने च विधीयन्ते। यथा यस्याहुतमग्निहोत्रं सूर्यो
ऽभ्युदियादग्नये व्रतं चरुं निर्वपेत्सौर्यमेककपालं। यस्याहुतमग्निहोत्रं सूर्योऽभ्यु
दियादग्निं समाधाय वाचंयत्वा दंपती सर्वाहमुपासीयातां। इति तत्र
दोषेण दृश्यते दोषस्याभावान्निर्घातार्थता नास्ति। केवलमभ्युदये निमि
त्ते कर्म विधीयते। तन्नैमित्तिकं कर्मणः प्रकरणोत्पन्नत्वात्तदङ्गं विज्ञा
यते। तत्र यावन्ति चोद्यन्ते तानि सर्वाणि प्रयोगवचनेन संगृह्यन्ते। अतस्तेषां
समुच्चयः। तदेवं जैमिनेः सिद्धान्तः। प्रमादात्पतितस्य वैगुण्यस्य समाधानार्थो

दे.प.श्री
२२४

114

नो विकल्पः। निमित्ते सति कर्मणां नां समुच्चयदर्शनात्। कात्यायनस्तु प्रायश्चि
त्तेषु दोषनाशात्। प्रायश्चित्तेषु विकल्पो भवति कुतः दोषनाशात्। दोषनि
र्घातार्थत्वात् प्रायश्चित्तस्य। न त्वेकेन दोषनिर्घाते कृते तेनास्ति द्वितीयस्य का
र्यमित्येवं प्राप्ते आह। नाश्रुतेः प्रायश्चित्तैर्दोषनाशः क्रियते इत्येवं विधा
श्रुतिर्नास्ति किंच। मन्त्रस्याम्नानं केवलमेवं विधश्रुत्यभावः मन्त्रस्यादृष्टे
वं न श्रूयते। यस्मात् प्रायश्चित्तैर्दोषनाशो भवतीति। कथं। भिन्ने जुहोति स्कन्ने
जुहोतीति भेदने स्कन्दने च संजाते होमरूपं प्रायश्चित्तं विधीयते न तु होमे
कृते भिन्नमभिन्नं स्कन्नमस्कन्नं संजायते। किंतु नष्टे वरवत्ति हते। तस्मात् प्रा
यश्चित्तमदृष्टार्थमेव न तु दोषनिर्घातार्थं तस्मात् समुच्चयः स्याद् दर्शनात्।
अन्यथा वा केश्चित्त्या प्रायश्चित्तैर्दोषनाशः स्यात्। कुतः। श्रुतेर्दर्शनात्। महा
व्याहृतिहोमेषु दोषनिर्घातो हि दृश्यते। तदाह। यद्यनो भूरिति च तु गृहीतमा
ऽपं गृहीत्वा गार्हपत्ये जुहवत् यत्पादि प्रवृत्यस्य यावत्पर्वणा पर्व संदध्यादेव ऽ
हैवास्य संदधाति यजमानाभिशिषस्यतीति विनष्टस्य कर्मणः संधानं भेषजं च
दर्शयति। न यावद् प्रायश्चित्ताऽकाशेषेऽश्रूयते। अग्निर्वै देवानां प्रायश्चित्ते २२४

नभागधेयेनोपासीरन्नेवेयं यानमपिनयन्ति स एव व्रतमालंभयतीति
तस्मात्प्रायश्चित्ते दोषनिर्घातः स्यादिति प्राप्ते आह नान्यार्थत्वात्। नैत
स्माद्दर्शनादेवं कल्प्यं। यस्मात्प्रायश्चित्ते दोनि। कुतः। दर्शनस्यान्यार्थत्वात्
। कोन्योर्थ इति चेत्। उच्यते। महाव्याहृतिस्तुत्यर्थं यथा यज्ञस्तुत्यर्थं चैतद्द
र्शनं। इत्थं प्रशस्तो होमो येन विच्छिन्नस्य संधानं क्रियत इति तस्माद्दृ
ष्टार्थत्वमेव प्रायश्चित्तानां। ततः समुच्चय एवेति। अपरा व्याख्या स्याद्दृ
ष्टदर्शनात्। प्रायश्चित्तानि हि विधानि। कानिचित् वैगुण्यस्य प्रमादापति
तस्य समाधानार्थानि। कानिचिन्निमित्ते कर्माङ्गानि। तत्र यानि वैगुण्या
समाधानार्थानि। तेषु दोषनिर्घातः स्यात्। प्रमादापतितस्य वैगुण्यस्य
समाधानं भवेत्। कुतः। दर्शनात्। एवं यथापर्वणे स्यादिति ह्युदाहृतपूर्वं
व्याख्याने। एकेन त्वनिर्दिष्टे दोषेन हुतीयस्य प्रयोजनमित्येकमेव किंचि
द्विकल्प्येन कर्मत्वमिति सिद्धान्तः। एवमेव सर्वेषु प्राप्ते आह नान्यार्थत्वा
त्। प्रायश्चित्तानि न दोषनिर्घातार्थानि। किंतु भेदनादिनिमित्ते सति क
र्माङ्गानि। तेषु न दोषनिर्घातार्थता। कुतः। अन्यार्थत्वात्। तत्र हि न प्राय

दे॰ त्र॰श्री
११५

ष्वितस्य विनष्टसमाधानं कार्यं। किं त्वन्य एवाऽर्थोऽदृष्टं। न च होमादिनानभि-
हितं स्वं। नैवाऽभिन्नमस्वं। नं च वक्तुं शक्यते। अत एवं विधेनाऽभिनेपानि
विधियं तेनान्यदृष्टार्थान्येव तस्मात्तेषु समुच्चय इति। एवं च जैमिनि सिद्धं
तेनाविरोधव्याख्यानं भवति। अतो युक्तमेवेति अथेदं चिन्त्यते ये मंत्रा
मंत्रसमाम्नाये स्वरांतरेण समाम्नाता ब्राह्मणे तु स्वरांतरेणोपात्तास्ते किं स्वस-
मवायसिद्धेन स्वरेणोत ब्राह्मणस्वरेणोत एकश्रुत्या तानेनेति तत्र प्रथमं
पक्षं तावदाह मंत्रे स्वरक्रियायथाम्नानमविशेषात्कर्मसु प्रयुज्यते यो
मंत्रः तस्मिन्स्वरक्रिया यथाम्नानं भवति येन स्वरेण संहितायामाम्नायते
तेनैव स्वरेणेत्यर्थः कुतः अविशेषात् यतो विशेषउपदिष्टो नास्ति अने-
न स्वरेण कर्मणि मंत्रः प्रयुज्यत इति। तेन यथाम्नात स्वर एव भवतीति प्रा-
प्ते द्वितीयं पक्षमाह भाषिकस्वरो वोपपन्नं मंत्रोपदेशात्। वाशब्दः पूर्व-
पक्षनिरासार्थः। भाषिकस्वरो ब्राह्मणस्वरः अथवा कर्मणि प्रयुज्यमानानां
मंत्राणां भाषिकस्वरो भवति न संहितास्वरः। ब्राह्मणस्वरेण मंत्राः प्रयुज्यं-
त इत्यर्थः। कुतः उपपन्नमंत्रोपदेशात्। संहितास्वरेणोपयन्नस्य प्रयुक्त ११५

115

स्यैव मंत्रस्य ब्राह्मणे स्वरान्तरेणोपदेशात्। तस्मात्कर्मणि प्रयोगे मंत्राणां
भाषिकस्वरो भवतीति प्राप्ते सिद्धान्तमाह तानो वा नित्यत्वात्। वाशब्द
क्षव्याहृतौ तान एव मंत्राणां प्रयोगः कार्यः कुतः नित्यत्वात्। नित्यो हि ता
नः वर्णस्वरूपमाम्नातोच्चारणे विनाभूतत्वात्। स्वरान्तरं चानियतं न ह्याय
न तु भयथा मंत्रस्य स्वरसंबंधदर्शनात्। न ह्यापनेसंहि तास्वरेण ब्राह्म
ह्मणस्वरेणेति। तस्मात्तान एव स्वरो मंत्राणामिति। डु. मे. ८ अथ व्याकरण
स्मृतिं दर्शयति एकश्रुति दूरात्संबुद्धौ यज्ञकर्मणि सुब्रह्मण्यासामजप
न्यूङ्खयाजमानवर्जमिति। एकश्रुतिर्दूरात्संबुद्धावित्यनुवर्तमाने यज्ञ
कर्मणि मंत्राणामेकश्रुतिर्भवति। न केनचित्स्वरेण प्रयोगः। किं सर्व
त्रा न। सुब्रह्मण्यासामजपन्यूङ्खयाजमानवर्जं एतानि वर्जयित्वा अन्ये
षु मंत्रेष्वेकश्रुतिर्भवति। सुब्रह्मण्यो ३ मिन्द्रागच्छेत्यादिनिगदः सुब्रह्म
ण्या। सामानि तु ह्रा ३ भियज्ञे गीयमानानि। जपाश्च घूर्णसि द्रंप्सस्य बाहु
रसि मपीह मित्यादयो जपनीतिशब्देन चोदिता मंत्राः। न्यूङ्खास्तु हृस्वे षड
हे होर्वेदे प्रसिद्धाः। ओंकारा द्वादश। पिबा सोममिन्द्र मंदतु त्वा यंते तो ३ ओ ३ ३

दे. प्र. श्री
११६

उं ३ उं ३ उं ३ उं ३ ३ उं ३ उं मुं तुं ३ स्तु षावह ये श्वाहिरित्याह यः। यजमानं च सर्वं
विष्णुक्रमादिवृत्तसंबंधिनो येमं त्वा हिविविष्णुरित्यादयः। अथ वा यजमा
न सेमिमा यजमानाः। एषु सुव्रत्सत्यादिषु यजमानानि पुय द्या प्रास
एष संहिता स्वरो भवतीति नेकश्रुति। आधाने श्रायतेता वषट् दशात्
दूइ शद्दद्या इच तुस्तुर्विं ६. शानि दद्यादिति। तत्रायं संदेहः। किं पद्यू
द्भाद शावा पञ्चदशविं ६. शानि समुच्चितादेशाः। उत विकल्पः। पद्यू। द्भाद
116
शावा चतुर्विं ६. शतिर्वेति। तत्र सर्वासा समानान्यान बाह्निकल्पस्या श्रवणा
च्च अंग पश्चा यस वांगत्वा हिणाम प्रयोगवचनेन सर्वाः समुच्चिता दे
या इति प्राप्ते आह संख्याविकल्पो हान संयोगे चूतत्वात्। तत्र हि विष्णु
दक्षिणो हानं संयोगे संख्या विकल्पो भवति। संख्यानं षडादीनां वि
कल्पः। ता वषड् दद्यादित्यादिश्रु यमा णानां षडादि संख्यानां विक
ल्पो भवतीत्यर्थः। न समुच्चयः कुतः चूतत्वात् जाति जामान्न त्वर्थे हि द
क्षिणा दानं नादृष्टार्थं साचानलिरेकेन नैव चूतेति न पक्षांतरेण प्रयो
जनं। अपि च समुच्चये सति संख्याश्रुति विरु ध्यते संख्यां तरोपजन ११६

नात्र्यन संख्यां नरोपजनत्वान्न्यून संख्याहानिप्रसंगात्। यदिश्विवदद्या
ह्यादश च चतुर्विंशतिश्च समुच्चितादीये नैतदाश्वयश्वत्वाहृ चत्वारिंशत्संख्या
प्रसङ्गेनातनस्माहिवकल्यः। अथेदं विचार्यते। अग्नीषोमीये पशौ श्रपयते
। श्व मन्त्रवच्च मवदः धारानिवसां जुहोति। अध्यूध्नीं होत्रे प्रयच्छति वनि
ष्टुमग्नीधे ददातीजितेश्वोदके नरात्मा मायनवाजपेयादौ पशुगणो प्रासंन
त्रे संदेहः। किमूवध्यादीनां सर्वपशुसंबंधिनां समुच्चयः उत विकल्पो यस्य
कस्यचिदेकस्य पशोरिति तु नैकपशुसवधिमिरेव तत्स्यान्नस्याः क्रियाया
मिच्छनेविकल्पप्राप्ति आंगुरुवध्य वसाध्यूध्नीवनिष्टुसमुच्चयोद्रव्य
संस्कारयोमिदेहाभ्यां। अनेकपाशुकेपूर्ववध्यवसाध्यूध्नीवश्रुनिष्टु सुस
मुच्चयोभवति। सर्वेषां पशूनां संबंधीनि कुवध्यादीनि गृह्णीयादिति स्यर्थ
।।कुतः द्रव्यसंस्कारत्नमिदेहाभ्यां द्रव्यसंस्कारात् मिदेहात्सद्रव्याणि ह्युव
ध्यादीनित्यां नयात्रिया यासंश्लिष्यते प्रतिपाद्यते। नात्र द्रव्यार्थेया
र्थे किंतु क्रियैव द्रव्यार्थेयागादनंतरं कृतार्थस्य प्रतिपत्तिः संस्कारः। तत्र
संस्कार्याणि भिन्नानि। यस्यैव पशोर्हदयवध्यादि न प्रतिपाद्यते नैतस्यैव प्रति

117

निरूपसंस्कारलोपाद्धि गुणेष्वेस्मात्तात्तस्मात्समुच्चयगुर्व्यादीनां एवमे
वगुडजायनीषपिसमुच्चयएवासमानन्यायात् । यत्र च समतन्नभव्यसमुच्चार
णन्यायेनद्रव्यं क्रियार्थं भवतितत्रअद्गुष्वेकत्रप्रासेष्वेकेनैव क्रियासि
द्धेन हि तीयेन प्रयोजनामिति । तत्र विकल्पो भवति यत्र तु क्रियाद्रव्यार्थ्या तत्र
समुच्चय एव इति । ज्योतिष्टोमे सोमक्रये श्रूयेत हिरण्येन क्रीणाति वाससा क्री
णाति गवा क्रीणाति । अजया क्रीणाति स्यादिह क्रयद्रव्याणि । तत्र संदे
हः किं एषा हिरण्यादीनां विकल्पः एकेनैकेन सोमः क्रेतव्य इति उत सम
मुच्चयः सर्वैः क्रेतव्य इति । तत्र व्रीहियववन्न्यायेनैकार्थत्वाद्धि विकल्पः । कथं
पुनरेकार्थत्वं भिन्ना एव हि प्रतिवाक्यं क्रयाः । न ह्येकेन वाक्येन विहितं क्र
यमन्यद्वा वाक्यान्तरे ईप्सान्तरविधाने संभवति तु स्यात्तिस्रो ऽद्व्यावरोधा
त् तस्मात् सर्वाणि क्रयविधानानि विधिभेदाच्च क्रयभेदः । तस्मात् नाना
क्रयसाधनत्वाद्द्रव्याणां नास्त्येकार्थ्यम् । सत्यं । सा नास्ति । क्रयद्वारेण त्व
स्त्येव । सर्वे हि क्रयाः सोमक्रयप्रयोजनार्थत्वादेकार्थाः । न द्वारेण द्रव्याण्यप्य
प्येकार्थानि । तदनेन प्रकारेण क्रयाणामेवात्र विकल्पः समसमुच्चयो विचिन्त्य विं ११८

समुच्चयो विंत्येनो। व्रीहियववाह्निकस्यप्रासावाहा। चोदनागुणेषु च
प्रक्रमस्य पबंधाभ्यां चकारेण समुच्चयो भवतीति विकल्पः। हिरण्यादिसा
धनका। सर्वैपि क्रयाः कर्तव्या इत्यर्थः। नुन। प्रक्रमस्य पबंधाभ्यां। सोम
स्यप्रकृसेः। उपबंधाद्वा। यतः प्रकृसेउपकृसे विधामानेएव सोमक
र्मम ध्येक्रयो विहितः। तेनाहृष्टार्थः। नत्वप्रासे सोमप्राप्त्यर्थः। द्वौ ग्रंतरे
णापराग्णीनात्वे स्यादिशाल्यो पदिष्टमार्गेण प्रवेशनंचतं। तत्रानांत्य
[illegible]लकमीति क्रम्यसमाप्यते नैव मार्गेण निर्तिथ्य मत्वनीय याविहितस्तथै
वकार्यविधानेवैसर्वैर्याद्रव्याणां। तस्मात्समुच्चयः। इष्टार्थत्वेपिचिके
नुणतिरत्र साध्या। सा च बहुभिः सुकरा। अतः कार्यप्रधानतात्सदा
र्थानांकार्यसौकर्यमाले चसमुच्चयाश्रयणं न्याय्यं। व्रीहियवादीनांतु
नैवकिंचित्कारणमस्ति येनदृष्टयकृतानामपिसापेक्षत्वंकल्प्यते। अ
कैठत्वार्थविशेषान्तापेक्षत्वकल्पनमितिवैषम्यं। अपि च संख्योप
बंधष्ठश्रूयते। नचेदृशीभिरेवक्रीणीयान्नान्यादृशाभिरिति। तस्मादपि
समुच्चयः॥ गार्हपत्याहवनीयोनक्षेयात्। विनावचनंगार्हपत्याह

118

वनी। यो न स्नावेयात् तत्र यो व्यवायं न कुर्यात् तयोरन्तराले न न गच्छेत्। ता
पि स्पृष्टोदपात्रादिकर्मान्तरालेन न येन विहृत्याहृत्यैवेन्तरयावृत्तिः। वि
हृत्याश्च प्रदक्षिणमावृत्य आवृत्य आवर्तनेन कृत्वा प्रदक्षिणमावृत्य
वा इतरयावृत्तिः प्रत्यावृत्तिः कर्तव्या यत्र शास्त्रतः प्रदक्षिणावृत्तिः त
त्रान्तरे दानीमेवाप्रदक्षिणावृत्तिरविहितापि सर्वत्र कार्या। यत्र चाप्र
प्रदक्षिणावृत्तिः शास्त्रतः कृता तत्रान्तरा दानीमेव प्रदक्षिणावृत्तिरिति।
यथाश्च यप्रणीताद्दक्षिणतः परिस्तरणं पतीतितत्रतिन पनानन्तर
म प्रदक्षिणावृत्तिः एवं पूर्णपात्रनिनयनेपि। तथा महापितृयज्ञेऽस्य
प्रदक्षिणं वेदिं परिषिञ्च्य प्रदक्षिणमितरथावृत्तिः प्रदक्षिणपरिषेके
त्व प्रदक्षिणमिति। अनीत्य निष्क्रमणं यत्र कर्मणि अग्निहोत्रे दर्शा
कर्तव्यं होमे पुनराचमनोत्तरकालं दृष्टो यथा न विसर्गोत्तरकालमिति उ
त्तरतः उपचारो यज्ञः। यज्ञः उत्तरत उपचारो भवति उत्तरतः विहारादुत्तरदेशे उप
देशे तु चारो स्तरेण यस्यासावुत्तरत उपचारः। सर्वकर्म विहारादुत्तरदे
शे कर्तव्यमित्यर्थः। उत्तरत उपचारो वै यज्ञ इति श्रुतेः। यत्र शास्त्रेण

देशान्तरमुपदिष्टं भवति। यथा सजघनेन गार्हपत्यं आहवनीयस्य पुर
स्तात्तस्माच्चतुरश्रस्य मध्ये इति तत्र न स्थेयं भवति। अस्यापवादमाह दक्षि
णतो ब्रह्मयजमानयोरासने। ब्रह्मयजमानयोरासने वेदेर्दक्षिणतो भव
तः। ब्रह्मा वै यज्ञस्य दक्षिणत आस्ते अभिगोप्ता इति ब्राह्मणः। अथ यद्धैषेच
तुलाप्य दक्षिणो वेद्यन्त इति प्रच्छ्रुत्यतस्माद्दक्षिणां वेद्यन्तमधिस्पृश्येवा
सीतेति श्रुतेर्यजमानस्य। पश्चाद्यजमानो वेदिस्पृक्। तयोर्ब्रह्मयज
मानयोर्मध्ये यजमानो ब्राह्मणः पश्चादुपविशति। तुभावस्पृदङ्गुलो
यजमानस्य वेदिस्पृक् वेदिं स्पृशतीति वेदिस्पृक्। दक्षिणस्य वेद्यन्तस्यो
परि वेदिमध्ये पादौ निधायोपविशतीत्यर्थः। अत एवोक्तमथ हि षेव
तुला यद्दक्षिणो वेद्यन्तः पयसा धुक् रोति तदन्तर्वेद्यं यत्पदसा धुन दृहि
र्वेदि तस्माद्दक्षिणं वेद्यन्तमधिस्पृश्येवासीतेति। वेद्यन्तस्योपरि पा
दौ। बहिरासनं। एवमुपविष्टो यजमानः यत्किंचित्साधु असाधु उत अभवं कर्म तद्व्य
त्यागादिकं करोति तदन्ते वेदिं करोति। अथ यद्ध साधु अशोभनमद्य
वायुसमुत्सर्गादि द्विष्ठह्महि वेदिं करोति अध्वर्युः कर्मसु वेदे योभागा न। य

दे. प्रश्नो
११८

19

जुर्वेदविहितेषु कर्मसुकर्तृत्वेनरस्यावचनेऽध्वर्युकर्तृत्वमस्मान्नतु कुतः वे
दयोगात्। वेदेनयोगो वेदयोगस्तस्मात्। अध्वर्योर्वेदेन संबंधात्। अ
ध्वर्युणा हि वेदोऽनुष्ठाने समाख्यायते ध्वर्युर्वेद इति यद्येनहिहितेषु क
र्मस्वध्वर्युकर्तृत्वं भवति। नहि वेदमुपपद्यते। नान्यथा वचनविरोधात्सा
मान्यात् वचनाद्विरोधो वा अध्वर्योरन्योन्योऽपि यजुर्वेदे विहितस्य क
र्मणः कर्त्ता भवति। वचनानावनत्। मैथिनं प्रतिप्रस्थातेतिनदेको दृषदु
पले समाहंतीति। अधिश्रयणसावाऽयमिति। अग्नीदेहमेकादशक
पालं निर्वपति मैत्रावरुणोनतद्दस्येनां वाचयतीति नेष्टोन्नेताश्रावयति।
यजमानोवसोर्धारां जुहोतिप्रस्थापयिष्यन्ति जुहुयानुद्गाताहिष्टानी
ति। विरोधाच्च। पेषणोपधानपौर्णपदाहिरोधात् यथा कपालोपधाने
अग्नीत्तथा। धर्मेरो हि एषोनिर्वपणासादनानां प्रतिप्रस्थातुः। वसाहो
मेधावग्रहस्यहोतृचमसे वनयने च। चयने सौरयोजनं च हविष्याऽन्न
स्वाम्यलिंजात्पूर्ववर्वमंतरं। हविर्भिर्हियवाऽस्याद्धि पात्राणि स्फ्यादीनि।
स्वामी। कर्मफलभोक्ता यजमानः पत्नी च। ऋत्विजो ब्रह्माद्याः। एतेषां एक ११८

त्रासमावेशेसतिपूर्वेपूर्वे अस्मिन्सूत्रे प्रथमंप्रथममुपदिष्टमेतरं
अग्निसंनिकृष्टं भवति। अर्थात्पश्चात्पश्चादुपदिष्टं तदपेक्षया ब
हिर्भवति। पात्रहविरादीनां इतरेतेनोनयने ऋत्विग्यजमानानां वेनरत्त
तोगमनामेनेवकर्मार्थ ॰मुपवेशने च सर्वत्रायमंतर्बहिर्भावोज्ञेयः
ऋत्विजां च यथापूर्वं। ऋत्विजामपि ब्रह्मादीनामुक्तेत्रेतानांमध्येएकत्रस
मावेशेसति यथापूर्वमिति योयः पूर्वः स सोन्तरः अग्निसमीपः योयउत्त
रेनियमः। चकाराद्दर्विणामपि यथापूर्वं। तदर्थपात्राणामपि सत्वगताय
त्राहोस्वामिनामपेवमेव च यथापूर्वमंतर्बहिर्भावोद्रष्टव्यः। नवाऽन्वौहित
त्वात्। अनचोदितत्वाद्द्यमंतर्भावो बहिर्भावो न स्यात्। यदि न चोद्यते।
यो घृते च॥ तस्माद्यमंतर्बहिर्भावः स्यादेव। तत्र थ घ्नानामंतरेण यूपं चाग्निं
च हरंती तिमस्याद्दृत्त्वा सोमाहवनीययोर्व्यवायाद्धिस्यादितं तबहि
र्भावश्चात्राग्न्यवधिकः तेनवपा अग्नेरन्वबहिर्नामन्तश्रुपात्रत्वाद्धया
पेक्ष्य याबहिः ४। प्रतिप्रस्थातानुऋत्विक्स्वाद्यूपाद्वपि बहिर्भवति गार्हप
त्यसंस्काराः अधिश्रयणपर्यग्निकरणपात्रप्रतपनादयः संस्काराव च

नाभावे गार्हपत्ये च गृह्णो भवंति। तद्यथा सूर्योग्निहोत्र हवण्योः प्रतपनं।
स्रुक्स्रुवादीनां। वरुणप्रघासे करंभपात्रपचानां दक्षिणाग्नौ। श्रपणेपि
पर्य्यग्निकरणं गार्हपत्यादेव पित्र्ययज्ञे चधानानां। पत्नीकर्म्माण्येव दक्षस्यनु
द्द। दक्षिणाग्नावेव पाकः। इष्टकापाकोर्थत्वात्। तस्मात्स्यद्दक्षिणाग्निनावि
धानात्। श्रपणमाहवनीये। हविषां श्रपणमाहवनीये वा स्यात्। गार्हप
त्येवानुगमयथाश्रुतत्वात्। तद्दादुराहवनीये हवीषि। श्रपयेत्परिशिनितुतो
गार्हपत्य एव श्रपयंतीति च। आहिर्विकल्पोयं नेक्षाविकल्पः। तच्छ्रपि
ण इति तत्र पित्र्यस्य निषप्तत्वे नानुवादात्। तद्दकं। रूपंकालेनुनिर्वाप्य
श्रपणं देवतानास्त्या। श्राद्धे येविधानाः पक्षास्ते इमे सर्वदास्मृताइति
। रूपंकमेवरूपं। दाक्षायणाद्दर्शपूर्णमासादिकं। कालउदितानुदिता
दिः। अनुनिर्वाप्यो वैमृधादिस्यो। श्रपणं हविः श्रपणं गार्हपत्ये वा हव
नीये वेति। देवतायैंद्रं भवति महेंद्रं वेति। एतेषां विकल्पानां मध्ये यः प्रथ
मस्वीकृतः स एव यावज्जीवं कर्तव्यः। नपक्षांतरं। एवमेते पंचवादिविक
ल्पाः। अन्ये सर्वेपि ऐच्छिकविकल्पाः घृतमाज्यं। आज्येन यूपमनक्ति। आ १२०

ड्यमासिच्योह्नग्नेसोम्यंप्रयच्छती त्यादौ विमाड्यशाष्ट्रः निर्वापादिसंस्का
रनिमित्तंतु न जातिनिमित्तं इति। तत्र संस्कृते व्याज्ञेयमाये णोड्यशाष्ट्र प्र
योगदर्शनात् संस्कारनिमित्तं इत्येवं प्राप्ते इदमुच्यते। व्याज्ञेविहितं घृतं प्र
तीयात्। असंस्कृतेमेव घृतं गृह्णीयात्। जातिनिमित्तो यमाड्यशब्दो न सं
स्कारनिमित्त इत्यर्थः। यतो संस्कृतेपि जातिमात्रे प्रयोगो लोके चैंदेवदृ त
श्यते। कृष्यमाड्यं स्त्रीणां माड्यं तैलमुपसेचनेव नेता जातिं विना लोके वेदे
च प्रयोगो नास्ति विना संस्कारं लोके प्रयोगोस्ति। व्यतो जातिनिमित्त एवेति
।प्रयोजनं व्याड्येन यूपमनक्ति व्याड्यमासिच्योहाग्ने सौम्यं प्रयच्छती त्ये
वमादौ संस्कारानवकर्तव्याः। कि लिंगात्। मंत्रलिंगात्। हाड्यं हि गव्यं भ
वति। गवां संबंधि भवति। किं लिंगं। महीनां पयोसि। निम हुड्इति वाऽननां
सामेकं नाम यत्प्रवामिति। व्यतचात्तं मंडनमिश्रैः। घृतार्थेगो घृतं व्याह्य
नदृनावेनु माहिषे। आज्यं चातदृभावे तु साक्षात्तैलं गृह्णीय्यते तैला भा
वे गृह्णीत व्यं तैलं जर्तिलसं भवं मैदव्यं भावे तीसीम्नाहं कौसुभं सर्षपोद्भवं।
वृक्षस्नेहो यथा व्याह्यः पूर्वालाभे परः परः। तद्भलाभे यव व्रीहिश्यामाका

121

कान्यतरेणाज्येनापि होमालोऽग्नौ येन घृतार्थे योजयेत्सुधीः। वृक्षतैलेऽप्युप
क्तागतिर्वैरंडोज्जवं वा ऽसत्तायां द्रागकाक्षतामभावे छागमाहिष्यादेर्घृतं क्रमा
न्नात्तद्दुग्धाभेगवादीनां क्रमान्क्षीरं विधायतेनानदुग्धाभेद्दधिसर्पिर्वा द्युमभा
वे तैलं मिष्यते। यत्नाद्यमशनाद्यर्थं न लभ्येत कथं चन। तत्र क्षीरं यन्नादेस
स्वक्षात्तैलं न्न हीष्यते। यत्तन्मुख्यं दधि क्षीरं तन्नापि तद्दुग्धामतः अजादेः
क्षीरदध्यादि तद्दुग्धाभेनुगोघृतं मुख्यासन्तोऽथवागात्याल्कार्यं कारणमं
नतो। अतएव घृताभावे पूर्वं दधितः पयइतितत्याप्येषां केषांचिद
न्येषां हविषामप्यं समवेत सर्वत्राज्यमुपाहेयं। नरहरेजमुनेर्मतादिति न
स्यहोमोनादेशे। अन्यनादेशेइति जुहोतीस्रुके द्रव्यांतरस्यानादेशेऽस्र
नुक्तौतस्याज्यस्यहोमः कर्तव्यः। तद्यथासव्योनाहृत्य दक्षिणाग्नौ जुहोस्व
निषद्ग् इति सरस्वत्या इति नमः रूतायेति जुहोतीति च स्वाहा हे वेभ्य इति जु
होति देवेभ्यः स्वाहेति जुहोति अयंनइति जुहोस्वासमिन्तिस्याद्दोसर्वत्रा
ज्यस्यहोमः कार्यः। अन्यत्रतस्येवपर्वलक्षणोपदृष्टी चत्वालास्रुरीपं
।धिस्यति च पत्नाहो यत्रपुरस्ये।। प्रयोजनं तत्र नस्रुरीपंचात्वालान्नगता १२१

हुं आहवनीययजनयो ध्रुवायाः। आहवनीये ये यजन्ते ये यागा भवंति
स्वाज्यहविषः। उपांशुयाजाग्रयणो द्यावापृथिवीयपश्वास्विष्टकृत्या तस्येते
ध्रुवायाः सकाशाद्धाज्यमवदायकार्याः। उपस्तृणन्नभिघारयन्नाज्यस्य
यजन ध्रुवायां गृह्णातीति स्वाज्यभागार्थं तेन ध्रौवस्य श्रवणात्। अनए
वध्वतेः यस्मादभिधारणस्य अयाज्यं सर्वत्र ध्रुवाया एव गृह्णातीत्यनेन कर्त्तुं।
रुक्षान्या एवोपस्तरणाभिघारकरणं मंदं तत्रवचनाभावात्। सूत्रकारोपि इ
डाप्राशित्राघारं स्रुवेक इत्यनेन इडाप्राशित्रयोर्गौणपस्तरणशब्ददर्शनानदु
पस्तरणाभिघारयोर्ध्रौवं विकल्पेनोपदिशन्नन्यत्सुरस्य यज्ञे भूपस्तरणा
भिघारणे ध्रौवाद्वैव सिद्धे नोपपद्यते। तस्माद्धु ध्रुवाया एव सर्वो यज्ञ४ यम
यनीति स्वतेष्वा आहवनीययजमानत इत्यत्राहवनीयग्रहणं गार्ह
पत्ययजनिवृत्त्यर्थं। तेन पत्नीसंयाजेषुत्क्रान्त्या एवाज्यंग्रहणं न ध्रु
वाया इति ॥ इडाप्राशित्राघारं स्रुवेके। एके शाखिन इडायां प्राशित्रे च यदा
ज्यं तदुपस्तरणाभिघारार्थं आघारो च स्रुवेणेति तेन तदर्थं चाज्यं ध्रुवाया एव गृह्णं
ति। तत्रापि यज्ञशब्दश्रवणात्। इडायां नावत्त। पाकयज्ञियस्येवावाणे

दे० प्रश्री
१२२

122

द्विडत्यया चारि षु रिति। प्राशित्रेच। तथ येव यज्ञस्यावदानमेवमेवतदिति
आघारयोश्चा शिरोहवे यज्ञस्येतयोरन्तर आघारयोर्मध्यमन्यतइति
। अपत्यरित्वत्र यज्ञशब्दप्रयोगस्य श्रुतिपरत्वात् उच्छास्या एवेच्छंति। प्रा
चावाघारो पूर्वाघार उत्तराघार श्चेती द्वावघारो प्राचो मध्यं उच्छ्रीहोतव
व्यौ॥ ऋजुसंततो। दीर्घौ च। ऋजुमाघारयति दीर्घमाघारयति प्रांचमा
घारयती ति श्रुतेः। प्रांचाविति सर्वेषां धर्माणामुपलक्षणार्थं विदिशावे
के। एके शाखिन आघारौ विदिशो जुह्वति। आहवनीयस्योत्तर श्रोणेरा
रभ्य दक्षिणांसपर्यंतं पूर्वाघारं दक्षिणश्रोणेरारभ्योत्तरांसपर्यंतमुत्तरा
घारमिति। तथा वसत्रांतरे। उत्तर पश्चार्द्धादग्नेरारभ्याविछिन्नं दक्षिण
तोजुहोति तान याऽदक्षिणपश्चार्द्धादारभ्याविछिन्नमुत्तरतो जुहोती ति आ
हवनीयेहोमाः श्रुति समारभ्या नाम्प्रांवचनानावे सर्वे होमा आहवनी
ये कर्तव्याः तुतः श्रुतेः यदाहवनीये जुहोतीति होममात्राधिकरणत्वेना
हवनीयस्य श्रवणात्। समारभ्यानाञ्च। आरमंतात्। अग्न एत्यवास्मिन्
हत्यानइस्याहवनीयइत्यन्वर्थसंज्ञाविज्ञानादित्यर्थः। तत्र यथापूर्वाहु २२

तिं जुहोति षट्‌चोनारं जुहोतीत्यादौ । वचनेनान्यत्रापि भवति यथा दक्षि
णाग्नौ जुहोति । जुहूवचने । होमसाधनास्यां नरस्याववचने जुह्वा होमः
कार्यः । तद्यथा सर्वेष्वेनाहृत्य दक्षिणाग्नौ जुहोति नमः स्रुतयेति कर्मा
व पर्वगं जुहोतीत्यादौ । कुतः समाख्यानादेवाहु यतेः नयेति जुहूरिति एत
स्य यत्र दर्शपूर्णमासतद्विकारहोमे जु हूरिति तत्रैव जुह्वा होतव्यं नान्य
त्रेति कर्कः । परिभाषायामुपदेशात् सर्वत्रेत्ययाज्ञिका हरिस्वामिनश्च
स त्रुज्ञीतार्थावासेः सत्त्रहृहीते स्वधिमनति कोयं निर्देशः । अवचन
इत्यनुवर्तते । अवचने सर्वत्र सकृद्गृहीत साज्यं जुह्वानानुतः अ
र्थावासेः । अर्थस्य होमलक्षणस्य कार्यस्यावाप्तेः सिद्धेः सकृद्गृहीतेना
प्यो ज्येन होमः सिद्ध्येवात तद्यथा दक्षिणाग्नौ जुहोत्यनया इति सर
नि स्वत्याइ चेति नमः स्रुतायेति जुहोति इत्यादौ । वचनेन त्वन्यथापि भवति
यथा ध्रुवाहृतौ वनुर्गृहीतं ॥ स्रुवेणावेत्निषट्‌चोनारं पंचगृहीतमित्यादि
अवपद्धारातिरेकात्ध्रुवावपद्धारानुनोहि नीयस्यावदानस्योवातिरे
कांदतिरेक प्रत्ययान्सच्छृतगृहीतमेव होतव्यमिति । कथं तद्ध्रुवनुरव

दे.प.श्री तंभवतीदं वाक्यमनुवाक्यायाज्या अथवषट्कारोयस्यादेवताचतुर्थे
१२३ यस्यैदेवतायैहविर्भवतीतिप्रत्यृक्षमाहानितिरिक्तं हन्तद्ववदानंयत्पंच
पृ. ममितिश्रुतेः चतुर्णावषट्कारावाहुतिषुपुरोऽनुवाक्याघ्याभावात्क्रमेश्वे श्रा
एकस्यादेवतायाएवसम्भवात्नहिनीयमेवावरदानं अतिरिक्तंज्ञापय
ति।तथाअग्निहोत्रेयच्चरन्तेषांहिहोमीरथकेनेहैत्याहतीइतिद्वयोर
123
तिरेकंदर्शयति ८ व्रीहीन्यवान्वाहविषिहविषिविहितेसतिव्रीहीयवा
न्वाप्रतीयात्तनाभयविकल्पेतुभयस्याशास्त्रार्थत्वात्तस्यहविरवदाति
तस्यहविषःपुरोडाशचरुधानासान्नाय्यादिरूपस्यहविरवदानस्य या
गार्थंहविरवखंडयति।तस्यैकस्यपर्वपर्वषष्ठीयं त्रिर्जमदग्नीनां।जमदग्निः
प्रवरोयेषांतेजमदग्नयइत्यस्मिंस्तेतानेषांजमदग्नीनांपंचावर्त्तयागांत्रि
खंडयति।तथा सोमस्ताराभिघारणाभ्यांपंचावर्त्तसंपद्यते किं बहुनायन्त्रय
त्राऽन्येषांचतुरवत्तंआज्यंभागपत्नीसंयाजप्रधानयागादौतत्रसर्वत्र
जमदग्नीनांपंचावर्त्तमेववर्त्तव्यं पंचावत्तांजमदग्नीनामितिशाखां
तरात्।अग्नि।होमेपितेषांपंचावत्तमेवपक्षांतेमानवाःचतुःपंचकृत्वोवे १२३

ति। आपस्तंबोपि पंचमं जमदग्नीनामिति। पित्र्या पांच प्रधानमार्गेषु
स्वी यष्टीय हूविषोर्द्धिर्द्धिरवदेयं। अन्येभ्यस्तु सकृत्सकृत्। आवाहनया
गेनु द्विरुपस्तरणं कार्यं। हविर्भ्यो वा द्विर्द्विरवदेयं। पश्चादवदानेभ्योपि त्रिरव
देयमिति। विशेषस्तूपरिष्टाद्वक्ष्यते। अत्रत्रि जमदग्नीनामिति जमद
ग्निग्रहणमुपलक्षणार्थं। अन्येषामपि पंचावत्तं स्मर्यते। तथाहि। जाम
दग्नीवत्सविदा वार्ष्टिषेणास्तथैव च। पंचावत्ति मत्स्ये न्ये सर्वे चतुरवत्तिन
इति पश्चान्त्वतीयां नग्नती यमवदानं हविषः। पश्चान्यागाद्वदेयं। प्रथ
मद्वितीययोस्तु मध्यात्पूर्वार्द्धादिति वक्ष्यति सर्वेषां तोम यमविधानान्तु
। वाविक्लेम। सर्वेषामिति जमदग्नीनां तद्व्यतिरिक्तानां चोभयं चतुरवर्त
वा भवति। नुतो। अविधानात्। जमदग्नीनामेव पंचावत्तं नवतीति नि
यमस्याविधानात्। अविशेषेणाधिश्रयणेनातद्वै चतुरवत्तं भवतीति उ
तो पंचावत्तमेव नवतीति शाखांतरेनु पंचावत्तं जमदग्नीनामिति तेन
जमदग्नीनां पंचावत्तमेव नियतं। इतरेषां चतुरवत्तं वा पंचावत्तं वेति म
ध्यात्पूर्वार्द्धाच्चा संनिदत्तं गुष्ठपर्वमात्रमवदानं। हविषो मध्याद्धविषः

दे प्र श्री
१२४

124

पूर्वार्द्धमात्रमंगुष्ठपर्वमात्रं अंगुष्ठपर्वप्रमाणं तिरश्चीनमवदानमवद्य
ति किं कुर्वन् असंभिदन् अवदानयोः परस्परं संभेदं संमतिं मर्यादाभं
गमकुर्वन्नित्यर्थः। अवदानयोः संभेदे च कृते मर्यादाभंगः स्यादंगे च मध्य
पूर्वार्द्धसंभो होमाभ्यदिति पत्न्यावार्थः अस्य चावद् दधिपयसोः। दधिप
यसोरपि अवदानमात्रावदानद्वयं। अंगुष्ठपर्वमात्रमेवेत्यर्थः। तयोर्हि
द्रवत्वात् स्रुवेणावदानं स्मार्यमिति। तत्र पुष्करस्यैनावत्मात्रपरिमा
णत्वात्। आघृतयोराज्यं हविरवदानस्यादौ तयोरित्यादौ अंते चाज्यम
वदेयं। स आज्यस्योपस्तीर्य द्विर्हविषोवदाय थोपरिष्टादाज्यस्याभिघा नं
ह रयतिप्रोसे ज्येन भिश्राद् हृद्विनिर्हूपनइति श्रुतेः। तत्र ध्रुवायामवदेयं। उप
स्तरणाभिघारयणाज्यस्य यतेन ध्रुवायां गृहीतमिति वचनात्। एकप्रस्त
वाम्य स्विष्टकृतः एकप्रस्तवायं प्रधानावदानापेक्षयैकेनावदानेनोनं हि।
नं स्विष्टकृतः स्विष्टकृद्भागस्यावदानं भवति। यस्य प्रधानयागे द्विरवदा
ननं स्पेकं स्विष्टकृद्भागे। यत्रिस्त्रस्य द्विरिति द्वि श्चाभिघारणां स्विष्टकृतिअ
वदानोनन्तरमुपरिष्टाद्विरभिघारणं भवति। वरुणप्रघासादेन यानुवाह १२४

सऽसर्वेषामेव हविषामध्वर्युः सकृत्सकृदवद्यत्यथैतस्या एव पयस्या
ये प्रतिप्रस्थाता सकृत्सकृदवद्यत्यथोपरिष्टाद्धिराज्यस्याभिघारयतीति
। ॥ गृहमेधीये पितृयज्ञे चाप्यचरोः सकृदवद्यत्यथोपरिष्टाद्धिराज्यस्याभि
घारयतीति च अवदाय प्रत्यभिघारणं प्राक्स्विष्टकृतः अवदाप्रधा
नां यं हविषोवदानेषु हीत्याह हविषां यावद्भ्यः प्रदेशेभ्योवदानग्रहणं
कृतं भवति तत्र प्रत्यभिघारस्य माज्येनकर्तव्यं स्विष्टकृतः प्राक् । स्वि
ष्टकृदर्थावदानानन्तरं तु हविषः प्रत्याभिघारणं न भवति ॥ तस्माद्य धा
स्य कस्य च हविषोवद्यति पुनरेव तदभिघारयति स्विष्टकृत एव तत्पुनराप्या
ययत्ययातयामं करोत्यथ यदा स्विष्टकृतेवद्यति न तत्पुनरभिघार
यति नो हि ततः कांचन हविषोन्नावाहुतिं होष्यन्भवतीति श्रुतेः तथा
त् । तथा वरुणप्रघासेषु वारुण्यो घवदानानन्तरं श्रूयते प्रत्यनक्त्यावदा
नेनातिक्रामतीति । न प्रत्यनक्त्यवदानमतिक्रामतीति । पितृयज्ञे च प्र
त्यनक्त्यवदानानि नातिक्रामतीति । तत्र स्विष्टकृदवदानान्तरं न प्रत्यन
क्त्यवदानानि नातिक्रामतीति श्रवणात्स्यस्यवदानमभिघारणं कार्यं ॥

दे॰ प्रश्नी
१२५

सर्वहुत एककपालः। एकस्मिन्कपालेसंस्कृत एककपालो द्यावापृथि-
वीयकाय वैश्वकर्मणो सोर्यादिकः स सर्वहुतः कर्तव्यः। अथेतन् ६: सर्व-
मेव जुहोतीति न स्विष्टकृतेव यतीति द्यावापृथिवीयस्य सर्वहुतत्व श्रवणा-
त्तस्य चूर्णितास्ये ककपालानां। तत्र चतुरवत्तत्व संपादनायेतुपरिष्टाद्द्वि-
रभिघारणं कर्तव्यं पंचावत्तिनां तु द्विरुपस्तरणं द्विरभिघारणं च अ-
नुवाचनप्रैषो यथा देवतममुष्मा अनुब्रूहीति अनुवाचनार्थं प्रैषो नु-
वाचनप्रैषः पुरोनुवाक्यार्थः प्रैषः स यथा देवतं या या देवता यस्मिन्या-
गे भवतीत हूयाचि पदं अमुष्मा इति चतुर्थ्यंतं प्रयुज्यानुब्रूहितिएवं प्रैषः
कर्तव्यः। अग्नयेनुब्रूहि सोमायानुब्रूहीत्येवं आश्राव्य प्रैषश्च आश्रा-
व्येत्याव श्रावणानंतरं यत्र मैत्रावरुणस्य प्रैषः क्रियते तत्रापि देवता-
पदं चकारादमुष्मै इत्येवं चतुर्थ्यंतमेव प्रयोज्यं अग्नये प्रेष्य सोमाय प्रेष्ये-
त्येवं अमुं यजेति। यत्र आश्रावणानंतरं मैत्रावरुणस्य प्रैषो न भवति त-
त्रामुं यजेत्येव द्वितीयांतं देवतापदं प्रयोज्यं तद्यथा अग्निं यज सोमं
यजेति प्रैषानुवाचनेष्वश्रावयाधाना सो मभ्य इति परिहाय प्रैष १२५

125

संबध्यनुवाक्यवन्तं प्रैषाणां वाचनं । यत्र पुरोवाक्यानन्तरं मैत्रावरुणस्य प्रै
षो भवति । तत्र पुरोनुवाक्याप्रैषयोर्द्रव्यवाचिनि शब्दे षष्ठी विभक्तिर्भवति
देवतावाचिनि तु चतुर्थ्यादयो । यथा अग्नीषोमाभ्यां छागस्य हविषोऽनु
ब्रूहीति । किं सर्वत्रायं नेत्याह । वपापुरोडाशधानासोमेभ्य इति परिहाय इ
मौ प्रैषौ वर्जयित्वा । अत्रानुवचनाद्द्रव्यवाचिनि शब्दे चतुर्थ्येव विभक्तिः
इतोन्यत्र षष्ठीति । असावित्यपनोदे यत्र प्रैषे असाविति यत्तु नामपदं
भवति यथा पुनरभ्यन्नीनेषु नामग्राहं य[illegible]जेति प्रशास्त्रादीनिति प्र
शास्तर्यजमानस्य जेत्यादि तत्र देवतानाविभक्तिरपनोदे अपनयेवर्तते दे
वताविभक्तिस्तस्मात्प्रैषादपनीयते न प्रयुज्यत इत्यर्थः । अथवा यत्र मं
त्रमध्ये असावित्येवं सर्वनामपदं प्रेषितं भवति यथा संम्राडयमसावि
ति बृहस्पते युष्मा साम्राज्येनाभिषिंचाम्यसाविति इममसुष्यपुत्रमसुष्यै पु
त्रमित्या[illegible]दि चात्रत्र तत्सर्वनामपदमपनोदे अपनयेवर्तते । तस्मा
दपनोदमपनयं यजति शब्दास्थानं कृत्वा तस्य स्थाने यद्विवक्षितं तस्य नाम्नः प्र
क्षेपः कार्यः । यथा सम्राडयं यजमानस्त्वा साम्राज्येनाभिषिंचामि यज्ञ

द्रतज्ञामेल्लिति इममनुष्यपुत्रमित्यत्राणमंद द्वार यस्य पुत्रकौस त्याया:
पुत्रमित्येवं प्रयोऽयमवषट्कारा मुत्ति एन्द क्षिणेन तउदद्रु: प्राङ्गु. षट्कृते। वषट्का
रेण सह वं तेन इ ति सवषट्कारा:। ना स्वाहेति अध्वर्युर्दक्षिणे नौदर्द्। क्षिण दे
भागे तुद उगा डि. स्थे ज्ञान दिग्भिमुखो वषट्कृते होन्ता वौ षडि त्य
नेसति जुहोति आहवनीयमध्ये हविः प्रक्षिपति। ननु वषट्कारास्तुण सह
वा अथवा वषट्कारेण सहैव जुहोति युगपदित्यर्थः तस्माद् सह वैवं वष
ट्कारेण जुहुयात् वषट्कृतेवेत्त वेति उभयथा श्रवणात् वषट्कारात् पूर्वं होमे नि
द्राचश्च यते देवपात्रं वा एष यद् वषट्कार स्तद्यथा पात्रे उद्धृत्य प्रयच्छेदेवं त
दथ्यथ यस्तु रा वषट्कारा जुहुयाद्यथा पोत्र मो निदि ग्धं तदमुया स्याद् एवं तदि
ति तथानद्युया यो नोरेतः सिंचेदेवं तदथ यस्तु रा वषट्कारं जुहुयाद्यथा यो
नोरेतः सिक्तं तदमुया स्याद् एवं तदिति अमुयेति वृथेत्यर्थः। तस्माद् वषट्कारे
ण सह वा होमो वषट्कारानन्तरं वेति सिद्धं। यत्र वसणप्रघासग्रहमेधीय
शुनासीरप्रचारादौ पुनर्वचनं वषट्कृते जुहुतो वषट्कृते जुहोतीति तत्र
तस्यैव नियमो न सहेति उभयत्र आज्य हविषः। होमकाले हविषउ १२५

भयतनश्चाज्यं होतव्यं पूर्वमस्य माज्यं हुत्वा ततो हविर्हूयते पुनश्चोपर्या
ज्यमित्यर्थः। स ह वा। अथवा च्चाज्येह विश्चोभयं संहे वसुगप देवहूयते
नोभयत आज्यमिति। प्रदग्धाहुतिर्हवा अन्यो ध्वर्युरित्निमस्तूलस्त्र
थहेना एषसंतर्पयति। योयमाज्यं हुत्वावदानानि जुहोत्यथपुनर
तत्राज्येनाभिजुहोत्येषहेनः संतर्पयतीति तथात्रह होवाचयाज्ञ
वल्क्योयद्वाउपस्तीर्यो वदायाभिघारयति तदेवैनाः संतर्पयतीति बस्न
वणात्। अथेदं विचार्यते। अग्नयेनुब्रूहि प्रोक्षणीरासादय त्वमग्नीचि
हरबर्हिस्तृणीहीत्येवमादयः श्रूयंते। ते किं कर्मचोदका विधायका मंत्रा
इति प्रेषाणां प्रस्तुतत्वान्नहि षयमेव विचिंत्यतः। न त्वेषां मंत्रत्वं प्रागुक्तमे
वजात्। चोयजूंषि सामानि निगदा मंत्रा इति। सत्यमुक्तं। तथापि निगदानां
इतरमंत्रेभ्यः किंचिद्वैलक्षण्यमस्ति तेन तदोवाक्षिप्य क्रियते। किं
वैलक्षण्यमिति चेत्। तदभिधीयते [illegible] वर्तमानावदेशात्। स्त्रोद नाशय [illegible]
न्यार्थाभावात् वैचेजिवचनान्निर्हेशात् कर्मचोदकः। अग्नीदग्नीन्विहरेत्या
दिः कर्मचोदकः कर्मविधायकः विधिवाचमित्यर्थः। ननु मंत्राः कु

दग्नि

दे॰ अ॰ श्री १२८

127

नः वर्तमानापदेशात् एवमादयो वर्तमानमर्थमनुद्देश्यत्वेनयत्नत उप
दिशन्ति अग्निविहरणं कर्तव्यं स्तरणं च कर्तव्यमित्येवमुपदिश्यन्ते
। किंच चोदनाशब्दात् अपि च एषु प्रैषेषु चोदनाशब्दो विधिशब्दोसि
विधौ हि लोट् स्मर्यते । लोडिति लोण्मध्यपुरुषवचनानि चैतानि । विह
रत्न एणीहि आसादयेत्यादीनि तस्मादपि कर्मचोदकान्येते । अ॰ स्वर्थाभा
वात् । अपि च । विधिविभक्तिः अवगतोपि यदि विधित्वं नाश्रीयते न हि अ
स्वर्थाभावः अन्तार्थहानिः स्यात् । न वै चेनिवचनात् । अपि च इदमपरं मं
त्रेनो वैल्कलस्यैणं । यस्येषास्त्वे वेल्कलस्यैणं । यस्येषास्त्वे वे वचनाः प्रच्यन्ते । ब्रा
ह्मणं न पर्यपितवे अभ्युमानेन वेष्ठां चं ह नविडस्यादयः । मंत्राश्च इति वच
नाः कर्मणो वा वपायुर्वी मिति । उरुवा नायेति इषेत्वेति ऊर्जेत्वेत्यादयः
। अतो अमन्त्रत्वं निर्देशात् । अपि च मंत्राम्नवेदे निर्दिष्टा एव परिगणि
ता एव । अहे बुध्नियमंत्रं मे गोपायमृषयस्त्रैविद्या विदुः । स्त्र चो यजूंषि स
मानीतिन चानगन्तासत्र निर्दिष्टाः । तस्मादमंत्रत्वं । अथवा निर्देशात्
विधिविभक्तियोगस्कुनुवंत्येनेकर्मनिर्दिष्टं विधानं तस्मादेवं जानीयकः १२८

कः कर्मचोदक इति पूर्वः पक्षः सिद्धान्तमाह मन्त्रो वा समभिव्याहारात्
। अग्नीदग्नीन्विहरेत्येवमादिको मन्त्र एव प्रत्येतव्यो न कर्मचोदकः । वा श-
ब्दः पूर्वपक्षनिरासो । कुतः समभिव्याहारात् । य एभिरर्थोऽभिधीयते त-
स्य वाक्यान्तरेण समभिव्याहारात् विधानादित्यर्थः विहरत्यग्नीदग्नी-
न्त्सृणाति बर्हिरित्यादिना । यद्येते कर्मचोदकाः भवेयुस्तदा वाक्यान्त-
रेतेषामर्थो न विधीयेत विधीयते च तस्मान्मन्त्रा एवैते न कर्मचोदका
इति । न चाविहितस्य पुनर्विधानं युज्यते । अभिधानं तु संभवति तस्मा-
न्मन्त्रा एव । अथवा अयमर्थः समभिव्याहारात् । प्रयोगकाले एषां सम-
भिव्याहारं तूच्चारणं विधीयते अथाह प्रोक्षणीरासादयेति । अथ
तु न एतां वाचं वदन् अग्नीदग्नीन्विहरेत्यादि । यद्येते विधयः स्युस्तर्हि
उच्चारणमेषां न विदधीत । विधत्ते च । तस्मान्मन्त्रा इति वर्तमानापदेश-
कत्वं च मन्त्रत्वेऽपि न विरुध्यते यदुक्तं चोदनाशङ्काकृत्स्यर्थाभावादि-
ति तन्मन्त्रत्वेऽपि न विरुध्यते । न चायं विधिर्लोट् किं तु प्रोक्तकाले अग्नी-
ध्रं प्रत्यध्वर्युर्ब्रूते हे अग्नीत् त्वमग्नीन्विहर न त्वज्ञानि विहरणस्य

मान्नाः। इति। नवैवेति वचनत्वं चानैकान्तिकं। मन्त्रा अपि नवैवोक्ता वचनाः
संनिकन्याइव वहन्तु मे वइति मन्त्राश्चानि तिव वचनाः सजुह्रो मेधस्य
वाजी इत्यादयः अतस्तद्वैलक्षण्यं नास्तीति। यजुषां निर्देशोऽग्नि गदा
अपि निर्दिष्टा एवानेन निगदानां हवनिर्देशः शाखमंत्रत्वमित्येनहपि
निरस्तोऽस्मादेवं जातीयका मन्त्रा एवेति सिद्धं अर्थप्रसंख्यया द्रव्योपक-
ल्पनं अर्थः प्रयोजनं कार्यमित्यर्थः। प्रकर्षेण संख्यानं गणनं प्रसं-
ख्या अर्थस्य प्रसंख्यानया अर्थप्रसंख्यया प्रयोजनपरिगणनया
द्रव्योपकल्पनं द्रव्याणां स्रुचाग्निहोत्रहवण्यादीनामुपसमीपे क-
ल्पनं स्थापनं कर्तव्यं करिष्यमाणे कर्मणि तदुपयोक्ष्यमाणानि सर्वा-
णि द्रव्याणि हदिविमथ्यगणोरित्वा कर्मारंभात् प्रागेवानीय समीपे
स्थापनीयानि अन्यथा कालनविनप्रधानकालबाधः स्यादिति चर्मो-
एय. उत्तरलोमानि प्राग्ग्रीवाणि चर्माणि कृष्णाजिनादिष्ववणे शार्दूलच-
र्मादीनि उत्तरलोमानि प्राग्ग्रीवाणि उत्तरणीयानि पितृयज्ञेऽपि अन्यायां
चोदग्ग्रीवाणि दिग्विपर्ययात्। उत्तराणि उपरि स्थाप्याग्रवन्तरि निलोमा १२८

नियेषांतान्यक्तनरस्तोमानि। प्राचीग्नीवायेषांतीनि प्राग्नीवाणि नतु
नरनः पुच्छस्योत्तरलोम प्राचानग्नीवमुपस्तृणातीत्येवंनत्रनत्रश्च
नत्वात् अवरोक्तमुत्तरं ठ॰ हविषिहविषिपदर्वीत्कंपश्चाद्दूतंनदृश
नः काम्नतश्चोत्तरस्यस्येतत्कं यत्पूर्वं पठितंनतस्यपूर्वेग्रहणोदक्षिणेनः
श्रपणमासादनंच पश्चपश्चात्सवितंनतस्यपश्चाद्ग्रहणं उत्तरतः श्र
पणमासादनंचेति विज्ञेनोतयैवानुवादात् तथाचमहापितृयज्ञोप
तत्र जुहूमासादयस्यथपूर्वामुपभृतमथध्रुवामथपुरोडाशमथधा
नाश्चथमंथमिति। अत्रदिग्विपर्ययेणप्राच्येवोत्तरा तेनैवमनुघते
एकद्रव्येसाङ्ग्येवेदेनोपग्रहणं साङ्ग्येश्राङ्उपसंयुतेएकद्रव्येएकस्मि
न्कुल्लवाङ्ग्यत्खात्यादिकेद्रव्येदक्षिणहस्तेन ग्रहीतेसत्तितस्य
सव्येनवेदेनोपग्रहणंकर्तव्यंदक्षिणहस्तस्थस्यसाङ्ग्यस्यैकद्रव्य
स्यहस्तकंपनादिनाङ्यसकंदनवारणार्थंसव्यहस्तगृहीतवेदेना
धारकरणमुपग्रहणमुच्यते। यथादर्शापविन्नेणाग्नसणेमुपगृ
ह्णाति। यथाचधर्मेडपयमन्योपगृह्णातीति। एकद्रव्यइत्यपदेशाज्जु

दे॰ब्रश्री
१२८

129

हूपमनोर्हयोर्ग्रहणे हुयोरपि हस्तयोस्तत्रव्यापृतत्वेन स्रुचिरत्वात्कं
पेन स्त्वं दन त्वांकाभावान्नसव्येन वेदोपग्रहः अत एकद्रव्यद्रव्यमनेना
नेकद्रव्ये वेदोपग्रहणं कार्यमिति स्पष्टेनान्यत्र आज्यादन्यत्रान्येनोद
कपुरोडाशादिद्रव्येण द्रव्यवत्त्वेकद्रव्ये प्रोक्षणीप्रणीताचमसपुरो
डाशपात्र्यादौ हस्तेन हस्तच्छेदस्पष्टेन सव्येन तु यग्रहणं कर्तव्यास्तं
हनवारणार्थमाधारः कर्तव्यः अत्र केचिदेवं व्याचक्षते एकद्रव्ये
स्वाज्यद्रव्ये वं विध्यविषयादन्यत्र सर्वत्र स्पष्टेनोपग्रहणं कर्तव्यं परि
स्तरणपर्युक्षणे परिस्तरणजपप्रत्युपग्रहणादौ कर्ममात्रे यत्राद्रव्यसंबं
धो नास्ति तु दोरस्तु आसन्नस्पृष्टवेदद्वितीयद्रव्यालम्भे क्षणोपूपग्र
हे तु नु शेस्त्रुपग्रहणं सर्वत्र कर्तव्यं नहु तं सव्यः सोपग्रहः कार्योद
क्षिणः सपवित्रकदर्भितव्याग्रहहोमादौ स्पष्टस्पष्टवचनेनाग्नौ द्रुस्त
स्पष्टाद्रव्ययोः नु रौरुपग्रहणं वेदस्पासन्नावस्तुकरणात्प्राग्वा विमो
काद्रूर्द्ध्वा अन्यव्यापाराद्धास्पष्टस्पान्यत्रव्यापारादेवा द्वितीयद्रव्यं
नुवाचनिकं घाचिन भवति केचित्तु स्पष्टस्यापि जुहूाद्व्वदर्शपूर्णमासत्र १२८

द्धिकारेष्वेव विनियोगमिच्छंति तन्नैव स्पष्टस्य हृद्यत्वात्। नान्यकर्मस्व
ग्निहोत्रादिष्विति। अपरस्त्वेवं व्याचष्टे। असम्मृष्टेष्वेषु कुशेषु रूपग्रह
णमिति पाणिभ्यां जुहूं परिगृह्योपभृत्स्थानमादानकाले सर्वः ह्लाद
यन्। स्रुचोरादानकाले पाणिभ्यां ह्राभ्यां हस्ताभ्यां जुहूं परिगृह्याग्रमा
गे णानीमोपभृति उपभृत उत्तउपर्याधानं स्थापनं करोति किं कुर्वन्
असंह्लादयन् असंश्लिंजयन्। परस्परं संघट्टनेन शब्दमकारयन्नित्य
र्थः। अथातः स्रुचोरादानस्येति प्रकृत्येदं सूत्रमेव कुर्याद् हस्ताभ्यामेव पा
णिभ्यां जुहूं परिगृह्योपभृत्यधिनिदध्यादिति तथा ते असंहृशि
जयन्नाददीतेति च श्रवणात्। वाक्य फलेषु स्वर्गः सामर्थ्यात्। वाक्यं
कवत्कव्यं फलं येऽमुतानि वा न्यफलानि अनुक्तफलानि विश्वजित्ताय
ज्जेताभिज्जिताय जेतेस्याहोमि तेषु चिंत्यते किमेषु फलमस्ति उत नास्ति
।यदा चास्ति तदा यत्किंचिद् उत स्वर्ग इति संदेहे फलाश्रवणान्नास्ति फ
लमिति प्राप्त इदमुच्यते वाक्य फलेषु अश्रुतफलेषु विश्वजिदादिषु
स्वर्गः फलत्वेन कल्पनीयः। कुतः सामर्थ्यात्। एवमेतानि वाक्यानि स

130

गतार्थानि भवंति। इतरथा सांकाक्षत्वाद्यर्थान्येव स्युः नच वेदे मा
त्रामात्रस्यैव वैयर्थ्यमिष्यते। पश्च साकांक्षत्वं वाक्यं भवति तत्पक्षांतरम
प्याहृत्यानुषज्य वा निराकांक्षकरणीयं तत्तश्च तत्सार्थकं भवति। त
त्रैषु वाक्येषु स्वर्गकामपदानुषंगः कार्यः। विश्वजिता यजेत स्वर्गकाम
इति। ननु पुत्रकामादिपदानुषंगः किमिति न क्रियते उच्यते। प्रवृत्तिस
वैरभिलष्यात तत्स्यैवानुषंगो युज्यते स्वर्गस्य सर्वैरभिलष्यते। अ
नतिहेषानुषज्यते नान्यानि पुत्रकामादिपदानि एककर्मणि गुणवि
शेषे फलविशेषः। एकस्मिन् कर्मणि गुणविशेषे वैकालिके अंगाधि
क्ये तु ने सति फलविशेषो भवति तद्यथाग्न्याधेये पूर्णाहुत्यं त
मिष्टं तं चात्र पूर्णाहुत्येन पक्षादिष्टांत पक्षे फलभूयस्त्वं। इष्टं न पक्षे
पि पंचहू क्षिणा पक्षात् हादशदक्षिणापक्षे फलभूयस्त्वं। तस्मादपि
चतुर्विंशतिदक्षिणापक्षे फलाधिक्यमिति अत्र च फलाधिक्यम
न्तीनां महावीर्यत्वं। तेषु चक्रियमाणानामुत्तरकर्मणामपि वीर्यव
त्तरत्वमिति। एवं सर्वत्रांगाधिक्ये फलाधिक्यं द्रष्टव्यं। अन्यथाधि

कर्तृगुणाभावात्तस्य वैफल्यप्रसंगात्। असति च विशेषे को नामा-
धिके ऽधिके श्रावहेंगसंचे प्रवर्तेत। तस्मादंगम् अपत्वात्स्वफलम्। यत्त्वं
मन्वत्रैव हारनधावनान्वारंभणवरवरणव्रतप्रमाणेषु यजमानं
प्रतीयमानेषु होतानादिषु प्रमाणेन तेषु यजमानं कर्तारं प्रतीयात्। हो-
तेनावत। अन्वाहार्यं ददाति तस्मादग्नीधे प्रथमाय दक्षिणां द-
दातीत्यादौ। आपो देवा मद इति वाचयति रेवतीर्यतिरेवति यज-
मान इति वाचयतीत्यादौ सर्वत्र यजमानं वाचयतीति ज्ञेयं। आग्नि-
नेमृहत्यन्वारंभ एवेवा पुरोडाशं निर्वपति स्फ्येनान्वारब्धे इत्यादाव-
न्वारंभणे यजमानेनान्वारब्धे इति यज्ञेयं। वरवरणं वरप्रार्थनं त-
रं हुत्वा वरं ददातीत्येवमादौ तत्र वरवरणमिदं मे स्यादित्यभिलाषस्य प्रा-
र्थनं यजमानः करोति। अथ वा वरशब्देन वरणं वरणशब्देन त्विग्व-
रणं तदपि यजमानः करोति। व्रतशब्देन शास्त्रितो नियम उच्यते स-
त्यवदनाधःशयनयमो व्रतनादिकः तस्यापि यजमान एव कर्ता।
प्रमाणं चाग्निरथरः वेदि मात्रास सदो हविर्धानाग्निक्षेत्रप्रमानंतात

दे॰ प्रश्नो तदापि यजमानसंबंधिनारत्न्यादिना कर्मेयं खानलूनछिन्नावहसपि
१३१ त्रद्द ... ध्वरगेष यजुः क्रियासंभवात् खाने प्रपावशे परवादेय तन्नेबर्हि
षि छिन्नेपूप शाखादिकैः अवहननेषु व्रीहिषु पिष्टेषु तंडुलधानादिषु द
ग्धे यूपसिद्धेषु महावीरेष्टकोखादिषु एतेषु खातादिषु लोकसिद्ध
प्रयोगो यमतेषु यजुः क्रियानभवति । नुन्नः द्वाराभावात् क्रियाद्वारको
131 हि मन्त्र इति । एवञ्चासंभवविषयं द्रष्टव्यमिति कर्काचार्याः । नारायणाभ्या
म् । एतेषु यजुः क्रियाकर्तव्याः नुन्नः असंभवात् । यदा देवान्मानुषाद्वा
प्रतिवजादेतेषां पयाम्रनं करणेन संभवति तदा सगुणसंभवे नित्या
नां यथाश्रुति गुणोपात्तानाम यथवश्यकर्तव्यत्वादेतानि लोकसि
द्धान्यपपादयानि तदेतेषु यजुः क्रियाकर्तव्या । यजुर्युक्ता क्रिया यजुः
क्रिया । तावन्मात्रस्य लोकसिद्धत्वाभावात् । याज्ञिकास्तु एवमाहुः । एते
षु लोकसिद्धेषु गृहीतेषु अपि यजुः क्रिया यजुर्युक्ता क्रिया पुनर्यथाकथं
चित्कर्तव्या नुन्नः संभवति हि यथाकथंचिद्यजुः क्रिया । अथवाऽसंभ
वात् अन्यस्या ४ क्रियायाः कर्ममध्ये असंभवात् यदा च पशोरुपाहर १३१

णार्थं संनिरुद्धेऽस्मान्नदेशान्तरे विप्रकृष्टे गम्यते। तदा प्रधानकालस्व-
रोधो भवति। परदारैकदीक्षापक्षस्तदा महावीरो प्रख्या रादिकमेकेनाद्भि-
निष्पादयितुमशक्यत्वात्। एवमाघसंभवदुदाहरणी यः तद्युक्तं मंडनमिश्रैः
छिन्नं लूनं च पिष्टं च समान्तायां मृत्स्नायां तथा। लोकसिद्धं गृहीत्वा चेत्संज्ञा-
यो न्यवाञ्जीयात्। छिन्नादि लोकसिद्धं चेत्तद्धि येन कृतं प्रतितानं तच्छ्रेयं प्राह भ ज
ह.ता रद्वाजः कृतं तथा छिन्ने चावहते पिष्टे दग्धे लूने च मृत्स्नायै। खाने च लौकि-
के प्रासे जपो नास्त्येव वाजिनीमिति रौद्रं ढुः राक्षसमासुरमाभिचरणीकं मं-
त्रमुक्त्वापि आत्मानं चालभ्योपस्पृशेद्ध्वदपस्पृशेदपः। रौद्रो रुद्रदेवता-
कः ऽवरुद्रं ते रौद्र्याविस्थादिकः राक्षसो रक्षोदेवताकः। प्रत्यक्षं द्वेषं राक्षसे-
र क्षासां रास्मभित्यादिकः। आसुरोऽसुरदेवताकः। आपहता असुरम-
पारस्मरो आसुरेऽत्यादिकः। अभिचारः प्रयोजनमस्य मंत्रस्यास्याभि-
चरणीकः प्रयोजनमिस्यर्थे उकुः। अनकत्रनमनो मामोहृत्। हिंसतो वधो स्वा-
स्यादिः शत्रुनामादेर्नासंयुक्तः अभिचारार्थमेव प्रयुज्यमानः आभिचरणिक
इत्यप्यनेन अनुयायाम्नातः कृत्स्नार्थं बुद्ध्या प्रयुज्यमानः। तेनाभिचरणबुद्ध्या

दे· प्र· श्री· भावे मंत्रस्याभिचरणप्रयोजनाभावान्नाभिचरणीक. त्वं। अनन्तरमुच्चारणेनुदको
१३२ पस्पर्शनाभावः। रौद्रादिकं मंत्रमुक्त्वा पठित्वापि अपि रुद्रदैवत्यं च मंत्रमुक्त्वापि
अत्यइत्यादिकमुक्त्वा चकाराद्रौद्रादिदेवत्यमंत्रकं कर्मेव कृत्वा आत्मानं वा
लभ्याप उदकानि उपस्पृशेदालंभनेन यद्यपि स्यात्रैष्टुना अपो ह स्ते
न स्पृशातीत्यर्थः। यत्पितृश्चात्र पितृअपामुपस्पर्शनं दर्शयति। यस्मा
च्छिन्नमवघ्नन्ति यद्देवा आविहृ यज्ञस्य यद्गृह्यं नदेवेनन्निर्मिमीते याप
उपस्पृशाति शांतिरापस्तद्भिः शमयतीति तथा अंबेकानं नरः। पुनरेता
पउस्पशांतिस्तहृदयेनैव वाएतद्वारिषुः शांतिरापस्तद्भिः शांत्या शम
मयंतइति हरिभ्यासोध्यायपरिसमाप्तिसूचनार्थः १० इति कात्यायनसू
त्रव्याख्याने संग्रहात्सुपतिमहायाज्ञिक श्रीश्रीप्रजापतिसुनमहायाज्ञि
कश्रीश्रीदेवचूनेप्रथमोध्यायः संवत् १६२१॥ ❀ :०:

132

१३२

नं० ५२६३